This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥हपुस्तकंगदाधरभाष्यप्रथमकांड [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ आवि
र्भूतश्चतुर्धा यः कपिभिः परिवारितः ॥ हतवान् राक्षसानी
कं रामं दाशरथिं भजे ॥१॥ स्वाभिप्रायेण हि मया न किंचिदि
ह लिख्यते ॥ किंतु वाच्य निबंधं सर्वमतो यास्त्वे च निर्मये ॥२॥ अ
थातो धिकार इत्यादिना श्रौतानि कर्माण्युक्तानि तदनंत
रं स्मार्तानि विधीयंते ॥ तत्रैतत्प्रथमं सूत्रं ॥ अथातो गृ
ह्यस्थालीपाकानां कर्म उच्यत इति सूत्रशेषः ॥ श्रौतानं
पमप २ तर्यमत्राथशब्दः ॥ आनंतर्ये प्रयोजनं तु अथा
तो धिकार इत्यादि यत्साधारणं तस्य प्रवृत्त्यर्थं ॥ श्रौतानामु

अतेर्ग्लेहेतुः ॥ यतः श्रौतान्युक्तानि स्मार्तान्येवावशिष्यंते तस्मात्तान्युच्यंते ॥२

पन्निबंधनं पूर्वमिति प्रोच्यते यत्र हानुपतिश्चते पूर्ववदिष्येत
सूत्रप्रवत्याग्नायते ॥ ननु पूर्वं गर्भाधानादीनामनुष्ठानात्पू
र्वमनुष्ठानक्रमेण स्मार्तान्येव वक्तव्यानि इति चेत्सत्यं ॥ श्रौ
तेषु हि प्रत्यक्षाः श्रुतयः ॥ स्मार्तेषु च पुनः कर्तृसामान्याद
नुमेयाः श्रुतयः स्मार्तानामपि हि वेदमूलत्वमुक्तं मनहैः ॥
तस्मात्प्रत्यक्षश्रुतिबोधितानामेव पूर्वमभिधानं ॥ स्मर वमध
णादेव स्मार्तानां प्रामाण्यमिति कर्कोपाध्यायैरुपन्यस्तं ॥
गृह्यः शालाग्निः ॥ तत्र ये स्थालीपाकाः ते गृह्यस्थालीपा
काः तेषां गृह्यस्थालीपाकानां कर्म क्रियेति ॥ स्थालीपाक:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ दा
१ शा आज्यपुरोडाशाद्युपलक्षणार्थं ॥ कथं ज्ञायते ॥ येन स्थालीपाक ये१
मुपक्रम्याज्यमुपसंहरति ॥ निरूप्याज्यमित्यादि ॥ एवमाज्य
ग्रहणमपि चर्वाद्युपलक्षणार्थं ॥ यतः सर्वसाधारणमेवेदं
कर्म ॥ न ह्यस्य कर्मणः कस्याश्चित्प्रकृतेः कस्यांचिद्वि
कृतावन्तर्भावोस्ति ॥ यत्प्रधानविधिरंगविध्यन्वितः पठ्यते
२ सा प्रकृतिः ॥ यथा दर्शपूर्णमासौ ॥ यत्प्रधानविधिरंगविधि
रहितः पठ्यते सा विकृतिः ॥ यथा सौर्यः ॥ नच दर्शपूर्णमा
सविधौ यथाज्यविधेरिवैतत्कर्मविधेः कस्मिंश्चित्प्र
धानविधौ शेषभावोस्ति ॥ यतः सर्वाण्येव कर्माणि प्रकृत्य
धर्मविधानं सर्वसाधारणं कर्माह ॥ परिसमुह्योपलिप्यो

ल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय ॥ दर्भैः परिसमुह्य गो
मयेनोपलिप्य ॥ स्रुवमूलेनोल्लिख्यानामिकांगुष्ठेनोद्धृत्योदकेना
भ्युक्ष्य तस्मिन्नग्निं स्थापयेत् ॥ त्रिरुल्लेखनं त्रिरुद्धरणमि
ति हरिहरः ॥ परिसमूहनादिपंचापि त्रिस्त्रिरिसत्ये ॥ कर्को
पाध्यायैरपि विपर्यस्यापि प्रेषुलहर दक्षिणाद्येये तत्सूत्रे
व्याख्यानावसरे यद्यप्युक्तं रूपं दर्शयति तथापि चैस हृतकृ
त्यं ॥ यथा परिसमुह्योपलिप्योल्लेखनमिति लेखने नै
तावद्दर्शितं ॥ देवे परिसमूहनादि त्रिभिः ॥ क्रियेसक्षसहृ
दिति ॥ एते पंच भूसंस्कारा इति भर्तृयज्ञभाष्ये ॥ अभ्यर्था
त्यति कर्कोपाध्यायाः ॥ तेन यत्र यत्राग्नेः स्थापनं तत्र तत्रैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्त्तव्याः॥ अतः श्रौताग्निस्थापनेपि कार्यः॥ न चैषां स्थाली
पाकादि धावंतर्भावः॥ एतेन एष एव विधिर्यत्र क्वचिद्धोम
इत्याभिहितेपि पुनरभिधीयते॥ उक्तं तावोक्षितेग्निमुप
समाधायेति॥ नूनमतोऽप्रवर्तितत्त्वेति॥ अग्निसाध्यानि
स्मार्तानि सर्वाण्यावसथ्येग्नौ कार्याणि॥ तथाच स्मृतिः॥
कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायकालाहृ
ते वापि श्रौतं वैतानिकाग्निषु इति॥ तस्मिन्गृह्याणीत्यापस्तं ३
बस्मरणाच्च॥ गृह्यं हि तं गृह्यं॥ गृह्य शब्दश्च दंपत्योर्वर्
त्तते॥ तस्मिन्नित्यावसथ्ये अतश्च यत्किंचिद्दंपत्योर्हितं
कर्म शांतिक पौष्टिकव्रतां गहोमादिकं स्मार्तं तत्सर्वं आव

सथ्येग्नौ भवतीति॥ अत एवाह कात्यायनः॥ न स्वेग्नावन्य
होमस्यान्मुक्त्वैकां समिधाहुतिं॥ स्वगर्भसंस्क्रियार्थाश्चयाव
न्नासौ प्रजायते॥ अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः॥
न हि पित्रा समानीतः पुत्रस्य भवति क्वचित्॥ अतश्च सीमं
तोन्नयनमपि स्मार्तोग्नावेव कार्यमिति देवभाष्ये परिभा
षायां॥ स्कंनोल्लेखनमिति गर्गहरिहरौ॥ कांडेन कुशमूले
नेति केचित्॥ अत्रैतद्विचार्यते॥ निमावसथ्याधानादि
षु वक्ष्यमाणेषु सर्वकर्मसु अध्वर्योः कर्तृत्वं॥ उत यजमानस्ये
ति॥ अध्वर्युः कर्मसु वेदयोगात्॥ इति परिभाषणात्॥ पूर्ण
पात्रं दक्षिणा वरो वेति दक्षिणाम्नानादध्वर्योः कर्तृत्वमिति चेदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ च्यते॥ न स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्वं ॥ वेदयोगाभावात् ॥ १६
समाख्यया हि अध्वर्योः कर्मसु योगः ॥ समाख्या हि वेदयोगात् ॥
न च स्मार्ते वेदयोगोस्ति ॥ नहि ज्ञायते अमुकवेदोक्तं स्मार्त
मिति ॥ तथा च श्रुतिः ॥ स होवाच य [illegible] कोभूरिति चतुर्गृ
६ हीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथ ॥ यदि यजुष्टो भुव
४ इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रे जुहवथ ॥ अन्वाहा ४
र्यपचने वा हविर्यज्ञेषु सोमतः स्वरिति चतुर्गृहीतमाज्यं
यदि४ गृहीत्वाहवनीये जुहवथ यद्यु अविज्ञातमस्त सर्वाण्यनु
द्रुत्याहवनीये जुहवथेति ॥ अविज्ञातं स्मार्तं यत्र ज्ञायते
दि किमार्चे दिकं किं याजुर्वैकं वा साम वैदिकमिति ॥ नापि द

क्षिणान्यथानुपपत्त्यान्यस्य कर्तृत्वं ॥ अस्ति च त्रान्योपि ब्र
ह्माख्यो ध्वर्ताध्वर्तावेक्षकत्वेन भवतीति तदर्थः परिक्रयोय
मिति क्षीणाव्यापत्तिस्तस्मात्तस्यैव कर्तृत्वं ॥ दक्षिण
तो ब्रह्मासनमास्तीर्य ॥ स्थापितस्याग्ने दक्षिणस्यां दि
शि ब्रह्मणे उपवेशनार्थं दर्भान्निधाय ब्रह्मोपवेशनं कु
र्यात् ॥ ननु दक्षिणतो ब्रह्मयजमानयोरासनमिति
परिभाषातो दक्षिणत आसनं प्राप्तं ॥ किमर्थं पुनर्दक्षि
णग्रहणं सत्यं ॥ पुनर्दक्षिणग्रहणं यजमानस्य तत्रा
सने मा भूदित्येतदर्थमिति दोषः ॥ एवं च यजमानासनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वे५

वचनाभावेऽग्नेरुत्तरतः स्यात्॥ उत्तरत उपचार इति परि
भाषणात्॥ यत्र पुनर्वचनं यथा पश्चादग्नेस्तेजनीमकंद
वा दक्षिणपादेन प्रवस्योपविशतीति तत्र तत्रैवोपवेशनं॥
यद्वा॥ दर्शपूर्णमासविषया परिभाषेयं वेदिस्तृणोति सू
त्रेण तस्माद्दक्षिणं वेद्यंतमधि स्तृणीयेवासीतेति श्रुतौ
चोक्तत्वात्॥ तेनात्रासिवेद्यभावाद्दक्षिणग्रहणमपूर्व
विधानार्थं॥ अतो यजमानोपवेशनमुत्तरत एव॥ अ
त्रास्तरणमात्रोपदेशात् चतुर्थीकर्मे दक्षिणतो ब्रह्मा
णमुपवेशनविधानात् न ब्रह्मोपवेशनं॥ मैवं॥ अह

र्थप्रसंगात्॥ नह्यदृष्टार्थं क्वचिदासनप्रकल्पनं कुर्यात्॥
ब्रह्मासनव्यपदेशानुपपत्तेश्च॥ तस्माद्ब्रह्मोपवेशनार्थ
मेवास्तरणं यच्च चतुर्थीकर्मण्युपवेदेन युक्तं तदुदपात्र
स्थापनविस्तरविधानार्थं तस्माद्ब्रह्मोपवेशनं भवत्येव॥
यदा ब्रह्मा न भवति तदा कौशः कार्य इति हरिहरः॥ तन्मू
लं च छंदोगपरिशिष्टे॥ प्रणीय॥ प्रणयनं चापां सर्वार्थं प्रदे
शांतरे दृष्टं॥ तद्वदत्रापि कार्यं॥ परिस्तीर्य॥ अग्नेर्दर्भैः प्र
दक्षिणं परिस्तरणं दत्वा॥ अर्थवदासाद्य॥ अर्थः प्रयोज
नं॥ अग्नेरुत्तरतः पश्चाद्वा द्वंद्वं प्रयोजनवतां पात्राणामा
सादनं कार्यं क्रमेण मुख्यक्रमानुग्रहात्॥ पश्चाच्चेत्प्राक्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा

स्थानानुपूर्व्याणां आसादनं ॥ उत्तरतउदक्संस्थानां प्रागग्राणां वा
प्राक्संस्थं सादनं ॥ कारिकायां ॥ पश्चादुत्तरतो वास्यासादनमन्वितः ॥
३ उत्तरेचेदुदक्संस्थं पश्चिमे भवेत् ॥ एतच्च विपुलास्थानसंभवे ॥
असंभवे तु कात्यायनेनोक्तं यथा चमुदगग्रे रुदगग्रं समीपत
इति देवयाज्ञिकाः ॥ पवित्रे छेत्वा ॥ कौशे समे अप्रशीर्णाग्रे प्रादेश
मात्रे अनंतर्गर्भे कुशौ छिंद्यादित्यर्थः ॥ प्रोक्षणीसंस्कारः ॥
प्रादेशमात्रवारणपात्रे प्रणीतोदकमासिंच्य ॥ पवित्राभ्याम
नुत्पूय ॥ सव्यहस्ते तत्पात्रं धृत्वा ॥ दक्षिणेनोद्धृत्य नयनं धृत्वा
प्रणीतोदकेन तत्प्रोक्षणं कुर्यात् ॥ ततस्तस्मिन्पवित्रे निधानं ॥
अर्थविमोक्षः ॥ तज्जलेन यथासादितानां पात्राणां प्रत्येकं प्रोक्षणं ॥

निरूप्याज्यं ॥ औपधिकासादिताज्यस्य स्थाल्यां प्रक्षेपः ॥ चरु
श्चेद्व्रतं तंदुलानां स्वस्थाल्यामावापः ॥ अधिश्रयः ॥ तदाज्यम
ग्नौ स्थापयेत् ॥ चरुश्चेद्वावसरे आज्यादुत्तरतोग्नावधि
श्रपणं ॥ पर्यग्निकुर्यात् ॥ अग्नेर्ज्वलंतमुल्मुकं गृहीत्वा आज्यस्य परि
तो भ्रामयेत् ॥ चरुश्चेत्तमपि पर्यग्निकुर्यात् ॥ उपलक्षणा
र्थत्वादाज्यस्य ॥ स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य वि
दध्यात् ॥ अग्नौ स्रुवं तापयित्वा दर्भैः सम्मृज्य प्रणीतोदकेन
अभ्युक्ष्य पुनस्तापयित्वा निदध्यात् ॥ स्रुवस्यायं संस्कारो हो
तः२ मार्थः ॥ एवं च दक्षार्थता संस्कारस्य ॥ अतः संस्कारविस्मरणे
प्रायश्चित्तपूर्वकं प्रागंसहोमात्कार्यः ॥ ऊर्ध्वं तु प्रायश्चित्तमात्रं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृ ५ ततश्चरुमाद्यांपस्य पश्चिमतो नीत्वा आज्यादुत्तरतो निधानं ॥ एवमेव स
वेंहविषां ५

ण प्रोक्षणमुदकेनाप्युक्तं इति गर्गः ॥ आज्यमुद्वास्योत्पूयावेक्ष्य
अग्नेः सकाशादाज्यमुत्तरमुद्वास्य पवित्राभ्यामुत्पूयत दाज्य
मवलोक्य चरुश्चेदाज्योद्वासनोत्तरं तस्योद्वासनं ॥ तत्रैवं ॥
अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेण नीत्वा अग्नेरुत्त
यथा रतो निधानं ॥ हविषां चैपूर्वं मिश्रुते ॥ प्रोक्षणीश्च पूर्वव
७ त् ॥ पूर्ववदिति पवित्राभ्यां प्रोक्षणीरुत्पूयतास्वेव पवित्र ७
निधानं ॥ चत्वारः आज्यमपि पूर्ववदेव ॥ अतः पवित्राभ्यां
रो स्यात् ॥ प्रोक्षणीसंस्कारोपं पर्युक्षणार्थः ॥ उपयमनान्कुशा
नादाय समिधोभ्याधाय पर्युक्ष्य जुहुयात् ॥ उपयमनकु
शान्गृहीत्वा उपगृह्येति ॥ तिस्रः समिधोग्नावभ्याधा

य प्रक्षिप्य ॥ प्रोक्षण्युदकेनाग्निं प्रदक्षिणं परिषिंच्य स्रुवेण
वक्ष्यमाणं होमं कुर्यात् ॥ तिस्रः समिधः सर्वत्रैस्मृतिरत्राति ४
तासमिधोदानं ॥ समिल्लक्षणं तु स्मृत्यर्थसारे ॥ पलाशखदि
राश्वत्थशम्युदुंबरजा समित् ॥ अपामार्गार्कदूर्वाश्च कुशा
श्चेत्यपरे विदुः ॥ सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्त
था ॥ शस्ता दशांगुलास्तास्तु द्वादशांगुलिका अथवा ॥ आर्द्राः
पक्वाः समच्छेदास्तर्जन्यंगुलिवर्तुलाः ॥ अपाटिताश्चाधि
३ शाखाः कृमिदोषविवर्जिताः ॥ इध्मस्तु द्विगुणः कार्यस्त्रिगु
णः परिधिः स्मृतः ॥ एष एव विधिर्यत्र क्वचिद्धोमः शांतिकपौ
ष्टिकादिषु ॥ एष एव विधिः स्यात् ॥ एवं चारोमं त्रयातिथे धार्यः ॥
४ यालिमपस्याः प्राप्नोति विपुलां श्रियमिति ॥ यद्ब समित्सवितुर्वेदमन्त्रपः पात
रासंमिताः ॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यादित्येवमर्थः॥ केचित्तु
२८ दुः॥ यथोक्तमग्निमुपसमाधाय घृतोत्पवनादि कृत्वा ...नि जुहु
यादित्यादौ॥ इति श्रीविरगिनबिसम्याङ्कस्थपति श्रीम
हायाग्निहोत्रमनाम जदीक्षितगदाधरकृते गृह्यसूत्रे
भाष्ये प्रथमकांडे प्रथमकंडिका॥१॥ आवसथ्याधानं
८ दारकाले॥ आवसथ्यं गृहं तत्रस्थोऽग्निरावसथ्य इत्युच्य ९
ते॥ तस्याधानं स्थापनं आत्मसात्करणं॥ आत्मनि फल ४
साधनकर्मानुष्ठानसंपादनसंस्कारविशिष्टत्वेन संपाद
नमिति यावत्॥ तद्दारकाले भवति॥ दारकालशब्देन पा
णिग्रहणं क्रियाउच्यते॥ चतुर्थ्युत्तरकालं इति संप्रदायः॥१

दारकाल१

पित्रा प्रत्तामादाय गृहीत्वा विश्क्रामतीत्येष दारकाल इति भर्तृ
यज्ञभाष्ये॥ दायाद्यकाल एकेषां॥ एकेषामाचार्याणां मते दा
याद्यकाले आधानं भवति॥ पैतृकद्रव्यस्य भ्रातृभिः सह क
विभागकालो दायाद्यकालः॥ तस्मिन्काले स्वेन द्रव्येण कर्मा
नुष्ठानसमर्थो भवति॥ साधारणद्रव्यस्य परित्यागसामर्थ्या
दनधिकार एव॥ अतो यथवस्था॥ भ्रातृमतोदायाद्यकाले॥
अभ्रातृकस्य दारकाले॥ अविभक्तस्यापि विवाहकाले पि आ वि
धानेऽधिकार इति मदनपारिजाते॥ आश्वलायनादीनां वै
वाहिकोऽग्निरेवौपासनाग्निर्दृष्टः॥ अत्र शांखायनगृह्ये तु॥
अभिसमावर्त्स्यमानो यत्रांत्यां समिधमादध्यात्तमग्निमिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृतवैवात्यंवा दधा घृकाल एके ग्रेते वा गृहपतौ स्वयं ज्यायान्वैभ्रा
त्वा समा वा स्याया मन्यस्यो वा मतो न क्षेप्य कृति ॥ अत्र छंदोग
गृह्ये विशेषः ॥ भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयं तिष्ठेत वा गृ
हपतौ ॥ परमेष्ठिकरणं तथा तिथिनक्षत्रसमवाये दर्शे वा पौ
र्णमासे वाग्निसमाधानं कुर्वीतेति ॥ औपासनिकाग्नौ विशेषः ॥
अपि वैवाहिको येन न गृहीतः प्रमादतः ॥ पितर्युपरते तेन
गृहीतव्यः प्रयत्नतः ॥ कृतदारो न वै तिष्ठेत्क्षणमप्यग्निना
विना ॥ तिष्ठन्भवेद्द्विजो व्रात्यस्तथा च पतितो भवेत् ॥ पि
तृपाकोपजीवी स्याद्भ्रातृपाकोपजीवकः ॥ ज्ञानाध्ययननिष्ठो
ऽनदुष्टोऽग्निना विना ॥ यथा संध्या यथा स्नानं वेदस्याध्य

यनं तथा ॥ तथैवोपासनं प्रोक्तं न स्थितिस्तद्वियोगतः ॥ योऽग्निं
स्मार्तमनादृत्य कर्म स्नानजपादिकं ॥ होमात्समाचरेद्विप्रो न
स पुण्येन युज्यते ॥ योऽदत्वा कांचनं मेरुं पृथिवीं च ससाग
रां ॥ तत्सायं प्रातर्होमस्य तुल्यं भवति वा न वा ॥ योगृही सावि
वाहोऽग्निं गृहस्थ इति मन्यते ॥ अन्नं तस्य तु भोक्तव्यं वृथा
पाको हि सः स्मृतः ॥ वृथापाकस्य भुंजानः प्रायश्चित्तं स
माचरेत् ॥ प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति ॥
तथा कालद्वये येन नाधानं तु कृतं पुरा ॥ स कृत्वाप्यतमं
कृच्छ्रमग्निमध्याहरेत्ततः ॥ एतदाधानं गृहपतौ मृते ए
कादशाहे द्वादशाहे वा कार्यं ॥ तदुक्तं रेणुकादीक्षितैः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु.द. एतन्मृहतौ प्रेतेकुर्यादेकादशोहनि॥ग्रामेवैकादशश्राद्धवृद्धि ४२
श्राद्धविवर्जितं॥एवंज्येष्ठःसमादध्यात्कनीयांश्चविवर्जये
त्॥एकादशोलिहुर्वनीद्वाहेवाविचक्षणः॥कालातिक्रमेतु
प्रायश्चित्तमुक्तं॥यावंत्यब्दान्यतीतानिनिरग्नेर्विप्रजन्म
नः॥तावंतिकृच्छ्राणिचरेद्धोम्यंदद्याद्यथाविधि॥ऋतदा
१० रोगृहेज्येष्ठोयोनादध्यादुपासनं॥चांद्रायणंचरेद्वर्षप्र
तिमासमहोपिवेति॥कालनुसंगामुहूर्तेविच्चारोप्यत्रकि १०
यते॥तत्रकारिकायां॥माघादिपंचमासेषुश्रावणेचाश्वि
नेतथा॥कुर्यान्मृगोत्तमांगेवाआधानंशुक्लपक्षतः॥मृ
गोत्तमांगेमार्गशीर्षः॥हस्तद्वयेविशाखासुस्वातिकादित्र

येतथा॥पुनर्वसुद्वयेतद्वद्रेवतीपूर्वरासुच॥भौमार्कवर्जि
तेवारेनाधिमासक्षयेतथा॥चंद्रानुकूलेपूर्वाह्णेरिक्ताविष्टि
विवर्जिते॥चतुर्थीनवमीचतुर्दश्योरिक्ताः॥सर्वेधृतश्च
व्यतीपातेनामासर्वोप्यनिष्टः॥परिघस्यचार्धं॥विष्कंभे
घटिकास्तिस्रोनवव्याघातवज्रयोः॥गंडातिगंडयोःष
ट्शूलेपंचनवत्रोभनाः॥महेश्वरः॥चूडाकर्मन्नपानिषे
कनिलयाग्न्याधानपाणिग्रहान्देवस्थापनमौंजीबंध
नविधीन्कुर्यान्नयाम्यायने॥देवेज्यास्फुजितोस्तथास्त
मितयोर्वाल्येचवार्धकेतयोः॥केतावभ्युदितेतथाग्रहण
तोयावत्तिथ्याष्टमी॥देवेज्यःगुरुःआस्फुजितशुक्रःकेतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा ५२

निर्घातभूकंपविद्युत्स्तनितदर्शने॥ आधानं कृतकर्तव्यं सुधि
याभिस्तु भमिघृते॥ पश्चिमायां दिशि सितौ बालः स्याद्दशवास
रान्॥२६॥ पंचदिनान्प्राच्यां त्रिदिनं पक्षमेव च॥ त्रिशुद्धे जी ६२
वसितावुभयत्राप्युदीरितौ॥ अन्यैः पंचदशाहानि दशा
न्यैः सप्तचापरैः॥ उपरागनिवृत्तौ च यावत्स्याद्दिनसप्तकं॥
११ अग्न्याधेयं विवाहादिमंगलं न समाचरेदिति शब्दमालायां॥ ११
रात्रौ विलग्ने वुचरे घटे वा ते दंशके नाप्यथवा चरांशे॥
आधानकाले द्विजपुंगवानां जातोपि निर्वाणमुपैति वह्निः॥
विलग्ने लग्नपर्यायः अंबुचरे कर्के मीने मकरे राद्धे च॥ मेष ७२
कर्कट तुलामकराश्च चरलग्नानि घटे कुंभलग्ने॥ तदंश

१ स्थिते तदंशात्

के राशौ कुंभांशे च॥ शशांके चंद्रे च ररराशौ स्थिते कुंभराशि
स्थिते चेत्यर्थः॥ त्रिकोणकेंद्रापचयेषु सूर्ये ज्यहस्पतौ शीतक
रे कुजे च॥ शेषग्रहेषूपचयस्थितेषु भूमध्वजो सादनं
मामवंति॥ त्रिकोणं नवपंचकं लग्नं सप्तदशाम चतुर्थं च
केंद्रं तृतीयषष्ठदशमैकादशमुपचयः॥ कुजो मंगलः॥
चंद्रमसी स्त्रीऐश्वर्ये स्थैर्यसुगमस्तुमेति॥ क्षिप्रं वन्ह्याधाय
कः क्ष्मासुते च॥ भानौ सूनौ देवपूज्ये रवौ वा रोगैर्जुष्टो दुःख
तः स्याद्द्विजेंद्रः॥ नो कुर्यात् हुतभुक्त्योग्न्हमिन क्ष्मापुत्रजीवे
दुर्भिनी चस्थौ वर्तितरिपोर्भैधनगौ रत्तं गतैर्वा द्विजः॥ चा
पस्थे तनुगे गुरौ क्रियगते ससांबरस्थे कुजे शीतांशौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा धर

त्रिषडायगे दिनकरे वा स्यात्तदादीक्षितः ॥ पापग्रहेषु धनगेषु
धनेनहीनः सौम्यग्रहेषु धनवान्गुरुपेन्द्रः स्यात् ॥ लग्न
स्थिते च सबुधार्के जभार्गवेंदावुत्सादितोग्नि रचिरात्तव
लुनाशमेति ॥ चापस्थे धनराशिस्थिते ॥ तनुगे लग्नस्थे ॥
१२ क्रियगते मेषराशिस्थिते ॥ अंबरस्थे दशमस्थे ॥ आय
गे एकादशे ॥ कन्यायां मिथुने च मंगलः ॥ शोहगृहस्थः ॥
कन्यामिथुनतुलावृषेषु बृहस्पतिः शोहगृहस्थः ॥ रवि १२
मंगलशनैश्चराः पापग्रहाः क्षीणचंद्रश्च ॥ धनगेषु द्वि
तीयस्थेषु ॥ अथात्राधिकारी निरूप्यते ॥ ब्राह्मणाः क्षत्रि
या वैश्याः शूद्रं हित्वानुलोमजाः ॥ अधिकुर्वंगार्हे च सहभर्त्री
मि

स्त्रियस्तथा ॥ मासोर्ध्वं स्त्रीः ऋसूर्यास्या सुवसुर्दिनविंशतेः ॥
रजस्सु परतेस्नानदिनादूर्ध्वे रजस्वला ॥ नाधिकारोस्ति
मगध्रे २ सर्वेषां सूतकेषु च ॥ तथैव पतितानां च तथा दोषयुजाम
पि ॥ अग्न्याधानेधिकारोस्ति रथकारोस्ति र रथकारस्य चो
तेरे ॥ माहिष्येण करिण्यां तु रथकारः प्रजायते ॥ वैश्यायां
क्षत्रियाज्जातो माहिष्यो मुनिभिः स्मृतः ॥ जाता वैश्येन
शूद्रायां करणीत्यभिधीयते ॥ वेदाध्ययनसंपन्नाः श्रयो
गेन श्रुतेन च ॥ अधिकुर्वंति सर्वत्र यदार्थश्रवणं वि
ना ॥ यद्वाध्यायनवेदार्थविज्ञानरहितोपि सन् ॥ नाधि
कारी क्रियाशून्यो भर्ट यज्ञादिशासनात् ॥ द्राविडस्त्वन्यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.घ. धर

प्राह सर्वश्च येहितोपि सन्त्यधिक्रियां श्रद्धावांश्चेद्भवेत्क
र्तीने द६ ॥ चे सर्वसंमतं भार्या सतीह्याव सुस्ताभिः सर्वाभि
रन्विताः पश्चासवर्णया ज्यो च भार्ये येव समन्विते ॥ व्यभिचा
रवती पापा रोगिणी द्वेषिणी या च ॥ आधाने सा परित्याज्या
१३ न बाध्या ज्या समंतरा त ॥ तुल्याधिकार उभयोर्यज्ञपार्श्व
निरूपणात ॥ अतस्त्वन्यतराभावेनाधिकारोस्ति कुत्र १३
चित ॥ अथानधिकारिणः ॥ आवसथ्यं विवाहं च योगे प्रथ प्र४
मे स्थितः ॥ न कुर्याज्जनके ज्येष्ठ सोदरे चाप्रकुर्वति ॥
क्षेत्रजाद्यु [illegible] विघमानेपि सोदरे ॥ नाधिकार विधा
तोस्तिभिन्नोदर्येपि चौ [illegible] पंग्वंधमूकबधिरपतितो

गंकुस्तोचै

न्मादद्दूषणो ॥ सन्यस्ते छिन्नकर्णादो यद्वापंढादिदूषणो ॥ ज
नके सोदरे ज्येष्ठे कुर्यादेवेतर क्रियां ॥ ज्येष्ठे भ्रष्टे विही
ने च सत्याधेयं तदाग्रयो ॥ पितृस्त्वेष्वनुज्ञातो नादधीत
कदाचन ॥ जीवत्सित्तरिस्याद ध्यादाहिताग्निः स वै यदि ॥
तथैव भ्रातरि ज्येष्ठे यजेश्चैव विवाहयेत ॥ अनाहिताग्नो
पितरि यआधानं करोति हि ॥ अरण्योरग्निमारोप्य त
माध्याघ्योदधीत सः ॥ उद्वाहं चाग्निसंयोगं जे स्थिते परि
वेत्ता स विज्ञेयः परिवित्तिः स्तु पूर्वजः ॥ परिवि
त्तिः परिवेत्ता नरकं गच्छतो ध्रुवं ॥ अपि चीर्णप्रायश्चित्तौ
पादोनफलभागिनौ पि चौ [illegible] वियो सन्मः परनारीसुतोपिवा ॥
ध्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.दा दत्तकादयः परनारीसुताः॥ विवाहे चाग्निसंयोगेन दोषः॥ परिवे ५२
दने देशांतरस्थक्लीबैकवृषणान सहोदरात्॥ वेश्याभिषक्तं
श्च पतितान्शूद्रतुल्यातिरोगिणः॥ जडमूकांधबधि
रकुब्जवामनखंजभान्॥ अतिवृद्धानभार्यांश्च कृषि
१४ सक्तान्नृपस्य च॥ धनवृद्धिप्रसक्तांश्च कामतोकारिण
स्तथा॥ कुहिलोन्मादरोगांश्च परिविंदन्न दूष्यति॥ गी १४
तवादित्रनिरतान्नर्तकान्पारदारकान्॥ विविधानग्र
जांश्चैव परिविंदन्न दूष्यति॥ योगशास्त्राभियुक्ते च द्वि
जे प्रव्रजिते तथा॥ नास्ति वै चाग्निसंयोगेन दोषः परिवे
दने॥ परिवादनवाक्यं ये श्रूयंते दोषसंयुताः॥ तेषामप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकारोस्ति प्रायश्चित्तादनंतरं ॥ पिता पितामहो वापि नास्ति
कोवाप्यनाश्रमी ॥ यस्य दोषोस्ति नैवेह तस्याधाने कदाचन ॥
अग्रजेसति निर्दिष्टे यवीयानग्निमान्भवेत् ॥ भ्रातपर्वभ
वेत्तस्य ब्रह्महत्या न संशयः ॥ नाग्नयः परिविंदंति न वेदा न त
पांसि च ॥ न च श्राद्धं कनिष्ठस्य विरूपाया च कन्यका ॥ ज्येष्ठो
१८ भ्राता यदा तिष्ठेदाधानं नैव चाश्रयन् ॥ अनुज्ञातस्तु
कुर्वीत शंखस्य वचनं यथा ॥ ज्येष्ठभ्रात्रा त्वनुज्ञातः कु १८
र्यादग्निपरिग्रहं ॥ अनुज्ञातोपि सम्पित्रानादध्याम्मनु
रब्रवीत् ॥ धनवार्धुषिकं राजसेवकं कर्षकं तथा ॥ प्रो
षितं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥ प्रोषितश्चेत्रिवर्ष
स्यादब्दादूर्ध्वं समाचरेत् ॥ देशांतरस्थो नज्येष्ठो ज्ञायेता हि

तचाग्निरिति ॥ कनीयानधिकारी चेदादधीता विचारयन् ॥
द्वादशैव तु वर्षाणि जायान्यचर्मार्थयोगतः ॥ न्यायः प्रतीक्षि
ता भ्राता श्रूयमाणः पुनः पुनः ॥ प्रोषिते तु यदा ज्येष्ठे ज्ञा
येतानाहिताग्निकः ॥ षड्वत्सरान्प्रतीक्षेत आदधीतानुजं
स्तथा ॥ पितरि प्रेते भावे वा देशांतरगतेपि सन् ॥ अधि
कार विघातो हि न पुत्रस्योपजायते ॥ सोदराणां च सर्व
वेषां परिवेत्ता कथं भवेत् ॥ दारैस्तु परिविद्यंते नाग्निहो
त्रेण नेज्यया दिति ॥ अग्न्याहरणार्थं योनिमाह ॥ वैश्यस्य
बहु पशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वम
रणिप्रदानमेके पंचमहायज्ञाहुतिमुते: ॥ पशुभिः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह्यस्य वैश्यस्य गृहादग्निं हृतोऽ ॥ छं असंस्कृते वा अग्न्या
धानं कुर्यात् ॥ एवं अरण्यप्रदानं अरण्युपादानमिति छं
ति ॥ अयमर्थः ॥ प्रशब्दो वेउपशब्दार्थे ॥ अरणिप्रदानमु
पादानकारणं उसात्तस्थानं यस्याभेसो रणिप्रदानात्त
मग्निमादधीतेति मन्यते ॥ अतो विकल्पः ॥ अत्राचार्यमर रवा
१६ लेबहुपशुविद्कुलांबरीषबहुयाजिनामन्यतमं तस्मा
दग्निमिंधीतेति ॥ छंदोगपरिशिष्टे वैश्यकुलाद्वांबरी १६
षाद्वाग्निमाहृत्याभ्यादध्यादपि वा बहुयाजिन एवाग्ना
राद्ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्यापि वाभ्यंमाधेतो
स्यादध्यात्पुण्यस्त्वोन धूमो भवतीति यथा कामयेतेत

था कुर्यात्स एवास्य गृह्योग्निर्भवतीति ॥ तथा गृह्यांतरं छं
दोगभाष्ये ॥ ब्राह्मणकुलात्तु ब्रह्मवर्चसकामोग्निमाह
त्यादधीत ॥ राजन्यादोजो वीर्यकामो वैश्यस्यात्पशुका
मोंबरीषात् ॥ धनधान्यकाम आहरणे यमुरु पुण्यको
रा काम इति ॥ तथा च छंदोगभाष्ये ॥ शाखांतर गृह्ये ॥
पूर्वे यानुगते ग्नौ योनिः पुनराधेय चेति वैश्यगृहाग्न्य
भावे शाखांतरीयाः कौयोनेरग्न्याहरणमिति हरिहरः ॥
अस्मत्सूत्रोपरि तु वैश्यगृहादग्न्याहरणं वारण्योरिति
युक्तं ॥ न तु वैश्याभावे गृह्यांतरोक्तायाः योनेराहरणं ॥
गृह्यांतरयोन्यपेक्षया वरं विकल्पेन स्वगृह्योक्तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिर्च्याघेतिनमोहरिहरमिश्रेभ्यः॥यस्मिन्पक्षे वैश्यगरहद
ग्न्याहरणं तस्मिन्पक्षे यावज्जीवं वैश्यस्तन्निधौ निवासः श्रौ
ते अग्नौ वैश्यकुलादाहृत्य सर्वप्रायश्चित्तं धृत्वानेन विधि
नायावज्जीवं वर्तयेदिति गर्गपद्धतौ॥ चतुश्चात्र्यपंचनं यस्मि चभ
न्कर्मणि विधीयते तेन तद्दिहापि सर्वं भवति॥ श्रुतः पंचमहायज्ञा
१७ इति श्रुतेः॥ पंचमहायज्ञानां श्रुतौ पाठस्तत्साधनभूतेयम १७
मग्निरतस्तद्दिहापि सर्वं भवतीति पूर्वपक्षः॥ सिद्धांत
सूत्रं॥ चातुश्चात्र्यपचनवतीति कर्तव्यता न भवतीति य
कोरणं॥ उपदेशातिदेशयोरन्यतरेण धर्माणां प्रवृत्तिः॥ ८।२
नात्रोपदेशो नातिदेशः॥ तस्मान्नैव चातुश्चात्र्यपचन

वतीतिकर्तव्यता प्रवर्तते॥ ननु तर्हि किमर्थमिदमुक्तं॥
आधानसामान्याद्दाक्षौतानां पंचमहायज्ञानां साधन
भूताद्दाक्षौताधानकर्मास्त्विति बुद्धिः स्यात्तां निराकर्तु
मिदमुक्तमित्यदोषः॥ गृह्यांतरे चाग्न्याधेयेवमांसाश्रौता
धानेतिकर्तव्यता उक्तास्ति तां निवारयितुमिह सूत्रकृ
छूतः तः पूर्वपक्षः अरणीलक्षणं चोक्तं यज्ञपार्श्वसंग्रहकारि
कायां॥ अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः॥ त
स्य या प्राङ्मुखी शाखा चोदीची चोर्ध्वगापि वा॥ अरणीत
न्मयी ज्ञेया तन्मय्येवोत्तरारणिः॥ सारवद्दारवं चात्र मो
विली च प्रशस्यते॥ संसक्तमूलो यः शाम्यो स शमीगर्भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.दा ५८

उच्यते॥ अलाभे सर्वशामीगर्भादाहरेद विलंबितः॥ चतुर्विं
शांगुला दीर्घा विस्तरेण षडंगुला॥ चतुरंगुल मुत्सेधा
अरणिर्याज्ञिकैः स्मृताः॥ मूलादष्टांगुलांत्यक्त्वा अग्राश्च
द्वादशांगुलं॥ अंतरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः॥
मूर्धाक्षि कर्ण वक्त्राणि कंधरा चापि पंचमी॥ अंगुष्ठमात्रा ५५
१८ न्येतानि द्व्यंगुलं वक्त्र उच्यते॥ अंगुलं मात्रं हृदयं अं १८
गुष्ठमुदरं तथा॥ एकांगुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गु
ह्यकं॥ ऊरू जंघे च पादौ च चतुस्त्र्येकै यथाक्रमं॥ अर
ण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः॥ यत्तद्गुह्यमिति
प्रोक्तं देवयोनिः स उच्यते॥ तस्यां यो जायते वह्निः स क

ल्याणकृदुच्यते॥ प्रथमे मंथने ह्येष नियमो नेतरेषु च॥ अष्टांगु
म लः प्रमंथः स्याच्चात्रं स्याद्द्वादशांगुलं॥ ओविली द्वादशी वस्या दे
तन्मंथनयंत्रकं॥ गोवालैः शणसंमिश्रैस्त्रिवृद्वृत्तमनंशुकं॥
व्यामप्रमाणं नेत्रं स्यात्तेन मंथ्यो हुताशनः॥ चात्र बुधेः प्रमं
थायं गाढं द्रवाविचक्षणः॥ बहुद्रनेमं थनेन त्वमंथनात्रोत
त्रैवोत्तं॥ उत्तरारा अभावाद्धिम्रा वोमं थो धराररणेः॥ यारव्या
तं कैश्चिद्देवं तन्निर्मूलं वा दुपेक्षते॥ मानप्रकाशे यज्ञपार्श्वेऽ
शीरश्चक्षुः कर्णमास्यं प्रथमे ज्ञो प्रकीर्तितं॥ द्वितीये कंधरव
राहृत्तीर्विज्ञेयेत्युदरं स्मृतं चतुर्थे चैव योनिः स्याद्गुरूद्धं
द्वं च पंचमे॥ षष्ठे जंघे तथा पादौ पूर्णा चारणिरंगतः॥ यदि मु
चेच्छिरस्याग्निं शिरोरोगे भ्रमीयते॥ यजमानस्तथा कंठेद्यंसे

।।८।

५२

चैवविशेषतः॥ मथे घोयजमानस्तु पत्नी हीनोभवे ध्रुवं॥ योमं
थसुदरं कर्ता त्तु धयाम्रियतेतु सः॥ देवयोन्यां तु योमंथे देवसि
द्धिः प्रजायते॥ मंथे दुरूढ येयस्तु राष्ट्र संकर्म तस्य तत्॥ जं
घायांयातु धानेभ्यः पादयोः स्यात्सिशाचके॥ प्रथमे मंथने
ज्ञेयं द्वितीया दौनलोधयेत्॥ अष्टांगुलप्रमंथः स्याद्दीर्घो
घ्यंगुलविस्तृतः॥ उत्सेधो घ्यंगुलस्तस्य तैश्चानपूर्वगुर्धगः॥
१२ एवमष्टादशप्रोक्ताः प्रमंथाघुत्तरारणे॥ पादौ तेस्याः स्मृ १२
तं मूलं अग्रस्तु शिर उच्यते॥ अध्वर्युः प्राङ्मुखो मंथे प्रत्य
ङ्मुखस्त्वनाहिता॥ ओवलीयजमानेन ध्रुवागादं च मंथये
त्॥ तमभ्रीयात्प्रथमं पत्नीयं घाकश्च घहो द्विजः॥ मूलाद
ष्टांगुलं सक्त्वा अग्रा च द्वादशांगुलं॥ अंतरादेवयोनिः स्यात्

श्री

त्त्रमथ्योहुताशनः॥ मूलादंगुलमुत्सृज्य अग्रात्सा गुलं
तथा॥ योनिमध्ये पुनर्मानं इरत्या मथ्योहुताशनः॥ नान्यद्द
क्षेन मंथीयान्न कुर्याद्योनिसंकरं॥ कुंदितास्फाटिता चैव
सुषिरा ग्रंथिमस्तका॥ चतुर्विधारणिस्सा ज्याश्रेयस्का
मैर्द्विजातिभिः॥ कुंदिता हरते पुत्रान्स्फाटिता शोक
माहरेत्॥ ग्रंथिमूर्द्धा हरेत्पत्नीं सुषिरा पतिमारिणी॥ १
४७ इति श्रौतस्मार्ताधानेऽरणिलक्षणं॥ इतरेषु च संस्कारे
ष्वरणी द्वादशांगुला॥ मूलात्त्रिभागजानं [illegible] दर्द्धनो
त्तरारणिः॥ वक्ष्ये जातारणेः पश्चात्कुमारस्याग्नेः प्रसिद्ध
ये॥ निर्मीयमंत्राविहितं पिता संस्थाप्य यत्नतः॥ जाते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमारेमभीयादग्निर्यथाविधिस्वयं ॥ आयुष्यहोमान्जुहुया
तस्मिन्नग्नौसमाहितः ॥ तत्रोभेप्राशनं चौलंमौंजीबंध
नमेव च ॥ एतादेवमप्य तथ्यस्तस्मिन्गोदानिकाः क्रियाः ॥
कुर्याद्वैवाहिकोहोमो वह्नौतस्मिन्समाहितः ॥ शालाग्निक
२८ र्मतत्रैवकुर्यात्संततिं च नैसर्गी ॥ निसर्गोमंपंचयज्ञान्कु
र्यात्तस्मिन्ननाहितः ॥ स्मार्तसंस्थादिकं यच्च तत्सर्वं तत्र २०
घ तइति ॥ जातारणिपक्षस्तु पुमांतरे भवति ॥ नेफलौ
प्रजार्थं तु द्विजाग्र्याणां प्र आरणिपरिग्रह इति फलिवर्ज्य
त्वात् ॥ दानवाचनान्वारंभणवरवरणव्रतप्रमाणेषु य
जमानं प्रतियातिपरिभाषितत्वात् ॥ याजमानमंगुलादि

मानं याह्यं ॥ अंगुष्ठांगुलिमानं तु यत्र यत्रोपदिश्यते ॥ तत्र
तत्र बृहत्पर्वग्रंथिभिर्मिनुयात्सदेति छंदोगपरिशिष्टं ॥
बृहत्पर्वणिमध्यपर्वणीति मूलग्रंथयोयत्रांगुष्ठनोदना त
त्रांगुष्ठस्य ॥ अंगुलिनोदनायामंगुलीनां ॥ छंदोगानां स्वपरि
शिष्टोक्तत्वात् ॥ अंगुष्ठैररणिमानं ॥ वाजिनां तु यज्ञपार्श्वो
दंगुलीरिति ॥ तत्रोक्तपक्षस्तु यजमानेनोर्ध्वबाहुः ॥ प्रप
५४ देच्छ्रितेसंस्थितेनवेति ॥ पंचारत्निर्दशावितस्तिर्विंशतिरा
तांगुलः ॥ पुरुष इति सूत्राभ्यां पुरुषस्य पंचमांशोरत्निः
तत्र तु विंशोंगुल इति रामवाजपेयिमिश्राधानप्रकर
णोक्तं ॥ अथात्रपात्रलक्षणमुच्यते ॥ तत्र यज्ञपार्श्वे सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा

महकारिकायां॥खादिरोस्यादृतिर्यग्गोरत्निमात्रंप्रशस्यते॥आ ४२
सनंब्रह्मणःकार्यंधारणंयाविकंकृतं॥हस्तमात्रंचतुस्त्रिकि
मूलदंडसमन्वितं॥द्विषड्गुलसंख्याकोमूलदंडोविकंकतः॥
प्रस्तमात्रोदकयाहिप्रणीताचमसोभवेत्॥वैकंकतंपाणि
मात्रंप्रोक्षणीपात्रमुच्यते॥हंसमुखप्रसेकंचत्वग्बिलंच
२१ तुरंगुलं॥आज्यस्थालीतुकर्तव्यातैजसद्रव्यसंभवा॥
माहेयीवापिकर्तव्यानित्यंसर्वाग्निकर्मसु॥आज्यस्थाल्याः २१
प्रमाणंतद्यथाकाम्यंतुकारयेत्॥मृण्मय्योदुंबरीवापिच
रुस्थालीप्रशस्यते॥तिर्यगूर्ध्वंसमित्मात्रदृढानातिबृहन्मु
खी॥कुलालचक्रघटितमासुरंमृन्मयंस्मृतं॥तदेवहस्त

पिंडप्राईखचसत्याया॥ रव
घटितंस्थाल्यादिदैविकं॥यज्ञवास्तुनिमृष्टौचस्तंबेदर्भव
दौतथा॥दर्भसंख्यानविहितावि‍ष्टरास्तरणेषुच॥अंगु
ष्ठपर्वदृत्तेश्चारत्निमात्रस्त्रुवोभवेत्॥पुष्कराधंभवेत्तथा
तंपिंडकार्धमुष्ट्यर्धमित्यपि॥यावदन्नेनभोक्तुस्तुतृप्ति
पूर्णेवजायते॥तंवरार्थमितःकुर्यात्पूर्णपात्रमितिस्थि
तिः॥यवैर्वाब्रीहिभिःपूर्णंभवेत्पूर्णपात्रकं॥वरोमिल
षितंद्रव्यंसारभूतंतदुच्यते॥अष्टमुष्टिभवेत्किंचिद्
द्वेचपुष्कलं॥पुष्कलानिचचत्वारिपूर्णपात्रंविधीयते॥
इत्याधानपात्राणि॥अन्यान्ययज्ञेवलिख्यंते॥शूर्पंत्व
रत्निमात्रंस्याद्वैषिकंवैणवंतुवा॥लंबंस्वरत्निमात्रंस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा खादिरं मुखकं ग्रोक्तं मरादि गयासमिन्वा॥२

दुपला च दृष तथा॥ विस्तारो हृष दः शो कोष दष्टांगुलसंस्थ धर
या॥ पालाशो जानु पात्रं स्यात्पुष्टबुध्रमुलूखलं॥ अर्धखा
तं वह हच्कंम ध्येरात्रासमन्वितं॥ आदेवामात्रं विज्ञेयं मेघे
षांतु विकंकतं॥ रत्नमंपुष्ठ पर्वाणमवदानक्रियाक्षमं॥
अहृच्ये व भवे द्वर्वीविशेष स्तमहं ध्रुवे॥ वारण्य रत्निमात्रा
२२ स्यात्तूर्यीश्राधिकपुष्करा॥ हस्ताकारा च रथ्व यो अग्रे २२
सर्पफणा कृतिः॥ आयकर्षफलं वं हस्तमात्रं स्याद्धनुरा
कृतिः॥ अग्रे सर्पफणाकारं खादिरं वाथि कंकतं॥ कंकता
निखिदंतीनि वारणानि भवंति हि॥ वारण्यरत्निमात्रा स्या
दभ्रिश्रासं दष्टांगुले॥ दात्रिंशदंगुला चाम्या वारणीस्य

४ वापि कुर्याच्चैव यथार्थतः॥ ४

तिधीयते॥ श्रैपर्णी परिधीं कुर्यात् बाहुमात्रानपुष्करान्॥
श्रीपर्णी हस्तमात्रे च यस्य पर्ण्यो मूलमेव च॥ तच्छूलं यस्य च
स्यापि याज्ञिय स्पतरो भवेत्॥ लौही वाम्नमयी वोस्या सम्भु
खाच्च यथार्थतः॥ लौही ताम्रमयी पात्राणि वारणान्यत्र
यानि ब्रो कान्यसंभवे॥ वैकंकतानि कार्याणि सूत्रांतरम
तादपि॥ अभावे मुख्य वृक्षस्य याज्ञियस्य तरोरिह॥ यत्किं
चिसात्र जातं तदिति भास्कर संमतिः॥ अन्वयस्या
रणिदो ग्रानाम्यस्मादेव रहेततः॥ एवं सर्वे पुराश्च पुह
ह्य सूत्रांतरे षपि॥ अग्न्याधेयदेवतो स्यास्थाली पाक
ं श्रपयित्वाज्य भागा विष्ण्वाज्याहुती जुहोति सन्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.द. अग्नेसतन्नो अग्नइममेवरुणतत्वायामि येतेशतमयाश्चा ५२
मन्नउदुत्तमंभवतन्नउयवो॥ औतस्याग्न्याधेयदेवताः॥
अग्निः पवमानोग्निः पावकोग्निः शुचिरदितिश्रौति॥
आग्रयस्थालीपाकं ओदनउत्तप्रकारेणश्रपयित्वा॥
आज्यभागौहुत्वा त्वन्नोअग्नइत्याद्यष्टभिराज्येनाहु
२२ तयोहोतव्याः॥ अत्र चरुर्व्रीहीणां भवति॥ श्यामादिजौ २२
नेन्यत्रापिव्रीहियवयोरेवान्यतरं स्थालीपाकं श्र
पयेत्॥ नपूर्वचोदितत्वात्संदेहासंभवादिनि वृत्तिरि
तिसीतायज्ञेयवस्यमाणन्यायात्॥ अयमर्थः सूत्रस्य॥
श्यामादिष्वायायाअन्यत्रपश्वादिषुयागंकुर्वन्व्रीहियवयो

रन्यतरं चरुं श्रपयेत्॥ नैवात्रसंदेहः॥ व्रीहीन्यवान्वाहविषी
तिपूर्वचोदितत्वात्॥ उक्तत्वात्॥ यावस्यचेदोरसंभवाद्विनि
वृत्तिः॥ पूर्वचोदितस्यव्रीहीन्यवान्वेत्यस्य॥ अनवस्थावि
तांतरंतरूपपक्षेइष्टदसिद्धेतंदुलपाकेचरुशब्दप्रसि
द्धेः॥ आग्रयणेष्टौव्रीहीणांयवानांचेतिसूत्रेण॥ अ॥
व्रीहीन्यवान्वाहविषीतिपरिभाषणादग्रपाकस्येसेताव
सुक्तेपिव्रीहीणांयवानामग्रपाकस्येतिसिध्यति॥ किम
र्थं व्रीहीणांयवानामितिग्रहणंउच्यते॥ वैश्वदेवश्चरु
र्विहितः॥ सोपियाथायथास्यादितियवानामित्युक्तं॥ व्री
हीग्रहणंतुयवानामेवनियमोमाभूदिति॥ अतःसर्वत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा.दा. व्रीहीणामेव चरुः कार्य इति गम्यते ॥ अपयित्वेति ग्रहणं सिद्धि ४९
पत्ते रुपादाननिरस्यर्थं ॥ आघारावाज्यभागावित्यनेन
प्राप्तत्वात्पुनराज्यभागग्रहणं अष्टाज्याहुतीनामेवसर
विधानार्थं ॥ अष्टाविति ग्रहणं मंत्रप्रतीकसंशयनिराक
रणार्थं ॥ यद्यष्टसंख्याग्रहणं न क्रियते तर्हि त्वन्नो अग्ने
२५ नयेति द्वितीयं शाकेत्तेपास त्वन्नो स इत्याद्येति ॥ त्वन्नो सम् २५
अग्न इति प्रथमा ॥ स त्वन्नो अग्न इति द्वितीया ॥ इमम्मे
वरुणेति तृतीया ॥ तत्त्वायामीति चतुर्थी ॥ येते शतमिति
पंचमी ॥ अयाश्चाग्न इति षष्ठी ॥ उदुत्तमममिति सप्तमी ॥
भवतन्नस्समनसौ पुरस्तादेवमुपरिष्टात्स्थालीपाकस्या

ग्न्याधेयदेवताभ्यो हुत्वा जुहोति ॥ अग्न्याधेयदेवता
भ्य इत्येव वाच्यं ॥ अग्न्याधेयदेवताभ्यो हुत्वेति वक्ष्यमाण
त्वात् ॥ वाच्यं वा ॥ अग्न्याधेये हि विकल्पेन द्वयोरपि देवता
स्य त्वेमस्ति तयोर्देवतां मा भूत् ॥ किंतु बहुत्व विशिष्टा नाम
त्रेदेवतात्वं यथा स्यादित्युपदेशः ॥ स्थालीपाकस्येति सर्वत्र
षष्ठी ॥ पुरस्तात्स्थालीपाकस्य स्थालीपाकात्पूर्वम
ष्टर्चहोमः ॥ अग्न्याधेयदेवताभ्यो हुत्वा एवमुपरिष्टादष्ट
ष्टर्चहोमः ॥ स्विष्टकृते चायास्याग्ने वर्षिष्ठकृते यत्कर्मणा
त्यरीरिचं देवा गातुविद इति ॥ उपरितनाते अष्टर्चहोमा
त्स्थालीपाकस्याग्नये स्विष्टकृते स्वाहेत्याहुतिं जुहोति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह ५८

चरुश्राद्धदान्येन अयाश्चाग्न इतिमंत्रेणाहुतिं जुहुयात ॥ स्विष्ट
होमस्य प्रासक्तात्पुनर्लक्षणम याश्चाग्न इति होमस्यावसरवि
धानार्थं मंत्रस्यायमर्थः ॥ हे देवागातुविदो मनसो बेत्तारो देवाः ॥
अग्नेः संबंधियद्दष्टव्यस्तं हुतं यत्र येन कर्मणा यजनविधिना
२५ हृत्वा अहमत्यरीरिचं अधिकं कृतवानस्मीति कर्मणा प्रस
न्नानां भवतां प्रसादात् तदयास्सि अनथ्वरमथ्याहृतमस्तु ॥ २५
वा किंकुर्वाम भाति ॥ परिस्तरणबर्हिर्हिंस्तोने वहुत्वाय त्रांतरस्था
पितहोमशेषाद्रव्यं भक्षयति ॥ प्राशानस्य प्रासक्तात् ॥ बर्हिर्हि
स्तोमो तरति धानार्थं प्रहरणं ॥ शेषरक्षणं भक्षणं च श्रौतसू
त्रे ऽक्तमस्ति ॥ पाकयज्ञे ध्रुवत्तस्या सर्वहोमोहुतो शेषप्राशनमि
ति ॥ अस्यार्थः ॥ पाकशब्देन चस्मार्तहोमाः ऽ य्यंते ॥ तत्र होमा

र्थं यद्द्रव्यं गृहीतं तस्यायं सर्वहोमः कर्तव्यः ॥ स्त्रुवादिस्त्रियं गृ
हीतं तद्धुतात्किंचित्प्रारिशिष्यपात्रांतरे स्थापनमित्यर्थः ॥
सर्वहोमान्हुत्वा पात्रांतरस्थापितसर्वशेषाणां [illegible] बर्हि
स्तोमस्याथैववचनाभान्य कर्मसु ॥ बर्हिहोमे प्रजापति दे
वता अनिरुक्तत्वात् तत्प्राचालिंगं ॥ अनिरुक्तो वै प्रजा
पतिरिति ॥ आज्यद्रव्यमनादेशे जुहोति श्रुविधीयते ॥ मं
त्रस्य देवताश्चैव प्रजापतिरिति स्मृतिरिति छंदोगप
रिशिष्टे कात्यायनोक्तेश्च ॥ ततो ब्राह्मणभोजनं ॥ तत्रइ
ति सूत्रादेव ज्ञायते भोजनं पवित्रप्रतिपत्तिः ॥ प्रणीता
विमोकः ॥ दक्षिणादानं च कृत्वा ब्राह्मणभोजनं ॥ एकं द्वि बहुषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.हा ५२

समासस्य तुल्यत्वादेकस्मिन्नपि च परितार्थत्वादेकस्यैव भो
जनमिति ॥ यत्र बहूनां भोजनं तत्र स्वयमेवोपदिशति ॥ य
थासंस्थिते कर्मणि ब्राह्मणान्भोजयेदिति ॥ तत्रैव स्वयं तरे
केत्रयोविंशति ब्राह्मणभोजनमिति तिलहरिहरपद्धतौ ॥ चतु
स्त्रिंशद्भोजनमिति रेणुकदीक्षिताः ॥ यज्ञपार्श्वे तु विशेषः ॥
२६ गर्भाधानादिसंस्कारे ब्राह्मणान्भोजयेद्दश ॥ शतं विवाह २६
संस्कारे पंचाशन्मेखलाविधौ ॥ आवसथ्येत्रयस्त्रिंशा
च्छ्रौताधाने शतात्परं ॥ अष्टकं भोजयेद्व्यातं तु संस्का
रसिद्धये ॥ सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पत्नौ ॥ चा
तुर्मास्येतु चत्वारि तानि पंचसु रायहे ॥ अयुतं वाजपेये तु
शतं

अश्वमेधे च तुर्गुणं ॥ आग्रयणे प्रायश्चित्ते ब्राह्मणान्दश
पंच चेति ॥ अत्रैव व्यवस्था ॥ यत्र ततो ब्राह्मणभोजनं इति
सूत्रमस्ति तत्रैकं पूर्वं भोजयित्वा यज्ञपार्श्वोक्तब्राह्मणभोज
नं ॥ यत्र विवाहादौ सूत्रं नास्ति तत्र कर्मांतरे परिशिष्टोक्तमे
व भोजनं ॥ ॥ इति श्रीवीसंभाट्टसुपतिगदाधरविरचिते गृह्य
सूत्रभाष्ये प्रथमकांडे द्वितीयकंडिका ॥२॥ आवसथ्याधाने
ले पदार्थक्रमः ॥ तच्चतुर्थ्युत्तरकालेऽभ्यामतः आह्मतस्तु धन ८
विभागकालोर्ध्वे तेन कादशोहनि प्रागेवैकादशाच्चाक   दा
दशोहनि वा माहपूर्वाऽभ्युदयिकरहितं ज्येष्ठः कुर्यात् ॥ काला
तिक्रमे तु प्रायश्चित्तं द्रव्यामाधादि पंचसु श्रावणे आश्विने वा
कार्यं ॥ तत्र पूर्वं वपनं कृत्वा अतिक्रांतसंवत्सरसंख्यया ॥ बा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं   ५२

जापसरूपं प्रायश्चित्तं मुख्यविधिनाचरेत् ॥ तदशक्तौ प्रति
प्राजापत्यं गां दद्यात् ॥ तदभावे तन्मूल्यं निष्कमेकं धर्मं तदर्धं
दद्यात् ॥ तदभावे प्रतिप्राजापत्यं द्वादशब्राह्मणभोजनं ॥
अयुतगायत्रीजपं गायत्र्याति तिलाज्यसहस्र होमं वा
शक्त्यपेक्षया कुर्यात् ॥ तत्रैव संकल्पः ॥ आधानकरणज
नितदोषनाशनार्थं वर्षसंख्याकान्कृच्छ्रानहमाचरिष्ये ॥
२७५ अब्दाप्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां २७
गां ब्राह्मणेभ्योऽहं संप्रददे ॥ अथवा एतावतीनां गवां मूल्यमि
दं संप्रददे ॥ ब्राह्मणान्भोजयिष्ये ॥ एवमन्येपि संकल्पः ॥ त
तः सायंप्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपरिमितं अ
तिक्रांतदिवसानां गणयित्वा ब्राह्मणेभ्यो दद्यात् ॥ तन्मानं

कारिकायां ॥ षष्टिप्रस्थमितं धान्यं त्रिप्रस्थप्रमितं घृतं इति
संवत्सरस्योक्तं ॥ प्रस्थस्तिद्वितयं मानं प्रस्थमानं चतुष्टय
मिति च ॥ तत्र संकल्पः ॥ होमाकरणजनितप्रत्यवायपरिहारा मि २
र्थं एतावद्वार्षिकं दधियवतंदुलानामन्यतमं ब्राह्मणेभ्योऽहं
संप्रददे ॥ तन्मूल्यं वा दद्यात् ॥ इतरस्य पक्षाद्यादिकर्मद्रव्य
दानव्यावृत्तिः ॥ होम्यं दद्यादिति वचनादिति रामवाजपेयि
नः ॥ हरिहरस्य ॥ गंगाधरस्तु सायंप्रातर्होमपक्षादिकर्म
पिंडपितृयज्ञाद्यनुसंधानार्थं साधनभूतं होमद्रव्यमिति
लिखितवान् ॥ ततो यथोक्तकाले पूर्वाह्णे वैश्वदेवं कृत्वा ग
णपतिं पूजयित्वा पुण्याहवाचनं कुर्यात् ॥ तत्र कर्तव्यं त
दुच्यते ॥ व्यासः ॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ.दा ५२

धर्मकर्माणि मांगल्ये संग्रामे द्भुतदर्शने ॥ ग्रहपरिक्लिष्टे ॥
अथ स्वस्तिवाचनमृद्धिपूर्तेषु ऋद्धिर्विवाहांतो ऽपरसं
स्काराः ॥ प्रतिष्ठोद्यापनेपूर्तं तत्कर्मणाद्यादौ च तयोः कुर्या
दिति ॥ आश्वलायनस्मार्तः ॥ वैदिके तांत्रिके चादौ ततः पु
ण्याहइष्यते ॥ शौनकः पुण्याहवाचनविधिं वक्ष्यामो यथा
२८ विधि ॥ प्रयोक्तुः कर्मणामादावंते चोदयसिद्धसिद्धय इति २८
त अप्रयोगांतर्गतमिति केचित ॥ वस्तुतस्तु प्रयोगबहि
र्भूतमिति ॥ आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा कार्यं द्विती
ये तु तत्तत्कर्मसंकल्पः ॥ अथ प्रयोगः ॥ हेमाद्रौ दानखंडे ब
ह्वृचगृह्यपरिशिष्टे नोक्तः ॥ सकलसाधारणमिदमाचा
रप्राप्तश्च पुण्याहवाचनप्रयोगः ॥ कृतमंगलस्नातः ॥ स्व

लंकृतः कृताचमनः प्राङ्मुखो यजमानः वस्त्राच्छादिते पीठे उ
पविश्य पत्नीं च स्वदक्षिणतः ॥ प्राङ्मुखीमुपविश्य संस्कार्यं
च तयोः पश्चादुपवेशय ॥ ॥ ॐ सुमुखश्चैकदंतश्चेत्यादि शुक्लांब
रधरं देवं अभिप्सीतार्थ सर्वमंगलमांगल्ये सर्वदा सर्वका
र्येषु सर्वेषु कालेषु समस्तदेवेषु ॥ तदेव लग्नं ॥ यत्रयोगे
श्वरः कृष्णः सर्वेषारंभकार्येषु ॥ इति श्लोकान्पठित्वा ॥
ॐ लक्ष्मीनारायणाभ्यां नमः ॥ ॐ उमामहेश्वराभ्यां नमः ॥
ॐ वाचीपुरंदराभ्यां नमः ॥ ॐ मातापितृभ्यां नमः ॥ ॐ इ
ष्टदेवताभ्यो नमः ॥ ॐ कुलदेवताभ्यो नमः ॥ ॐ सर्वेभ्यो ब्रा
ह्मणेभ्यो नमः ॥ आचम्य प्राणायामो कृत्वा ॥ देशकालौ संकीर्त्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमुकफलसिध्यर्थं श्वो घवा अमुककर्माहं करिष्ये ॥ त
दंगतयादौ पुण्याहवाचनादि करिष्ये ॥ इति संकल्पयेत् ॥
यदा तु प्रयोगाद्बहिर्भूपुण्याहवाचनाद्यंगं तदामुकफलसि
ध्यर्थं अमुककर्म कर्तुं मंगलभूतमादौ पुण्याहवाचना
दि करिष्ये ॥ इति प्रत्येकं संकल्पः ॥ प्रधानसंकल्पस्तु सर्वं
हृत्वा तद्दिने श्वो वा कार्यः ॥ ततः कर्ता स्वपुरतः मही द्यौः पृ २९
थिवी च न इति भूमिं स्पृष्ट्वा ॥ ओषधयः समिति तंदुलपुं
जं धृत्वा ॥ आजिघ्र कलशमिति पुंजोपरि सलक्षणे धा
तुमयं मृन्मयं वा कलशं निधाय ॥ इमम्मे वरुणेति तीर्थ
जलेन पूरयित्वा ॥ गंधद्वारामिति गंधं कलशे प्रक्षिप्य ॥

चंदनादिना तं अनुलिप्य ॥ या ओषधीरिति सर्वौषधीः ॥
ओषधयः समिति यवान् ॥ कांडात्कांडादिति दूर्वा ॥ अ
श्वत्थे व इति पंचपल्लवान् ॥ स्योना पृथिवीति पंच सप्त
वा मृदः ॥ याः फलिनीरिति फलं ॥ परिवाजपतिरिति
पंचरत्नानि ॥ हिरण्यगर्भ इति हिरण्यं ॥ युवा सुवा
सा इति वस्त्रेण रक्तसूत्रेण वेष्टयेत् ॥ पूर्णा दर्वीति
धान्यपूर्णं फलसहितं पात्रमुपरि निदध्यात् ॥ त
त्वायामीति कलशे वरुणमावाहयेत् ॥ चंदनादिना
पूजयेच्च ॥ ततः कलशे देवता आवाहयेत् ॥ कलशस्य
मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदा ब्रह्माम ध्येमाहमणा: स्म ता:॥ कुक्षौतुसागरा:सप्त ५२
सप्तद्वीपावसुंधरा॥ ऋग्वेदो थयजुर्वेद:सामवेदो
ह्यथर्वण:॥ अंगैश्चसहिता:सर्वेकलशंतुसमाश्रि
ता:॥ अत्रगायत्रीसावित्रीशांतिपुष्टिकरीतथा॥
आयांतुममशांत्यर्थं दुरितक्षयकारका:॥ सर्वेस
३० मुद्रा:सरितस्तीर्थानि जलदानदा:॥ यांआतु॥ ३० २९
इति॥ तत:कलशप्रार्थना॥ देवदानवसंवादेमथ्य
मानेमहोदधौ॥ उत्पन्नोसितदाकुंभविधृतोविष्णु
नास्वयं॥ त्वत्तोयेसर्वतीर्थानिदेवा:सर्वेत्वयिस्थिता:॥
त्वयितिष्टंतिभूतानित्वयिप्राणा:प्रतिष्ठिता:॥ त्वा
ममशांत्यर्थंदुरितक्षयकारका:॥

व:स्वयंत्वमेवासिविष्णुस्त्वंचप्रजापति:॥ आदित्यावसवोरुद्राविश्वे
श्वेदेवा:सपैत्रका:॥ त्वयितिष्टंतिसर्वेपियत:कामफलप्रदा:॥
त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥ सान्निध्यंकुरु
देवेशप्रसन्नोभवसर्वदा॥ अेवनिरस्तजानुमंडल:क
मलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणि
नासुवर्णपूर्णकलशंधारयित्वा॥ आशिष:प्रार्थयेत्॥ धा
प्रा र्थनामाह॥ कृता:आशिष:संतु॥ दीर्घानागानघोगि
रयस्त्रीणिविष्णुपदानिच॥ तेनायु:प्रमाणेनपुण्यंपुण्या
हंदीर्घमायुरस्तु॥ शिवाआप:संतु॥ सौमनस्यमस्तु॥ अ
क्षतंचारिष्टंचास्तु॥ गंधा:पांतुसुमंगल्यंचास्तु॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ तांबूलानि मि
पांतु ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु बहुदेयं चा॰ स्तु ॥ दीर्घमा
युः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं
चायुष्यं चास्तु ॥ अत्र सर्वत्र ब्राह्मणैरस्त्विति प्रत्युत्तरं देयं ॥
यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभ
२१ नाः प्रवर्तंते ॥ तमहमोंकारमादिं कृत्वा ॥ ऋग्यजुः सामा ३१
शीर्वचनं बहु ऋषिमतसंविज्ञातं भवद्भिरनुज्ञातं पुण्यं
पुण्याहं वाचयिष्ये ॥ विप्राः वाच्यतामिति देयुः ॥ एवमुत्त
रत्रापि यथायथायोग्यं प्रत्युत्तरं ॥ ततो यजमानः ॥ भद्रं
कर्णेभिः ऋ॰ १ ॥ द्रविणोदाः द्रविणसः ऋ॰ १ ॥ सविता पश्चातात् ऋ॰ १

जीवसे

नवोनवो भवति ऋ॰ १ ॥ उच्चा दिवि ऋ॰ १ ॥ आपउंदंतु दीर्घा
युत्वाय वर्चसे ॥ यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोह
वीमि ॥ जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्व मि
मश्यां ॥ यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं ॥
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥
अप व्रत नियम तपः स्वाध्याय क्रतु शम दम दान विशिष्टानां
सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ विप्राः समाहित
मनसः स्मः ॥ यजमानः प्रसीदंतु भवंतः ॥ विप्राः प्रसन्ना
स्मः ॥ यजमानः ॥ शांतिरस्तु ॰ पुष्टिरस्तु ॰ तुष्टिरस्तु ॰
वृद्धिरस्तु ॰ अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋद्धिसमृद्धिरस्तु॥

शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु॥ शास्त्रसंमृद्धिरस्तु॥ पुत्र
संमृद्धिरस्तु॥ धनधान्यसमृद्धिरस्तु॥ इष्टसंपदस्तु॥ अ
रिष्टनिरसनमस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेय
स्तदस्तु॥ उत्तरे कर्मण्यविघ्नमस्तु॥ उत्तरोत्तरमहरहर
भिवृद्धिरस्तु॥ उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां॥ ति
३२ थिकरणमुहूर्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहूर्तेन ३२
क्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॥ तिथिकरणे मुहूर्ते
सनक्षत्रे सग्रहे सदैवते प्रीयेतां॥ दुर्गापांचाल्यौ प्रीये
तां॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां॥ इंद्रपुरोगा मरुद्ग
णाः प्रीयंतां॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां॥ अरुंधती
॥ माहेश्वरीपुरोगा उमामातरः प्रीयंतां॥ वसिष्ठपुरोगा ऋषिगणाः प्री-
यंतां॥

पुरोगा एकपत्न्यः प्रीयंतां॥ ऋषयश्छंदांस्याचार्या वेदा य
ज्ञाश्च प्रीयंतां॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां॥ श्रीसरस्व
त्यौ प्रीयेतां॥ श्रद्धामेधे प्रीयेतां॥ भगवती कात्यायनी प्री
यतां॥ भगवती वृद्धिकरी प्रीयतां॥ भगवंतौ विघ्नविना
यकौ प्रीयेतां॥ भगवान्स्वामी महासेनः सपत्नीकः ससु
तः सपार्षदः सर्वस्थानगतः प्री०॥ हरिहरहिरण्यग
र्भाः प्रीयंतां॥ सर्वा ग्रामदेवताः प्री० सर्वाः कुलदेवताः
प्री० हता ब्रह्मद्विषः हताश्च परिपंथिनः॥ हताश्च
कर्मणोऽस्य विघ्नकर्तारः॥ शत्रवः पराभवं यांतु॥ शाम्यंतु
घोराणि॥ शाम्यंतु पापानि॥ शाम्यंत्वीतयः॥ शुभानि वर्धंतां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिवा आपः संतु ॥ शिवा ऋतवः संतु ॥ शिवा अग्नयः संतु ॥
शिवा आहुतयः संतु ॥ शिवा ओषधयः संतु ॥ शिवा वनस्प
तयः संतु ॥ शिवा अतिथयः संतु ॥ अहोरात्रे शिवे स्यातां ॥
निकामे निकामे नः ॥ कल्पतां ॥ शुक्रांगारकबुधबृहस्प
तिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः स
३३ र्वे ग्रहाः प्रीयंतां ॥ भगवान्नारायणः प्रीयतां ॥ भगवा ३३
न्पर्जन्यः प्रीयतां ॥ भगवान्स्वामी महासेनः प्रीयतां ॥
पुण्याहकालान्वाचयिष्ये ॥ वाच्यतां ॥ ऽज्ञाते ॥ पुण्यमा
वद ॥ अनया पुण्याहं वकुरुते ॥ ओं ब्राह्मणाः मम गृहे
अस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु ॥ इति स्वयमं[illegible]स्व

रणोक्ता ब्राह्मणाः ओं पुण्याहमिति ॥ तथोक्ते पुनरेवमध्य
मस्वरेणोक्त्वा तथैव तैरुक्ते पुनरेवमुच्चस्वरेणोक्ते तथै
तु ३ व तैरुक्ते स्वस्त्ययनं ॥ आदित्यमंमत स्वस्ति ब्राह्मणइत्या
दि कर्मण इत्यंतं पूर्ववत् स्वस्ति भवंतो ब्रुवंत्विति त्रिः ॥ आ
युष्मते स्वस्तीति प्रतिवचनं त्रिः ॥ ऋध्यास्मः कामम घाः ॥
सर्वा मर्द्धिं प्राप्तीति ब्रूति ॥ ब्राह्मणमित्यादि ॥ अस्य कर्मणः
ऋद्धिं भवंतो ब्रुवंतु ॥ इति त्रिः ॥ ओं ऋध्यतामिति त्रिः ॥
श्रिये जातः श्रिय मितद्रोण श्रियए वे ॥ एवं वेद ब्राह्म
णमित्यादि ॥ अस्य कर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति
त्रिर्ब्रूयात् ॥ अस्तु श्रीरिति त्रिर्ब्राह्मणाः ॥ ततः कर्तुर्वामतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गद्ध पत्नीमुपवेश्य पात्रपातितजलेन पल्लवदूर्वादिभिस्तदभ्यु ५८२
खोः विप्रा अभिषिंचेयुस्तिष्ठंतः ॥ तत्र मंत्रोः ॥ देवस्य त्वेत्या
दि ॥ सुरास्त्वामभिषिंचंत्वित्यादि पौराणान्श्लोकान्पठेयुस्य
मि॰ श्चेन ॥ ततो दानं कुर्यात् ॥ अथाभ्युदयिकश्राद्धविधिः ॥
तत्र गर्भाधानादिषु गर्भसंस्कारेषु जातकर्मादिषु पस्य
२४ संस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु स्त्रवणाद्यमे ३४
सु वापीकूपतडागारामादिषु स्थापनादिषु देवप्रतिष्ठायां
वानप्रस्थाश्रमसंन्यासस्वीकारेतुलापुरुषादिमहादा
३३ नादौ नगरप्रवेशे महानाम्न्यादि देवव्रतेषु राजाभिषे म३
के शांतिकपौष्टिकेषु उपाकर्मोत्सर्जनयोरपोरके नवी
नयोर्वानयोरन्यत्राप्येवंविधे कार्य ॥ इदमाभ्युदयिकश्राद्धं
२ करसबैषुर

वक्ष्यमाणं चमाध्यपूजनमेकस्यानेकसंस्कारेषु एकदैकेषु
युगपदुपस्थितेषु सर्वादौ सकृदेव तंत्रेणैव कार्य ॥ न तु प्र
तिसंस्कारमावृत्त्या ॥ यथा दैवाददृष्टजातकर्मादिकस्योपन
यनकाले जातकर्माद्यनुष्ठाने देशांतरगतस्य मृतबुध्या
दृतौर्ध्वदेहिकस्यागतस्य पुनः जातकर्मादिसंस्कारा
णां विहितानां युगपदनुष्ठाने कर्मनाशाजलस्पृष्टादी
नां प्रायश्चित्ततया पुनः संस्कारे युगपदनुष्ठाने बाल्यत णां४
दुकं पुंबसीराणे ॥ गणाशक्तियमाणानां मातृणां पूजनं स
कृत् ॥ सकृदेव भवेच्छ्राद्धमादौ न पृथगादिति ॥ कात्याय ६८२
नः ॥ कुशलग्नावसोर्द्धारा पंचधाराघृतेन तु ॥ कारयेत्सस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा धारा मालिनी चान्या वृद्धितः ॥११॥ गौरी पद्मा शची मेधा
सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोक
मातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥१२॥
आत्मदेवता ॥ आत्मकुलदेवता ॥ आयुष्याणि च शांत्यर्थं
जपेद्वै समाहितः ॥ आयुष्याणि ॥ आ नो भद्रा इत्यादीनि ॥
३५ ततो वृद्धिश्राद्धं नवदैवत्यं ॥ पार्वणत्रयात्मकं ॥ तत्र च ३५
ममाहाश्वलायनाचार्यः ॥ माता पितामही चैव संपूज्या
प्रपितामही ॥ पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ॥
एतेन वार्चनीयाः स्युः पितरो ह्युदये ह्यजौरिति ॥ यत्तु वृ
द्धवसिष्ठः ॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं ॥ नाम

संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकमिति ॥ तत्र सचसाग्न्य ॥
वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धे तु भुंजते ॥ इति तच्छाखां
तर विषयं ॥ कात्यायनानां तु आनुलोम्येन मात्रादिक्रमे
णैव नांदीमुखाः ॥ पितरः पितामहाः प्रपितामहा इति प्र
योगदर्शनात् ॥ यत्तु ब्रह्मपुराणे ॥ पिता पितामहश्चैव त
थैव प्रपितामहः ॥ त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकी
र्तिताः ॥ तेभ्यः पूर्वे त्रयो ये तु ते तु नांदीमुखाः स्मृता इति ॥
तन्महालयप्रकरणपाठात् प्रोष्ठपदपौर्णमासीनि
मित्तकश्राद्धविषयं ॥ तत्प्रकरणपाठादित्येवं हेमाद्या
दयस्तूचिरे ॥ एतच्च नांदीमुखसंज्ञकानां मात्रादीनुद्दिश्योत ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुपुराणे ॥ कन्याविवाहादीननुक्रम्य नांदीमुखान्पि
तॄन्नांदीतर्पयेत् ॥ प्रयतोनरः इति ॥ कूर्मपुराणे च ॥ ज
न्माद्यनुक्रम्य पितॄन्नांदीमुखान्वामतर्पयेद्विधिपूर्वकमि
त्युक्तेः ॥ वृद्धपराशरेण ॥ देवानांदीमुखविशेषणमुक्तं ॥ नां
दीमुखेभ्यो देवेभ्यः प्रदद्यात्कुशासनमिति ॥ वृद्धिश्राद्धे
च कालः ॥ कर्मादौ तु पूर्वेद्युर्मातृपार्वणं ॥ कर्मीहे पितृपार्व
णं ॥ कर्मोत्तराह्ने मातामहपार्वणमिति ॥ अस्यासंभवे पूर्वेद्यु
रेव पूर्वाह्ने मातृकं ॥ मध्याह्ने पैतृकं ॥ अपराह्ने मातामहीनां ॥
अस्यायासंभवे प्राहर्वृद्धमनुः ॥ अलाभे श्राद्धकालानां नां
दीश्राद्धत्रयं बुधः ॥ पूर्वेद्युरेव कुर्वीत पूर्वाह्ने मातृपूर्वकमिति ॥

इदं यमहत्सु कर्मसु ॥ अल्पेषु तु कर्माहे पूर्वश्राद्धं तत्पुत्रजन्मानन्तु
दिने वा रात्रौ वाप्युक्तवतोपवासिना वा पुत्रजन्मानंतरमेव का
र्यं ॥ अत्र संकल्पादौ विशेषः संग्रहे ॥ शुभायप्रथमांतेन वृद्धौ
५४ संकल्पमाचरेत् ॥ नक्ता यदि वा कुर्यान्महादोषोभिजायते ॥
अनेन स्म वृद्धश्राद्धानां मरूपाणामगोत्रिणां ॥ अन्यान्मास्मि
लांघैश्च नांदीश्राद्धं बसव्यवत् ॥ आश्वलायनकारिकायां ॥
संबंधनामरूपाणि वर्जयेदत्र कर्मणि ॥ इदं तु शाखांतरवि
५३ षयं ॥ अत्र सत्यवसू विश्वेदेवौ तत्स्थाने द्वौ विप्रौ ॥ मात्रादीनां
चतसृणां प्रत्येकं द्वौ द्वौ एवं विंशतिर्ब्राह्मणाः ॥ यद्वा ॥ मात्रादीनां त्र
याणां द्वौ द्वौ एवमष्टौ अत्रनाप्यसव्यं तिलस्थाने यवा एव ॥ स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा

धास्तुाने स्वात्मना शब्दः॥ अथ जानुनिपाताभावः॥ सर्वं प्राङ्मुख
न२३ एव कुर्यात्॥ प्रदक्षिणमुपचारो जनुदर्भैः क्रियेत्यादौ विशे
षान्यंथा तौ ज्ञेयाः॥ पिंडदाने कुलदेशाचारतो व्यवस्था॥ भ
विष्यपुराणे॥ पिंडनिर्वपनं कुर्यान्नवा कुर्यान्नराधिप॥ वृद्धिश्रा
३७ द्धे महाबाहो कुलधर्माननवेक्ष्य तु॥ पिंडदानपक्षे विशेषो वक्ष्य ३७
ते नोक्तः॥ दधिबदरैः धुम्रिश्रान्त्रपिंडान्दद्याद्यथाक्रमं॥ कर्क
५ तथा धुर्बदरीफलं॥ एकस्मै एकस्मै पिंडद्वयं देयं॥ एकं नाम्नाप
रं तूष्णीं दद्यात्पिंडद्वयं तु धर्मवित्॥ चतुर्विंशतिमतात्॥
अन्ये च बहवो विशेषाः ग्रंथांतरतो ज्ञेयाः॥ दाक्षिणात्या
१ ची नां तु जेराणां चार्थस्तु वृद्धिश्राद्धान्नैहेच्यते॥ अथाभ्यु
ने१ भावा

ना ५

दयिके कर्तृनिर्णयः॥ सायणीये॥ नांदिश्राद्धं पिता कुर्यादा
द्ये पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदि
कं॥ द्वितीयपाणिग्रहादौ वरः एव कुर्यादित्यर्थः॥ कात्याय
नः॥ स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु॥ पिंडानोद्वाह
नात्तेषां तस्याभावे तु तत्क्रमात्॥ तेषां सुतानां उद्वाहनात्प्रथ
मविवाहपर्यंतं पिता स्वपितृभ्यः पिंडान्ददद्यादुपलक्षितं वृ
द्धिश्राद्धं कुर्यात्॥ तस्य पितुरभावे पितुस्तस्य संस्कार्य
स्य पितृणां येन क्रमस्तेन क्रमेण पितृव्यादिर्यमातु
लादिश्राद्धं कुर्यात्॥ द्वौ तीर्थेचसम्यस्ते तातेच पौत
ते सति॥ एभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥
२ श्राद्धं दद्यात्॥ न स्वपितृभ्यः इति हेमाद्रिणा व्याख्यातं॥ जीवपितृकस्तु॥ पितृमात्रादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतस्याग्निकविषयेऽस्मिन्नेव ॥ विष्णुः ॥ पितरि जीवति यः श्राद्धं
कुर्यात्तेभ्य एव कुर्यात् येषां पिता कुर्यात्तेभ्य एव तत्कुर्या
त् पितरि पितामहे च येषां प्रपितामहः ॥ पितरि पिताम
हे प्रपितामहे चैव न दद्यात् ॥ अथाश्वलायनगृह्यप
३८ रिशिष्टे तु ॥ जीवत्पितासु तु तत्संस्कारेषु मातामह ३८
योः कुर्यात् ॥ तस्यां जीवत्यां मातामहस्यैव कुर्यादिति ॥
अथास्य शिष्टप्रचारात्परिगृहीतः ॥ संकल्पविधि
नाप्रयोगः ॥ उपनयनादिमहत्सु कर्मसु पूर्वेद्युर्जातक
र्मादिष्वल्पेषु तद्दहरेव नांदिश्राद्धं कुर्यात् ॥ तत्रादौ कर्ता
धृतमांगलिकस्नानो धौतवासाः धृतस्वस्त्ययनो नांदि

श्राद्धपूर्वांगमातृकापूजनं कुर्यात् ॥ पूजाप्रकारस्तु ॥ पूजो
पकरणान्युपकल्प्य ॥ प्राङ्मुख उपविश्य कुशान् जलं यवान्या
दाय अद्येत्यादि अमुककर्मांगतया गणपतिगौर्यादिच
तुर्दशमातृकापूजनमहं करिष्ये ॥ इति संकल्प्य ॥ अक्षतैः ॥
ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ ॥ ॐ भूर्भुवः स्वः
गौरि इहागच्छ इह तिष्ठ ॥ एवं पद्मे ॥ शचि ॥ मेधे ॥ सावित्रि ॥
विजये ॥ जये ॥ देवसेने ॥ स्वधे ॥ स्वाहे ॥ धृ० ॥ तुष्टे० ॥ पुष्टे० ॥
आत्मकुलदेवते ॥ इति प्रत्येकमावाह्य ॥ ततो मनोजूति
रिति प्रतिष्ठाप्य ॥ गणपतये नमः प्रणवादिनमोंतचतुर्थ्यं
तस्वस्वनाममंत्रेण पंचदद्या षोडशोपचारैः पूजयेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहृणांगास्तादेवता स्वपक्षे तु गणपति गौरी पद्मा शची मेधा सा
वित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृति स्तुष्टिः पुष्टिः आत्मकुलदेवता॥ इहागच्छत इह तिष्ठते
ति आवाह्य प्रतिष्ठाप्य॥ ॐ गणपत्यादिभ्यो नम इति पूर्वव
दुपचारैः पूजयेत्॥ ततः पंच सप्त वा नातिनीचानत्युच्छ्रि
३९ ताः॥ कुड्यादिषु वसोः पवित्रमसीति घृतधाराः उत्तरसं ३९
स्थाः कुर्यात्॥ ततः वसोर्धारादेवताभ्यो नम इति पंचोपचा
रैः पूजां कुर्यात्॥ ततो वसोर्धाराकरणं च कात्यायनीनामे ना.२
वनान्येषां॥ ततआयुष्यमंत्रजपः॥ आयुष्यं वर्चस्यं० इमं॥
न तद्रक्षांसि॥ दीर्घायुत्वायु॥ यदाबध्नं॥ यथासंइसायुष्य

मंत्रजपः॥ अथ नांदीश्राद्धं॥ तत्र त्रिविधं॥ विवाहादि नित्य
धं.२ नैमित्तिकं पुत्रजन्मादि अनियमनिमित्तं॥ अग्न्याधाना
दि निमित्तं चेति॥ तत्र विवाहादिनिमित्तं प्रातः कार्यं॥ त
दाह शातातपः॥ प्रातर्वृद्धिनिमित्तकमिति॥ अत्र प्रातः
शब्दः सार्द्धप्रहरात्मक इति कालवचनात्॥ तदाह गा
र्ग्यः॥ ललाटसंमिते भानौ प्रथमः प्रहरः स्मृतः॥ स एव
सार्धसंयुक्तः प्रातरित्यभिधीयते॥ अग्न्याधाननि
मित्तं त्वपराह्णे कार्यं॥ तदाह मनुः॥ पार्वणं चापराह्णे
तु वृद्धिश्राद्धं तथाग्निकमिति॥ अग्न्याधाननिमित्तं
वृद्धिश्राद्धमपराह्णे कुर्यादित्यर्थः॥ पुत्रजन्मादौ निमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदा ५२

तानंतरमेव तत्कार्यं । निर्णीयामस्ते ॥ कृतोऽकस्मात्ले सुस्ना
तः सुप्रक्षालितकरचरणः स्वाचांतः ॥ सुस्नातानाचां
तान् द्वौ ब्राह्मणानाहूय ॥ वहिरूपकूले गोमयोपलिप्तमं
डले स्वागतं वः ॥ सुस्वागतमिति प्रत्येकं प्रश्नोत्तरपूर्व
ग्र५ कं प्राग्रकुशोत्तरेष्वासनेषु पुत्रा प्रमुखान् दक्षिणोपक्रमानु
९० दगपवर्गानुपविश्य ॥ स्वयमुदङ्मुख उपविश्य आद्य ५०
योर्विप्रयोर्जानुनी स्पृष्ट्वा न ब्रुवते ॥ देवाकाले संकी
र्ये अमुककर्मनिमित्तास्मुद्धितकश्राद्धाख्ये कर्मणि
नांदीमुखास्मन्मात्रादित्रयनांदीमुखास्पित्रादित्र
यनांदीमुखास्मन्मातामहादित्रयसंबंधिसत्यवसुसंज्ञ

कविश्वेदेवहरस्येभवंतौ मया निमंत्रिताविति तांबूलादिदान
पूर्वकं निमंत्रयेत ॥ निमंत्रिताः स्म इति प्रतिवचनं ॥ पुन
स्तांबूलादिकमादापयेत् ॥ ततरयोर्विप्रयोर्जानुनी स्पृष्ट्वा
त ॥ अद्येहगोत्राणां नांदीमुखास्मन्मातृपितामहीप्र
पितामहीनां अमुकामुकदेवीनां अद्येहकर्तव्यामुकक
र्मनिमित्ताभ्युदयिकश्राद्धे भवंतौ मया निमंत्रितौ इति
तांबूलादिदानपूर्वकं निमंत्रयेत् ॥ निमंत्रितौ स्व इति प्र
तिवचनं ॥ पुनस्तांबूलादिकमादापयेत् ततः योर्विप्र
योर्जानुनी स्पृष्ट्वा ब्रूयात् अद्येहामुकगोत्राणां नांदीमुखास्म
त्मातृपितामहप्रपितामहानां अमुकामुकशर्मणां अद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ श॰ ५१

कर्तव्यामुककर्मनिमित्तमाभ्युदयिकश्राद्धे भवंतौ मया निमंत्रि-
तौ इति तां ब्रूयादिदानपूर्वकं निमंत्रयेत॥ निमंत्रितौ स्व इति
प्रत्युत्तरं देयं॥ पुनस्तां ब्रूयादिकमाराय अद्येहामुकगोत्राणां
नांदीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुका-
४१ मुकशर्मणां अद्य कर्तव्यामुककर्मनिमित्तमाभ्युदयिकश्राद्धे भ-
वंतौ मया निमंत्रितौ इति तां ब्रूयादिदानपूर्वकं निमंत्रयेत॥ ५१
निमंत्रितौ स्व इति प्रतिवचनं॥ अक्रोधनैः शौ॰ भारिणेति स-
र्वनियमान्श्रावयेत्॥ ततो देवबुद्धिम् पूर्वकं चरणप्रक्षाल-
नं विधाय अद्येह नांदीमुखास्मन्मात्रादित्रयनांदीमुखास्म-
त्पित्रादित्रयनांदीमुखास्मन्मातामहादित्रयसंबंधिसत्यव-
सुसंज्ञिकाः विश्वेदेवाः एतत्पादार्घ्यं वो नमः इति गंधाक्षतादि

पुष्पं पादार्घ्यं दत्वा अद्येहामुकगोत्राः नांदीमुखास्मन्मातृपिता-
मही प्रपितामह्यः अमुकामुकदेव्यः एतत्पादार्घ्यं वो नमः इति
मातृवर्गब्राह्मणचरणयोर्दत्वा॥ अद्येहामुकगोत्राः नांदीमु-
खास्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः एत-
त्पादार्घ्यं वो नमः इति पित्रादिवर्गब्राह्मणचरणयोर्दत्वा॥ अ-
द्येहामुकगोत्राः नांदीमुखास्मन्मातामहप्रमातामहवृद्धप्र-
मातामहाः अमुकामुकशर्माणः एतत्पादार्घ्यं वो नमः इति माता-
महब्राह्मणचरणयोरर्घ्यं दद्यात्॥ ततो ब्राह्मणानाचामय्य
प्रथम ३ स्वयमप्याचम्य श्राद्धदेशोत्कल्पिते घासने पुष्पदमासनमास्य-
तामिति॥ प्रयोगेणोदगपवर्गं प्राङ्मुखान्देवपूर्वं द्विजानुप-
वेश्य स्वयमुदङ्मुखउपविश्य कर्मसौकर्यार्थं कर्मपात्रं जलेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्व दूर्वा दधियवकुशांस्त्रिविक्षिप्य प्राणायामत्रयपूर्वकं विष्णुस्म
रणं स्मृत्वा कर्मपात्रजलेनोपकरणानि प्रोक्ष्य दूर्वाकुशाजलानि स्थप२
दक्षिणकरेणादाय पूर्वं वदेशकालकीर्तनांते अद्यामुकक
र्मनिमित्ताभ्युदयिकश्राद्धाख्ये कर्मणि अमुकगोत्राः नांदीमु
खास्समातृपितामहीप्रपितामह्यो मुकामुकदेव्यः अमुक
५२ गोत्राः नांदीमुखास्सपत्नीकपितामहप्रपितामहाः अमुका ५२
मुकशर्माणः अमुकगोत्राः नांदीमुखास्सपत्नीकमातामहप्रमा
तामहवृद्धप्रमातामहाः अमुकामुकशर्माणः प्रधानदेवताः
सत्यवसुसंज्ञकाः विश्वेदेवाः अंगदेवताः पयोऽन्नलक्षणंह
विः ब्राह्मण आहवनीयार्थेऽ अमुकगोत्राणां नांदीमुखास्स
मातृपितामहीप्रपितामहीनां अमुकामुकदेवीनां अमुकगो

त्राणां नांदीमुखास्सपत्नीकपितामहप्रपितामहानां अमुकामुकशा
र्मणां अमुकगोत्राणां नांदीमुखास्सपत्नीकमातामहप्रमातामहवृद्ध
प्रमातामहानां अमुकामुकशर्मणां अमुककर्मनिमित्तं सत्य
वसुसंज्ञकविश्वेदेवपूर्वकं सांकल्पिकाभ्युदयिकं श्राद्धं भव
दनुज्ञया अहं करिष्ये इति संकल्पः ॥ कुरुष्वेति प्रतिवचनं ॥
ततः सप्रणवगायत्र्याः त्रिजपः ॥ विष्णुस्मरणं ॥ मात्रादि त्रयपि
त्रादि त्रयमातामहादि त्रयसंबंधिसत्यवसुसंज्ञिकाः विश्वे
देवाः इदमासनं वो नमः ॥ इति प्रागग्रकुशत्रयं सपवित्रं ज २०
लं दक्षिणतः आसनोपरि दत्वा अमुकगोत्राः नांदीमुखास्स
मातृपितामहीप्रपितामह्यः अमुकामुकदेव्यः इदमासनं वो
नमः ॥ इति मातृवर्गे दद्यासनोपरि विभज्य दत्वा अमुकगोत्राः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांदिमुखाः स्वपितृपितामहप्रपितामहाः अमुकशर्माणः इदमा
सनं वो नमः इति पित्रादिवर्गब्राह्मणहस्ते आसनोपरि दत्वा पित्रा
दिपदस्थाने मातामहादिपदप्रक्षेपेण तदीयब्राह्मणहस्ते आ
सनोपर्यासनं दद्यात् ॥ ततः प्रयासनं दीपस्थापनं ॥ ततो द्वि
तीयब्राह्मणहस्ते प्रथमब्राह्मणहस्तं दत्वा तत्र जलदानं
४३ पूर्वकं गंधादि दत्वा ॥ कुशाजलयवान्यादाय मात्रादि पित्रादि ४२
कं मातामहादित्रयसंबंधिनः सत्यवसुसंज्ञिकाः विश्वेदेवाः
इमानि गंधपुष्पधूपदीपवासोलंकरणहतांबूलानि वो न
मः ॥ अमुकगोत्राः अस्मत् नांदिमुखाः स्वमातृपितामहीप्रपिता
मह्यः अमुकामुकदेव्यः इमानि गंधतांबूलानि वो नमः ॥ अ
मुकगोत्राः नांदिमुखाः स्वपितामहप्रपितामहाः अ

मुकामुकशर्माणः इमानि गंधतांबूलानि वो नमः ॥ अमुकगोत्राः
नांदिमुखाः स्वमातामहप्रमातामहवृद्धप्रमातामहाः इमा
नि गंधतांबूलानि वो नमः ॥ अन्नपरिवेषणं ॥ पात्रमालभ्य
पृथिवी ते० जुहोमि स्वाहेति जपित्वांगुष्ठमन्नेवगाह्य इदम
न्नमिमा आपः इदमाज्यं हविरिति ३ मात्रादित्रयपि
त्रादित्रयमातामहादित्रयसंबंधिनः सत्यवसुसंज्ञिकाः वि
श्वेदेवाः इदमन्नं घृतमधुपस्कारसहितं परिविष्टं परिवेष्यमाणं
चाद्विजेभ्यस्तृप्तिपर्यंतं अमृतरूपं वो नमः इति उत्सृजेत् ॥ एव
मेव मात्रादिपात्रेप्यमालभ्य अमुकगोत्रा नांदिमुखाः स्वमातृ
पितामहीप्रपितामह्यः अमुकामुकदेव्यः इदमन्नं घृतमधुपस्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसहितं अमृतरूपं वो नमः ॥ एवमेव पित्रादिपात्रद्वयोर्मातामहा
दिपात्रयोरपि संभ्रमं कुर्यात् ॥ ततोऽमृतसुपिधानमसि त्रवग्यं जपः ॥ ह
सानुज्ञातो ब्राह्मणैः अन्नं विकिर्य सदरस सदर दद्यादत्वा पूर्ववत् गायत्रीं जपि
त्वा मधुमतीर्मध्विति च संपन्नमिति पृष्ट्वा सुसंपन्नमितीतरै
४४ रुक्ते तच्छेषमन्नं किं क्रियतामिति पृष्ट्वा इष्टैः सह भुज्यतामि
ति तैरुक्ते ब्राह्मणानाचामयेत् ॥ सुप्रोक्षितमस्तु शिवा आपः सं ४४
तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु नांदीमुख्यो मातरः प्री
यंतां ॥ नांदीमुखाः पितरः प्रीयंतां नांदीमुखाः मातामहाः प्रीयंतां
इति क्षीरयवजलानि दद्यात् ॥ ततः आशिषः प्रार्थयेत् ॥ लि ३
अघोराः पितरः संतु संत्विति ब्राह्मणाः गोत्रं नो वर्धतामिति यज
मानः वर्धतामिति ते ॥ दातारो नोऽभिवर्धंतां अभिवर्धतामिति ते ॥

वेदाः संततिरेव च ॥ अभिवर्धतामिति क्रमेणोत्तरं ॥ श्रद्धा च नो मा
व्यगमत् ॥ आगात् ॥ बहुदेयं च नोऽस्तु ॥ अस्त्विति प्रतिवचनं ॥
ततो मात्रादित्रयपित्रादित्रयमातामहादित्रयसंबंधिविश्वे
देवप्रतिश्वासिद्ध्यर्थममुकशर्माऽहं भवद्भ्यामियं प्राक्षा
मलकार्द्रमूलकादि रूपा विष्णुदैवतामया दत्ता इति द्वे ब्राह्मणा
भ्यां दक्षिणां दत्वा अमुकगोत्राणां नांदीमुखीनां मातृपितामह ना ४
हीप्रपितामहीनां अमुकामुकदेवीनां अक्षततैतदाभ्युदयिकप्र
तिश्वासिध्यर्थं अमुकगोत्रोऽभ्याममुकामुकशर्मा भ्यामियं
प्राक्षाभूतिमात्रादि ब्राह्मणाभ्यां दक्षिणां दत्वा अमुकगो
त्राणां नांदीमुखानां पितृपितामहप्रपितामहानां अमुका
मुकशर्मणां अक्षततैतदाभ्युदयिकप्रतिश्वासिध्यर्थं प्राक्षा ॥

गदा ४२

इतिपित्रादिब्राह्मणाभ्यां दक्षिणां दत्त्वा पित्रादिपदस्थाने मातामह
दिपदप्रक्षेपेण मातामहादिब्राह्मणाभ्यां दक्षिणां दद्यात् ॥ ततो
विश्वेदेवाः प्रीयंतामित्युत्थाय देवद्विजाभ्यां विश्वेदेवाः प्रीयंतामि
त्युत्तरदत्ते स्वस्ति भवंतो ब्रुवंत्विति सर्वान्ब्रूयुः स्वस्तीति ते
हुरूके ब्राह्मणान्प्रणिपत्य ब्रसा घवाजे वाज इति मात्रादिवर्ग
त्रये द्विजपूर्वकं देवद्विजौ विसृज्य आमा वाजस्येति पित्रा
४५ ननुव्रज्य प्रदक्षिणीकृत्य नमेत् ॥ ततो मातामहादिविसर्जये ४५
त् ॥ जीवन्मातृकस्य न मातृपार्वणं ॥ जीवन्मातामहस्य न माता
महपार्वणं ॥ जीवत्सु हि कस्तु येभ्यः पिता दद्यात्तेभ्यो दद्यादि एव४
ति उक्तमेव ॥ यदा तु पक्वान्नासंभवस्तदा आमश्राद्धविधि
ना आमान्नेन कर्तव्यं ॥ ततः पत्नीयजमानयोः हस्ते वस्त्रप
रिधानं ॥ ततः सपत्नीकः प्राङ्मुख उपविश्य अद्येत्यादि देशा

पद्वादशलोपात् ४ आमान्यसाप्तलाभे हिरण्येन कर्तव्यं ॥२

कालौ संकीर्त्य स्मार्तोग्निमहमाधास्य इति संकल्पं कुर्यात् ॥ आभ्यु
दयिकात्पूर्वं संकल्प इति हरिहरः ॥ श्राद्धोत्तरमिति रेणुकः ॥ वै
ष्णिकावधारणं ॥ मंथनाग्नेरुत्तरतः पात्रासादनं ॥ द्वे पवित्रे ॥ च
रुस्थाली मृन्मयी ॥ चरुस्थाली औदुंबरमयी ॥ पालाशः स्रुवः स
मिधः ॥ प्रांशावाधारौ ॥ होणयोराज्यभागौ ॥ दक्षिणा पूर्णपा
त्रहस्तवधारणं ॥ उदिति रमते ब्रह्मवरणं ॥ अरणीप्रदानं च ॥
तत्रैवं ब्रह्मा अरणीमादाय अधरारणिं पत्न्यै उत्तरारणिं य
जमानाय प्रयच्छति ॥ तौ चावसथ्याग्निभूते इमे अरणी आ साधन
वाभ्यां परिगृहीते इति परिगृह्णीतः ॥ अरणिप्रदानं स्मार्ते
निर्मूलत्वादुपेक्षणीयं ॥ प्रदानाभावेपि धारणं भवत्येव ॥
अधरारणिं पत्नी बिभृयादुत्तरां पतिरिति ॥ यज्ञपार्श्वे
परिस्तीर्य ॥ उक्तप्रकारेणारणिमानं ॥ अरणिपूजनं ॥

ततोयवोन चतुर्दशांगुलमानेन मेखलायुक्तत्रखरकरणमग्नेः
सभ्यास्तवे ध्यपोर्गार्हपत्यवत्कुंडलामिति निगमपरिशिष्टात् ॥ य
पि॰ पणाग्रे वैतमेवकुंडमुक्तं ॥ मेखलादार्श्यांगुलमीश्वाकार्या ॥ त
उपलेपनं तैः खरेपरिसमूहनं ॥ उल्लेखनं ॥ उद्धरणं ॥ अभ्युक्षणं ॥ अरणी
पक्षे अग्निमंथनं ॥ तत्रयजमानः प्राङ्मुख ओविलीं धारय
ति ॥ तत्संमुखी पत्नी मंथनं करोति ॥ पत्नी बहुत्वे सर्वाभिर्मंथ
४६ नमिति रेणुकः ॥ पत्न्यामंथनाशक्तौ ब्राह्मणेनान्येन चित्मंथनं ४६
कार्यं ॥ काष्ठैरग्नेः प्रज्वालनं ॥ खरे निधानं ॥ अथवा वैश्यार
ताद्वाहृत्याग्नेः खरे स्थापनं ॥ ऋष्यादिस्मरणमात्रे [illegible] रेणुक
गंगाधरहरिहराः ॥ ते ऋषिचारणीयं ॥ कर्मकालेप्रतिमंत्रस्म
रणं ॥ कृतपूर्वमेवस्मरणं धरसोकर्मारंभे ॥ एतोन्यविदिशा
ये धीते नुद्भूते यजतेयाजते तेतस्य ब्रह्मसंनिवीर्यं यातयामभ

वतीसर्वानुक्रमण्यामुक्तत्वात्तत्तत्पदार्थज्ञानमात्रमपेक्षितं ॥ नतुक
र्मकाले धारणं ॥ पात्रासादनं ॥ अस्मिन्नावसथ्याधाने तं अग्नि
नोप्यपदेशः ॥ दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्मोपवेशनं ॥
अग्नेरुत्तरतः प्रणीताप्रणयनं ॥ परिस्तरणं ॥ पात्रासादनं ॥
त्रीणि पवित्रच्छेदनानि ॥ पवित्रे द्वे ॥ प्रोक्षणीपात्रं धारणं ॥ वैकंक
तमिति रेणुकः ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमार्गकुशाः
उपयमनकुशाः ॥ समिधस्तिस्रः प्रादेशमात्र्यः ॥ खादिरः स्रुवः ॥
आज्यं ॥ व्रीहितंडुलाः ॥ दक्षिणापूर्णपात्रं ॥ वरो वा ॥ पवित्रेकृ
त्वा प्रोक्षणीसंस्कारः ॥ तस्येमं पात्रप्रोक्षणं ॥ प्रणीताग्न्योर्म
ध्ये प्रोक्षणीनिधानं ॥ आज्यनिर्वापः ॥ चरुपात्रे प्रणीतोदके
नासिंच्य तंडुलप्रक्षेपः ॥ चर्वाज्ययोः सहाधिश्रयणम् ॥ इति पद्धतीकाराः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणतः आज्यस्य ब्रह्मणः ॥ उत्तरतश्चरोः स्रुवस्य च ॥ प
र्यग्नीकरणमुभयोः स्रुवस्यैव ॥ स्रुवप्रतपनं ॥ सम्मार्गकुशैः संमार्ज
नं ॥ प्रणीतोदकेनाभ्युक्षणं ॥ पुनः प्रतपनं ॥ आज्योद्वासनं ॥ च
४२ रोर्द्वासनं ॥ आज्योत्पवनं अवेक्षणं ॥ अपद्रव्यनिरसनं ॰ प्रो
क्षण्युत्पवनं ॥ उपयमनादानं ॰ तिष्ठतः समित्प्रक्षेपः ॥ प्रोक्ष
४७ ण्युदकेन प्रणीतासु पवित्रकरणं ॥ अग्नेरुत्तरतः प्राङ्मुख ४७
उपविश्य दक्षिणं जान्वाच्य ॥ ब्रह्मणान्वारब्धः स्रुवेण होमः ॥
मनसा पूर्वाघारः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम
ति त्यागान्ते अग्नौ द्रव्यप्रक्षेपः ॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः ॥ ॐ
इन्द्राय स्वाहा इदमिन्द्राय न मम ॥ अग्नये स्वाहा इदमग्नये न मम ॥
ततो हविर्होमः ॥ सर्वत्र होममन्त्रेणाम्नातोपि स्वाहाकारः कार्यः ॥
सोमाय स्वाहा इदं सोमाय ॰

सर्वत्र मंत्रवत्सु जुहोत्सुपदेशादीसुक्तत्वात् ॥ त्वन्नो अग्ने ॰ मुमुग्ध्य
स्मत्स्वाहा ॥ इदमग्निवरुणाभ्यां न मम ॥ स त्वन्नो ॰ रधि स्वाहा इद
मग्निवरुणाभ्यां ॰ न मम ॥ ० य ते ॰ इदं वरुणाय ॰ ततो ॰ मोची: इदं वरु
णाय ॰ ये ते शतं ॰ स्वर्काः इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो दे
वेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम — त्यागा इति पद्धतिकाराः ॥ वस्तु
तस्तु देवेभ्यः पदं विवाताये वत्यागः ॥ अयाश्चाग्ने ॰ भेषजं इदम
ग्नये ॰ उदुत्तमं वरु ॰ इदं वरुणाय ॥ भवतं नः ॰ मघनः इदं जात
वेदोभ्यां इदमग्निभ्यामिति त्यागः ॥ ततः स्थालीपाकहोमः ॥
अग्नये पवमानाय स्वाहा ॥ अग्नये पावकाय स्वाहा ॥ अग्न
ये शुचये स्वाहा ॥ अदित्यै स्वाहा ॥ सुगमास्त्यागाः ॥ ततः पु
नरष्टर्चे होमः ॥ ततः स्विष्टकृत् ॥ अग्नये स्विष्टकृते स्वाहा इदम
ग्नये स्विष्टकृते ॥ आज्येन ॰ अयाश्चाग्ने ॰ विदः स्वाहा ॰ इदं देवेभ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गात्तुविंश्चः॥भूः स्वाहा इदमग्नये० भुवः स्वाहा इदं वायवे० स्वः स्वाहा
इदं सूर्याय॥ अथवा॥ इदं भूः॥ इदं भुवः॥ इदं स्वः॥ इति त्यागः इति वा
सुदेव भट्टाः॥ त्वन्नो अग्ने॥ स त्वन्नो अग्ने॥ अयाश्चाग्ने॥ ये ते श
तं४ उदुत्तमं५ त्यागाश्च प्राक्॥ प्रजापतये स्वाहा इदं प्रजापत
ये० व्यस्तहोमः॥ स्वाहेति इदं प्रजापतये न ममेति त्यागः॥ ततो भ
वतत्रोपप्राशनं॥ पवित्राभ्यां मार्जनं॥ पवित्रयोरग्नौ प्रक्षे
पः॥ यदत्रौलिप्सत देव बर्हिर्धारग्निरसादिति लिंगात्॥ पवित्र ६९
योरुत्सवनेलिप्सत्वात्॥ ब्रह्मणे दक्षिणादानं॥ एक ब्राह्मणभो
जनं॥ ततः स्वस्तिंतरो ब्राह्मणभोजनं॥ अत्रेमणिकावधा
नमिति हरिहररेणुकदीक्षितौ॥ तत्राप्येकमः॥ मा हपूर्वमाप्तु
दायकं॥ अग्न्यादानं देवस्येति॥ इदमग्निमिति अवदलेत्तु ५१२
उत्तरपूर्वस्यां खननं॥ अवदेशुद्धास्तारणं॥ अक्षततोयार
१ श्रीसद्धोषः गाध्या॥ प्रणीतानिनयनं॥

इकानां यावापः॥ हरिप्रादीनां च॥ मणिकुम्भ स्थानां समुद्रासिद्धं
भुक्षिसंतेन॥ आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृ
तं च॥ रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धाः॥ आ
पो हि ष्ठेति तिसृभिः श्रोदभ्रासेकः॥ ततो ब्राह्मणभोजनं॥ आधाने
पदार्थोपचारेनैमित्तिकहोमस्याभावः॥ अग्न्यभावात्॥ नन्वस्ति
मंथनाद्ध्वमपितत्र होमः स्यादिति चेन्नैवं॥ आवसथ्यश्रा
द्धोपि संस्कारनिमित्तो न जातिनिमित्तः॥ न योगनिमित्तो वा॥
संस्कारे तु समुद्भावद्व्ययोगस्त्रीनाश॥ अतस्त्रये पदार्था अ
दृष्टार्थाश्च पठितास्ते सर्वे आवसथ्याधानवाच्याः॥ एवं सति सं
स्कारैकदेशाभावे पुनावसथ्यं॥ अतः सकलकर्मसमुदाया
इति॥ [illegible] तथा च कारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा स्पर्यग्निकरणादि॥५ ५८

मायां॥अग्न्याधेयस्य मध्ये च विच्छित्तिं कांचिदाप्नुते प्रायश्चित्तं न
विधेत आधानावृत्तिरिष्यते॥तत्राग्निमंथनादूर्ध्वं विच्छेदे
वर्त मंथनादितः॥आ तेरूर्ध्वकर्म पूर्वं च नादिकं विनेति॥अत्र च द
मः॥अग्निसंस्कारो न वा भवति॥यथा आज्याहुतिहोमे॥आ
ज्याधिश्रयणाद्यं॥चर्वादितो च संस्कारः॥यस्यैवाग्निनो २५
४६ मोपचारस्तस्यैवावृत्तिर्युक्तरूपा न सकलस्याधानस्येति॥ने
तु प्रायश्चित्तमेतिभट्टोपाध्यायाः॥युक्तरूपं चैतत्॥अस्या ४६
वस्थायां॥ ॥आधानमध्ये पत्नी रजस्वला तदा विशेषः॥का
रिकायां॥अर्वाक्पूर्णप्रदानाच्चेदाधाने स्त्री रजस्वला॥तच्छु
द्धौ पुनराधानं मारुत्प्रजननपूर्वकं॥स्यात्तां ते अरणी तत्र यो
निः सैवोत्तरस्तथा॥आधानानंतरं चेत्स्यात्प्रजो सुतकर्म च न ॥१२
॥मणिकोदिस्नकर्तव्यमस्याद्देवोऽब्रवीद्दिहे॥आधाना ग्रहणात् दृष्टं नरस्माच
जेनरस्तु नष्टं॥

मणिकादिन कर्तव्यं कुर्याद्देवोऽब्रवीद्धरिः॥बौधायनमतादेवं भा
रद्वाजमतादपि॥॥अत्र प्रायश्चित्तं देवभाष्ये॥पद्मोरजस्व
वी२ लायां सूतिकायां प्रारब्धं कर्म क्रियत एवेति गदाधरः॥तथा
त्रिकांडमंडनः॥रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा॥निसं
नैमित्तिकं कुर्यात्कार्यं कर्म न किंचन॥आधानं पुनराधानं
पुनः सौत्रामणी तथा॥चातुर्मास्यानि सोमश्च तथैवाग्रयण
क्रिया॥अकाम्यत्वेपि नैते तेषां सूतकादावनुष्ठितः॥प्रक्रांतेषु
चैतेषु सूतकादिसमुद्भवे॥कर्तव्यान्येव तानि कारितान्य
परेषत इति॥अतः प्रारब्धस्य सूतकरजोदोषादावप्यनु
ष्ठानमेवयुक्तं॥नमुद्धिप्रतीतत्वं॥कारिकामतेतु॥आधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेन भवतीसुक्तमेवपूर्वं॥ अथपुनराधाननिमित्तान्यभिलिख्यं
ते॥ अग्नावनुगतेयस्यहोमकालद्वयंव्रजेत्॥ उभयोर्विप्र
वासेवालौकिकोग्निर्विधीते॥१॥ अग्नोर्विनासमारूहणु
ध्वंशाय्यापरासनात्॥ हुतोग्निर्लौकिकोज्ञेयः श्रुतोसर्व
वेदवीनात्॥२॥ कुरुक्षेत्रादितीर्थानांगमनेदेशाविपूर्व॥
समारोपंधिनेवाग्निर्नरोण्योःस्वानुदवसतानि॥३॥ द
क्षोग्निर्यदिनश्येतमथ्यमानोहुताशनः॥ यामासीमांत
रंगछेत्स्यत्सौलथ्यवाहनः॥४॥ अहुतोवसरंतिदृढुदके
सेराने गतः॥ सामीनोह्याहयेदग्नीनपुनराधानमर्हति॥५॥ अ
ग्निहोत्रेणरहितःपंचाहंत्रातयोजनं॥ आहितोग्निःप्रयायाद्वे

दग्निहोत्रंविनश्यति॥६॥ अदंखयमुजुरूग्न्योढावयेद्विगादिना॥
तस्यासासुनराधेयंपवित्रेष्टिरथापिवा॥७॥ विनाग्निसप्त
यश्चेसीमामुल्लंघ्यगछति॥ होमकालात्ययेतस्यपुनराधा
नमिष्यते॥८॥ अरण्योक्षयनाशाग्निदाहेषुग्निंसमाहि
तः॥९॥ पालयेदुपशांतेस्मिन्पुनराधानमिष्यते॥ ज्ये
ष्ठाचेद्बहुभार्यस्यस्यतिचारेणगछति॥१०॥ पुनराधान
२ मत्रैकेइछंतिनेतिसूरयः॥ दोहयित्वाग्निभिर्भार्यां स
ह्यांपूर्वंसंस्थितां॥ पात्रैश्चाथाग्निमादध्यात्कृतदारो
विलंबितः॥ दाहयित्वाग्निहोत्रेणस्त्रियंरत्नवतींपतिः॥१२॥
आहरेद्विधिवद्दारानग्निंश्चैवाविलंबयन्॥१३॥ जीवंत्या
मपिज्येष्ठायांद्वितीयपरिणायने॥१४॥ तुसर्गेणपीनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्स्यान्यथा सह ॥ पुनराद्ध्यादिति द्वैचैकायां ॥ भार्यायां
द्विधमानायां द्वितीयामुद्वहेद्यदि ॥ तदा वैवाहिके कर्म कु
र्याद्वावसथ्येग्निमान् ॥ १५ ॥ उपघातात्क्रियालोपे उपेक्षा
प्रमादतः ॥ चतुर्विधमिदं प्रोक्तं पुनराधानकारणं ॥ १६ ॥
५१ प्रसिद्धः कर्मणां लोप उपघातोऽशुच्यादिना ॥ उपेक्षणं प्र
वासादि प्रमादोग्नेरधारणं ॥ १७ ॥ पक्षेग्निर्यदि चांड
लैरुदक्यादिभिरेव वा ॥ १८ ॥ उपघातेषु सर्वेषु स्वेति सामं
थनं ॥ यजमानश्च पत्नी च उभौ प्रवसितौ यदा ॥ १९ ॥ आ कृष्णे॰ १
होमान्ते निवर्तेत पुनराधानमर्हति ॥ २० ॥ यदावुभावतिक्र
म्य सीमां प्रस्थितौ पुनः ॥ होमकालमतिक्रम्य तदा नश्यंति
वह्नयः ॥ २१ ॥ विनाग्निस्तिर्यदा पत्नी नदीं मंबुधिगामिनीं ॥

अतिक्रमेत तदाग्नीनां विनाशः स्यादिति श्रुतिः ॥ २२ ॥ पत्न्यंतरेण
वा पत्न्यौ हुताशनसमीपगे ॥ तदा पत्नी यथाकाममतिक्रामे
न्नदीमपि ॥ पत्नी सीमामतिक्रांता यजमानो गृहे यदि ॥ आ
होमाद्यदि गेनोच्छेत् पुनराधानमर्हति ॥ २५ ॥ एकाकिनी य
दा पत्नी वह्निमादाय गच्छति ॥ तत्रैनाशोपरेखाद्दुर्भाया धा
नेन दुष्यति ॥ २६ ॥ रजोदोषसमुत्पन्ने सूतके मृतकेपि वा ॥
प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति ॥ २६ ॥ वह्निनामथेचे
केस्याजुदक्यायां तु न वर्जयेत् ॥ एकादशे च तुर्थे ह्निगं तु मि
धिन्निमित्ततः ॥ २७ ॥ चर्योमु वधा तु यो लोभात्प्रवसेत्पर्वसं
धिषु ॥ करोति पुनराधानं प्रायश्चित्तं मरणाद्दृते ॥ २८ ॥ ना
ग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि ॥ आविनाच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निमित्तेन कीडा अघर्ये तु नवं भवेत् ॥३४॥ नदीसंतरणेऽग्नीनां सीमा
८२ तिक्रमणे तथा ॥ सर्वे चापोतसीम्नो वै स्वामी स्पृष्टाः स्पृशन्
यः ॥३७॥ प्रसप्तसमरणीद्वारं वान्यथाग्निविधानं ॥ आत्मारंभ
णपक्षे तु नाचारंभणमिष्यते ॥३८॥ तत्त्ववाचारभेदग्निं पुनरा
धिरूपाहृता ॥ नेवाप्यारंभणं किंचिल्लौगाख्यादग्निं वंध्यनात् ॥३९॥
उदक्या चेद्भवेत्पत्नी प्रसूता प्रवसस्यापि ॥ अन्वारंभविकल्पवा
सुन साधयेन्नेतन्मे ता ॥४०॥ ज्येष्ठा अन्वारभते वान्ये बहुभार्यस्य
तेन राः ॥ नरू चैकाग्निनी पत्नी प्रयापादग्निविधिः सत ॥४१॥ म
ध्यं वादिगमनैः प्राप्ते दैरोमन स्वनी ॥ जुहुयाच्चेतु राच्चेन
समाप्तेन्नौ सर्वमीरित ॥४२॥ सायंप्रातर्हुते सर्वमेवस्याहमनेन्व
हं ॥ यस्त्वाम्माधेयमात्मार्थे धृतेत्वान्यते भार्यकः ॥४३॥ पत्नीवि
रहितो वन्हीन्पथा भामं सन्निधिरेत ॥ होमतु यास पदे दर्शी पू
राश्भं या दिसंप्राद्या क्षुधि गया न मो देशा ॥ अभ्यथाहि सेव

र्णमासौ स्वयेत वा ॥४१॥ पुनरेवाग्निमादध्यादिति भार्गवशासनं ॥
बहुधापि हुतोस्यग्निरावसथ्यः कथंचन ॥ यावदेकोपि तिष्ठ
ते तावदन्यो न मथ्यते ॥ वैश्वदेवात्तथा होमाच्छाडीयं नैव मंथ कु ३
नं ॥ एकेनांतरिते वन्हिरावसथ्यस्तु मथ्यते ॥ आवसथ्या
तु कर्मार्थे योग्निस्तु हूयते क्वचित् ॥४७॥ पूर्णनयो जयित्वा
तं तस्मिन्होमो विधीयते ॥ चतुर्थे त्वतिमते ॥ प्रातर्होमं तु नि
र्वर्त्य समुद्धृत्य हुताशनात् ॥ औपमहानसे हृत्वा तत्र पाकं
समाचरेत् ॥१॥ तेनाग्निं पुनराहृत्य चात्मान्यावे वन्निक्षिपे
त् ॥ ततोस्मिन्वैश्वदेवादि कर्म कुर्यादतंद्रितः ॥४९॥ बहुचकारि
कायां ॥ नित्यं पाकाय चाहालाग्नेरेकदेशाम्सपकायितः ॥ पाका
र्थमुल्मुकं हृत्वा तत्रैव स्वामहानसे ॥१॥ वैश्वदेवोग्न्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गारे स्यात्साकार्थे ग्निस्त्वलौकिकः ॥ भूरिपाको भवेद्यत्र श्राद्धा
दावुत्सवेषु च ॥२॥ हुते च वैश्वदेवे च लौकिकोनैव कार्यतः ॥
होमिनां तद्वितेकेचिदाहुः सर्वच लौकिकं ॥३॥ न तत्समंज
संतेषामुपपद्येमदर्शनात् ॥ समासचोल्मुकं स्यादुद्गन्या
गारेमहानसात् ॥४॥ पाकांते वैश्वदेवाख्यं कुर्वीत तदुप
५२ पद्यते ॥ आहृतेषूल्मुकेपाकः स्याभिन्ने ह्यस्यते प्रोक्तो ॥५५
वचनादाहृतिः सातु लौकिकेस्त्वपवर्गतः ॥ दीपकोधूपकश्चै ५२
वतापार्थं यत्र नीयते ॥६॥ सर्वे ते लौकिका ज्ञेयास्ताव
मात्रापवर्गतः ॥ पचनाग्नौ पचेदन्नं सूतके मृतकेपि वा ॥७॥
अपक्वान्नवसेत्प्राज्ञः पुनराधानमर्हति ॥ अरण्योर्दग्ध
योर्वापि नष्टयोः क्षीणयोस्तथा ॥ आहृत्याग्निं समारोप्य तु

नस्तत्रैव विनिर्मथेत् ॥ अरण्योरप्यमप्येगं यावत्तिष्ठति पूर्वयोः ॥९॥
न तावत्पुनराधानमन्यारण्योर्विधीयते ॥ पूर्वैव योनिः पूर्व
ध्वस्यूनराधानमर्हति ॥१०॥ एकाकिनीय दा पत्नी कदाचिद्धोम
माव्रजेत् ॥ होमकाले तु संध्यासानस्तादोषेण युज्यते ॥११॥ अथ
तत्रैव निवसेद्ग्राममंगत्वा प्रमादतः ॥ लौकिकोग्निः सविज्ञेयस्त
येषा नैयमप्रवृत्तिः ॥१२॥ भार्यायां प्रोषितायां चेदुद्देसकौस्त
मेति च ॥ तत्रैस्यात्पुनराधेयमन्येत्वाहुरिहान्यथा ॥१३॥ पत्न्याः
प्रवासविषये पुनराधिरुदाहृता ॥ वात्स्यायनमनीषिभिः प्रोक्तो
देरुक्तो यस्सरोष्यते ॥१४॥ बहुभार्यस्य जेष्ठा चेत्प्रवसेत्पुनरा
हितिः ॥ ज्येष्ठा चेदग्निसंयुक्ता गच्छेत्यन्या यथारुचिः ॥१५॥ य
जमानेन सहिता यदा ता एव केवलाः ॥ एकस्यामप्यतिष्ठंत्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नग्निहोत्रसमीपतः ॥१६॥ पतितास्तिष्ठति चेदग्निनाशो नेत्यप
रे जगुः ॥ यदा सीमामतिक्रम्य रात्रौ तत्रैव गच्छति ॥१७॥
अग्निहोत्रस्य प्रमाणं यत्प्रवासस्तु च्यते बुधैः ॥ यत्तु नाराय
णोनोक्तं ग्रामाभ्याग्निसमान्वितात् ॥१८॥ ग्रामाद्ग्रामांत
रे वासः प्रवासो परमीदृशः ॥ ग्रामांतरे नगर्यां वा पल्ल्यां
५४ वान्यत्र वा क्वचित् ॥१९॥ सीमामतीत्य चेद्रात्रौ वासः प्रवस
नं स्मृतं ॥ प्रवसेत् नैव संप्रसैनाति अपि कदाचन ॥२०॥ ५४
इति कूर्मपुराणोक्तं तथा बौधायनेन च ॥ सताग्निर्वा स
पत्नीको गच्छेत्तीर्थानि मानवः ॥२१॥ पुराणवचनात् साग्नेः
सो प्रवासोस्तीति केन च ॥ न कुर्युरग्न्युपस्थानं प्रवसन्तोपि प्र

प्रोषिताः ॥२२॥ त्यागान्न प्रोषिताः कुर्युस्प्रश्नं सेवस धर्मकं ॥ आ
गतो पास्थितिं चापि स्त्रीणां नेच्छंति सूरयः ॥२३॥ समन्व
स्य प्रयाणं यत्त सत्यग्निसमन्वितं ॥ कुर्यच्छ्रोत तु वत्स
र्वं मनसा स गच्छति ॥२४॥ अन्यस्यारोपयेदग्नीस
माचाण्यपतत्र च ॥ स्वांगेन वा नयेदग्निं कात्यायन
मतादपि ॥२५॥ न येषां ब्राह्मणस्त्वन्यो योपा ... न सम
न्वितः ॥ प्रत्यक्षेण न पन्ने ग्निमुपस्थास्ते दिने स्यात् इति ॥२६॥ चे५
यदि वानुपस्थास्य नीतानि धायो पस्थास्यते पुनः ॥ हरेदनुपस्थ से
नेव न स्यात् विहरणे नलः ॥२७॥ आकटेनापि दूरं वा हरेदेवं
यथारुचि ॥ स्वांगे नैवाथवा ताभ्यां परास्ता प्रोढ्ये पेपस्तत्र ॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मार्थं हरणोग्नीनां नानुष्ठा सादिर्चोद्यते ॥ कात्यायनमतात्के
चिच्छुसंतिपातिद्दूरतः ॥२९॥ प्रसक्तेण नयंत्यग्नीन्त्राधदेन
विना पितुः ॥ आधानावसरे जातेयद्याधातुरूपद्रवः ॥३०॥ अ
वद्धिर्नामसाध्यो जातत्रस्यात्तुनराहितिः ॥ उद्धातेग्नौ विहारा
५५ धाकुमथ्यमाने प्यजन्मनि ॥३१॥ लौकाग्न्यादावनिर्द्धिसे ५५
भुद्येस्तमयेपि वा ॥ विनष्टहेतुनानेनजातवेदोविन
श्यति ॥३२॥ विलंबोत्तरकालं वानष्टौ पूर्वापरानलौ ॥ द्वौ
पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति ॥३३॥ कालात्ययेत्
त्वेतैर्मथ्यलौकाग्न्यादिक्षिपे घादि ॥ उदयास्तमयात्पूर्वं
नौचानात्राणिगच्छति ॥३४॥ लौकाग्न्यादावलब्धेपि पुनस्ता
स्तमयोदयात्ते ॥ मंथनारंभमात्रेणनाग्नौ वज्जौनिर्गाहुतः ॥३५॥

ऽनयोर्नाशाविज्ञानादूर्ध्वमस्तमितेति चेत्तदाकौशिनाशमा
चष्टेपश्चात्तातेपिनेछौलि ॥३६॥ द्वनयोर्नित्यपक्षेपिसर्वोग्न्यनुग
मो यदि ॥ उदयास्तमयेतत्र नाशामेकेनतुभयोः ॥३७॥ अथचेदु
भयोर्द्दर्ष्टिमुदयास्तमयासुरा ॥ पुरोग्निरेको जातश्चेत्तावताप
नश्यति ॥३८॥ तदनुसन्तिमात्रेणस्यादग्न्याधीर्नपूर्वयोः ॥ मंत्रं
विनासमारूढोरण्योरात्मनिवायदि ॥३९॥ तत्रजलनन्नूतौ तेस्याद
समारूढ्यांतिवत्र ॥ आरूढोपि यथा शास्त्रमवरूढो नशास्त्रतः ॥४०
हृतीयेहोमकालेथसंधायेपुनराहितिः ॥ यदातुलौकिकाग्न्या
दिर्विधायत्रवनंतदा ॥४१॥ हुतेपि लौकिकाग्न्यादौ मथ्यमानोप्य
नंतरं ॥ द्वितीयाद्वा तृतीयाद्वा होमकालासुरायादि ॥ अग्निर्न
जायते तत्र पुनराधेयमाचरेत् ॥ हुतेषु पक्षहोमेषु पक्षेनवमम
नंतरं ॥४२॥ कर्तव्यं पुनराधेयं मथ्यमानो हुताशनः ॥ दृष्टमात्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुगच्छेद्ग्नेतच्च तस्य विनाशनं ॥४४॥ गतश्रीर्नुगामे चान्ये पुनर्नि
र्मथ्य जप्यते ॥ नष्टे मथितमात्रे वा समारोपयजुर्जपेत् ॥४५॥ पुन
र्निर्मथ्य जप्य मंत्रमनुत्सृष्टावरोहणं ॥ जोलैर्न्नेहितुना रूपश्रौ
तो पदा भवेत् ॥४६॥ गतेग्नौ पुनराधेयं यज्ञपार्श्वे निरूपितं ॥ तदे
व पुनराधेयमन्य वनुगते सति ॥४७॥ असमाधाय चेत्स्वामी स्वी
ग्रामुल्लंघ्य गच्छति ॥ स्वभूकरासभंजाकरगालैः कुकुक्कुमर्क
५६ टभूः ॥४८॥ अंसाजपातकैः क्लिष्टैः कृणपैः सूतिकयाविरजस्वल ५६
या ॥ रेतोमूत्रपुरीषैर्वा पुयाश्रुश्लेष्मशोणितैः ॥४९॥ दुष्टास्पृष्टमां
समज्जास्थिरन्यैर्वापि जुगुप्सितैः ॥ आरोपितौ सपिस्पर्शे हरते
न्नौ स्पर्शनेपि वा ॥५०॥ आत्मारूढे पुमग्नौ दावदग्धापतितादिभिः ॥
अथवा योषितं गच्छेदन्नतौ क्रमोहितः ॥५१॥ नदं सेतुनिमित्तेषु
केचिदग्निविनाशनं ॥ तच्चारणिगते वन्हौ नदृश्या पुनराहितिः ॥५२॥

इतरेष्वनिमित्तेषु वाग्न्याधेयं परिक्षते ॥ यद्वा सर्वेपि घातेषु पुनस्त्वे
ति समिंधनं ॥ द्रव्यस्याप्युपघातेषु द्रव्यशुद्धिः समिंधनैः ॥ समिं
धनं ॥ पुनस्त्वादित्यास्स्रावसव इति मंत्रेण समिंधनस्याप्यग्नेः पुनरिं
धनप्रक्षेपेण प्रदीपनं करणं ॥ आरोपितारणी चोरैः श्वकावा यदि
नश्यति ॥ तत्राग्न्याधेयमिच्छंति पुनराधेयमेव वा ॥५४॥ इष्टसमा
रोपितारण्योः क्षयेग्न्याधानमेव न ॥ तदलाभे यदेच्छा यादृग्रस्याः पु
नराहितिः ॥ स्व स्रोदक्यांसचोरैः श्वपतितामेध्यरासभैः ॥ अना
रूढारणिस्पर्शे नैव हायोन्ययोर्न्तह ॥५६॥ भवतन्नसमेत पुम
ज्ये हृषितारणी ॥ एकारण्येव दुष्टे चेत्तामेवाप्सु निमज्जयेत् ॥५७॥
तत्रान्यारणिलाभाभ्यामुद्घाते पुनराहितिः ॥ काष्ठमग्धविधी
धोयात्मजे द्वे वेति संततेः ॥५८॥ नष्टायामरणौ यावदग्निः स्थित
तिर्वैतस्मिन् ॥ तावत्क्षेमादिकं सर्वं तन्त्रोः पुनराहरेत ॥५९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाम्यागमनपर्यंतमुत्सृज्य व्याहृतिरोषणः ॥ अग्न्याधेयादिकं प्राग्यं
प्रमादिस्योदयाद्धोमं संकल्प्यं न जुहोति चेत् ॥ अग्न्याधिपुनराधियं
नोभयस्वाम्यसंनिधौ ॥६०॥ नाशापहारावग्नीनां यद्यारूढारणौ यदा ॥
कुर्याच्च पुनराधेयमिति बौधायनोब्रवीत् ॥६१॥ अन्येतेषु
निमित्तेषु नष्टानां पुनराहितिः ॥ सिद्धा तानुत्सृज्य चान्येषु पुनराधे
यमिष्यते ॥६२॥ अग्निहोत्रं यनित्यमिष्टिः पितृयज्ञोर्चितं त्रयं ॥ कर्त
२७ व्यं प्रोषिते पत्यो नान्यस्वाम्यभिक्रियान्विता ॥६३॥ नैमित्तिकास्तु
जातेष्टिश्राद्धदाहेष्टिपूर्वकाः ॥ स्वाम्यागमनपर्यंतमुत्सृष्टव्य
मसंशयं ॥६४॥ मथितापावकं सर्वं प्रायश्चित्तं विधाय च ॥ मिन्दा
येत्यादिभिर्हुत्वा द्वाद्शानुगमाहुती ॥६५॥ अग्निहोत्रं यथाका
लं निरूप्येष्टिं च समाचरेत् ॥ आस्वाम्यागमनात्तिष्ठेदागत्याथा
दधीत सः ॥६६॥ एवं मे मा विसिष्ठं तां जोषितस्याग्निहुतक्रियाः ॥
अवश्यं भाविनी मुख्याद्धनावश्योमतां तरं ॥६७॥ काम्याः क्रि

यान कर्तव्याः स्वामिनि प्रोषिते सति ॥ नित्यनैमित्तिकीः कुर्याः प्र
वसत्यपि भर्तरि ॥६८॥ तत्रापि नैव कर्तव्याः क्रियाः सोत्तरवेदिकाः ॥
आधानपुनराधाने च सप्तैन प्रवसिति ॥६९॥ उभयानुगमा
द्वौ तु प्राप्तेग्न्याधेयतः पुरा ॥ न किंचिदग्निहोत्रादि कर्तव्यमिति दर्श
ने ॥७०॥ रजोदोषसमुत्पन्ने सूतके मृतकेपि वा ॥ नित्यं नैमित्तिकं ३
कुर्यात्काम्यं कर्म न किंचन ॥७१॥ आधानं पुनराधानं शुः पंसौ
त्रामणीतथा ॥ चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ॥७२॥
अकाम्यत्वेपि नैतेषां सूतकादावनुष्ठितिः ॥ प्रक्रांतेष्वपि चैते
षु सूतकादिसमुद्भवे ॥७३॥ कर्तव्यान्येव चैतानि वर्जितान्यया
श्रोषतः ॥ जातोपि वा विनाभस्मस्पर्शाज्ञातजपं विना ॥७४॥
प्रायश्चित्तं विना कार्यं पनं चोदितं विना ॥ लौकिकस्माद
तोल्लुप्तादारभ्यावर्तयेत्सुनः ॥७५॥ यदिनावर्तयेद्वन्हौ तोतार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो यज्जुहोति च ॥ हूयमानेपि लुप्ते तु होमकालाष्टकास्परं ॥६९॥
न स्मार्ताग्निं विना पैत्र्ये कौशिकस्त्वं न मन्यते ॥ होमाष्टकाधिके लु
प्ते ध्वंतोप्याग्निर्विनश्यति ॥७०॥ अतो न्या होमलोपेपि यद्यग्नो
द्भिनश्यति ॥ आधानं पुनराधाने विकल्पेनात्र चोदिते ॥७१॥
लुप्ते होमद्वये प्राह लोगाक्षिरनलाहितिं ॥ अबलस्त्वग्निपुत्रकृते
२८ या तं तु न सेवके वलो ॥७२॥ आपद्यग्निघुदीप्य सुमासार्धं चे २८
न्न हूयते ॥ सर्वे होमान्नातिक्रांतान्यक्षांतान्यक्षे होमवत्तर ॥७३॥
समस्य जुहुयात्सप्तम्यादिष्टितं तु मतीभवेत् ॥ न तत्र पुनराधे
यमिति कौषीतकिः स्मृतेः ॥७४॥ संवत्सराधं वा होमलोपे मतां
तरं ॥ आपत्काले न नश्यंति दीप्यं चेद्धुताशनः ॥७५॥ पंचका
यीः पुरोडाशा होमे लुप्ते धंवत्सरं ॥ पवित्रस्य च मोक्षे यः पा
वकः शुचिरेव च ॥७६॥ व्रतपतिस्तं तु मांस्र्यग्ने दैवतानां गुणाः

कमात्र ॥ सप्तकुर्यात्पुरोडाशा होमे लुप्ते तु वत्सरं ॥७७॥ पावमानः
पावकश्च शुचिः पथिकृद्दिसोपि ॥ वैश्वानरो व्रतपतिस्तं तु मा
निति सप्तमः ॥७८॥ विशेषतोग्निरेवस्या देवता त्र यथाक्रमं ॥
एकोरं भ परार्धंतं विच्छेदे षाविशेषतः ॥७९॥ मनस्विनी व्रतपु
तामाधानमनलेसति ॥ हूयमापस्तु घोरासु मिलिता सूपयोक्ष्य
ते ॥८०॥ द्वादशाहाहुति छेदे कुर्यु रम्येमनस्वतीं ॥ अरण्योः स्व
यनाशाग्निर्हादे षानि समाहितः ॥८१॥ पालयेदुपशांते स्मिन्पु
नराधानमिष्यते ॥ एकारण्यां विनष्टायां मस्त चेदितरारणिः ॥८२॥
तां छित्वा मंथनं प्रोक्तं मार्ष्येवौपासनीयके ॥ अरणीमंथना
शक्तेजें तु मिर्मथनेन वा ॥८३॥ स्यादंचेदरणीनूनेयाद्येशास्त्रो
क्तलक्षणे ॥ वोप्त तेनुष्ठिते दर्शे तस्मिञ्जीर्णारणि द्वयं ॥८४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाकलीं इरसपाश्चात्येवन्हौ निक्षिप्य दीपयेत्॥ ततो दक्षिणहस्ते
नन्नूतनामुत्तरारणिं ॥८४॥ गृहीत्वा सव्यहस्तेन गृह्णीयादधरा
रणिं ॥ ते उभे अरणी तत्र दीप्तेग्नौ धारयन् जपेत् ॥८५॥ उद्बु
ध्यस्वाग्नइत्येतदृचं ते योनिरित्यपि ॥८६॥ उद्बुध्यस्वाग्ने प्रति
वास्व योनिमन्यां देवयज्या पैवो हव्यं जातवेदः ॥८७॥ अरण्यो
५६ ररणी अनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्वेति प्र ५६
थमो मंत्रः ॥ मंथनं स्यात् ततः सम्यक् समिद्धे त्वाग्निं विहृत्य च
विलाप्याज्यं यदर्भाभ्यां स्रुच्यादाय चेतु घृतं ॥ जुहोत्याह
वनीयेग्नौ मनस्वत्या घृतं यथा ॥८८॥ इष्टिं तन्तुमतीं कुर्या
च्छक्त्या वं दक्षिणां ददेत् ॥ वत्तं प्रादेशमात्रं तु द्वारावंनिर्मितो
दितं ॥९०॥ इत्यनारोपितारण्योः क्षेपे प्राहि नवे पुनः ॥ तदला

भेयदोहयेत्तदास्यात्पुनराहितिः ॥९१॥ नामे निर्मित योगे वा पुन
राधेयमिष्यते ॥ निमित्तेषु यथा योगमाधानमिति वा भवेत् ॥९२॥
तत्र येषु निमित्तेषु प्रसंगग्राहिका विधिः ॥ तत्रैव पुनराधेयमन्य
थाऽधानमिष्यते ॥९३॥ अन्ये त्वापपरे प्राहुः पुनराधिर्विकल्पि
तः ॥ यदिष्टं जीवनायाप्यालंघ्य द्वे चास्येकवत्सरं ॥९४॥ तन्त्राद्रो पु
त्रैमस्यायां ज्ञातीनामवरोधने ॥ अंगनाद्रोगनाशे पुनरा
धानमिष्यते ॥९५॥ ज्यानिः सर्वनाशादिः स्यात्स्पष्टं माध्यंदिनी
श्रुतेः ॥ पुण्याग्नयो निधुर्वी तत्त्वदुधानो विमत्सरः ॥९६॥ न तत्स्य द
क्षिणेयर्हैर्यजते हव्यं च न ॥ इंद्रियाणि यज्ञः स्वर्गमायुः कीर्तिं
प्रजां पशून् ॥९७॥ हंत्यल्पेन धनेनैव विप्रोनल्पधनो जयन् ॥
॥ इति पुनराधानपुनराधेययोर्निमित्तानि ॥ ॥ अथ पुनराधाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.द. ५१

पदार्थक्रमः ॥ तत्र प्रथमदा त्रिरात्रमग्नित्यागे प्राणायामशतं विंशति
रात्रे एकदिनोपवासः ॥ मासद्वये त्रिरात्रमुपवासः ॥ त्र्यब्दे प्राजा
पत्यं कृच्छ्रः ॥ एवं त्यागानुसारेण प्रायश्चित्तं कृत्वा पुनराधानं ॥ आ
लस्यादिना बुद्धिपूर्वकमग्नित्यागे तत्तत्कालानुसारेण द्वादि
प्रायश्चित्तं ॥ द्वादशाहपर्यंते त्रिरात्रमुपवासः ॥ मासपर्यंते द्वा
दशरात्रमुपवासः ॥ अब्दपर्यंते मासं पयोव्रतं ॥ द्विवर्षपर्यंते
६० चांद्रायणं ॥ अब्दपर्यंते चांद्रायणं सोमायनं च ॥ तेषु धेनुमन ६०
डुद्धौ धनिनो गोदानं च ॥ प्रयोगपारिजाते ॥ स्मृत्यर्थसारे तु ॥
द्वादशाहातिक्रमे अहमुपवासः ॥ मासातिक्रमे द्वादशाहमुपवा
सः ॥ संवत्सरातिक्रमे मासमुपवासः ॥ पयोभक्षणं वेति विशेषः ॥
एवं कालविलंबे संकल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनराधानं ॥ य
त्र तु येन केनापि निमित्तेनाग्निनाशः कालविलंबश्च नास्ति तत्र

इति भरणीपक्षे समारोपः ॥ आहरणपक्षे तु अयं ते योनिरिति मंत्रेणाश्वत्थसमिधमावसथ्ये प्रत
प्रायश्चित्तमकृत्वैव पुनराधानं ॥ निरुक्तायां विधायदेशकालौ पति॥
संकीर्त्य तावंतं कालमावसथ्याग्निविच्छेदजनितप्रत्यवायपरि १२
हारार्थं एतावत्प्रायश्चित्तममुकप्रत्याम्नायद्वारेणाहं करिष्य इति
संकल्पः ॥ ॥ लुप्तानां होमानां तंदुलादिद्रव्यं ब्राह्मणाय प्रदद इति
होम्यं दद्यात् ॥ सायंप्रातर्होमानां तद्वा द्वादश्यां पूर्णमासस्थालीपाका
नां संपत्तिपर्याये पत्रद्वीर्घादिद्रव्यमाज्यं चरुद्रव्यादिति प्रयोगरत्ने ॥
ततः शुचौ काले शुचिराचांतः प्राणानायम्य देशकालौ स्मृत्वा वि
च्छिन्नावसथ्यस्य पुनराधानं करिष्ये इति संकल्पः ॥ नांदीश्राद्धं सा
वः ॥ रजरेपं चशूसंस्कारादि ब्राह्मणतर्पणांतं आधानवत्सर्वं का
र्यं ॥ ॥ अथ सभार्यस्य प्रवासप्रसक्तौ अग्निसमारोपविधिः ॥ प्रातर्
होमानंतरमरणीद्वयं ते योनिरिति मंत्रेणाश्वत्थसमिधमावसथ्ये
प्रतपति ॥ अथवा यातेअग्ने यज्ञिया तनूस्तया ह्यारोहात्मात्मानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५८ ५८

म घृतावस्नुनिधृहण्वत्स्मे नर्यापुरूणि यज्ञोभूत्वायज्ञमासी
दस्यां योनिं जातवेदो भुव आजायमानः सक्षयएहि
ति मंत्रेणपाणीप्रतप्यात्मन्यग्निसमारोपयेत्॥ तत्रप्रादुष्करण
काले अरणिसमारोपे अरणिमेथ्यप्रत्यवरोह जातवेदः पुन
स्त्वं देवेभ्यो हव्यं वहनः प्रजानन्॥ प्रजांपुष्टिं रयिमस्मासु धेह्य
था त्वयजमानाय यज्ञंप्रौः॥ इत्यनेनखरेग्निस्थापनं॥ अथख
६१ समित्समारोपणे वैयादिगृहादीनमावृत्यखपंचाः॥ अग्न्या
संस्कृतात्स्वाग्निंस्थापयित्वा प्रत्यवरोहेतिमंत्रेणतांसमि ६१
धमग्नौनिदध्यात्॥ आत्मसमारोपपक्षे सर्वदास्वच्छयस्यस
र्शनं जलेनिमज्जनं स्नानं स्त्रीगमनं वा कुर्वन्मूत्रपुरीषोत्स
र्गौ कृत्वा च महद्धरत्वाचिरकालमति प्रतस्य होमकाले आत्मस
मारूढमग्निमुद्बुध्यस्वेति प्रत्यवरोहेतिमंत्रेणलौकिकाग्नौ

निदध्यात्॥ एवंयथाधिकारमग्निं प्रतिष्ठाप्य होमं कुर्यात्॥ ॥
इदसमारोपणं॥ द्वादशरात्रपर्यंतमेव कुर्यादितिप्रयोगरत्ने॥
कातीयानांत्वरणिसमारोपः॥ ओते इष्टस्तु इस्मात्ते पिक
र्यः उक्तत्वात्॥ इतिशिष्टाः॥ समित्समारोपणोक्तिः अयंतेयो
निरितिमंत्रेण समारोप्य प्रादुष्करणकाले लौकिकाग्निं स्था
पतत्रतं कृंसमिधमादध्यादितिवृद्धाः॥ वस्तुतस्तु काती
यानामपि समित्समारोपः॥ शाखांतरोक्त एव भवति॥
अनुक्ते समित्समारोपस्य श्रावणायां॥ आवसथ्याधानं दारकाल
स्यात् इत्युक्तं॥ कारयवहणं कथं क्रियते तदुच्यते॥ तत्रवरस्यार्घ
दानस्मर्यते॥ तत्प्रसंगेन यावंतोर्घास्ते कथ्यंते॥ षड्र्घ्याहीभ
वंति॥ अर्हपूजायामिति धातोर्भावे घञ्प्रत्ययः॥ कन्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्वा स्कुर्वं ॥ ततोदंड आदिभ्योयदिति यत्प्रत्ययः ॥ अर्घमर्हतीत्य
र्घ्यः ॥ षड् पुरुषा अर्घार्हा भवंतीत्यर्थः ॥ तानाह ॥ आचार्य ऋत्वि
ग्वैवाह्यो राजा प्रियस्नातक इति ॥ उपनयनपूर्वकं सरहस्यवेदा
ध्यापयिता आचार्यः ॥ ऋत्विक् यो दक्षिणापरिक्रीतः कर्मा
णि करोति ॥ वैवाह्यः जामाता ॥ राजा दंडपूर्वकं परिपालन
६२ कर्ता ॥ प्रियो द्रष्टः उत्कृष्टजातिः समानजातिर्वा ॥ स्नातको
ब्रह्मचर्यात् समावर्तितः तस्य चार्हणमाचार्यमर्हन्क [redacted] ६२
स्मृतं ॥ तं प्रतीतं स्वधर्मेण ब्रह्मादं पहरं पितुः ॥ स्रग्विणं त
ल्प आसीनमर्चयेत्प्रथमं गवेति ॥ पूर्वसूत्रे षड्ग्रहणं ॥ प्र
यस्मात्तयोः पृथक् स्थापनार्थं ॥ प्रतिसंवत्सरानर्हयेयुः ॥
प्रतिसंवत्सरं गृहे आगतानाचार्यादीनर्घेणार्चयेयुः ॥ ॥

न संवत्सरादर्वाक् ॥ प्रतिसंवत्सरानर्हयेयुरित्यविशेषेणोक्तत्वादृ
त्विजोपि संवत्सरांतर्हमिति प्राप्ते आह ॥ यक्ष्यमाणास्त्वृत्विजः ॥
ऋत्विजस्तु यक्ष्यमाणाः यागकाल एव पूज्याः पूजनीयाः ॥ न
तत्रैव संवत्सरं हरिहरेणान्यथा व्याख्यातं ॥ यज्ञं करिष्यंतो
यजमानाः ऋत्विजो याजकानिति पूजनीया उक्ताः ॥ तत्काल
स्य इदानीमर्हणप्रकारमाह ॥ आसनमाहार्याह साधु भ
वानास्तामर्चयिष्यामो भवंतमिति ॥ अर्घयासनं पीठा
दि आसनमाहार्येति शेषपूर्वकं अनुचरद्वारानाप्य साधु
भवानित्यर्चयिता अर्घ्यं प्रतिवदतीति ॥ अर्घं प्रयच्छे
दर्णामेतत्त्व ॥ आहरंति विष्टरं पद्यं पादार्थमुदकमर्घमा
चमनीयं मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहुवचनादर्घे पितुः पुरुषाः विष्टरादीनि आरंति ॥ तत्रविष्ट
रस्विवृदरत्निमात्रैः कौशोरज्जुविनोपकल्पितस्ते हरियज्ञः ॥
मा॰श्रा॰ श्राद्धेत्रोत्रिरतैमौद्गांवाकारानिर्मितमिति रेणुकः ॥ पंच
विंशतिदर्भैतरुणंपर्णू चेमितिहरिहरः ॥ पंचाशाद्भिर्वे
हुस्मातदर्भैनतुविष्टरइतिपरिशिष्टात्र ॥ पादयोरन्यमिति
वचनादत्रद्वयोरात्तरणमितिभर्तृयज्ञः ॥ पद्यंपादयोरप
स्तान्निधानार्थं विष्टरं ॥ भर्तृयज्ञमतेपादप्रक्षालनार्थं
६३ मुदकंपपद्यशब्देन पाद्यर्थमुदकंसुखोष्णं ॥ अर्घशब्देनोद
पात्रमेवोच्यते ॥ तद्धेनुउदपात्रमुपनिनयंति ॥ यथाराजा
नआगतायोदकमाहरेदेवंतद्दतिलिंगात्र ॥ उदकगंध
पुष्पाण्यक्षतवदराणीति भर्तृयज्ञः ॥ गंधपुष्पाक्षतकुशा

तिलसुप्तसर्षपदधिदूर्वादध्यन्वितंसुवर्णादिपात्रस्थमि
तिहरिहरः ॥ आचमनीयमाचमनार्थमुदकमेवदधिमधुघृत
एकस्मिन्कांस्यपात्रेधृतमपरेणापिहितंमधुपर्कशब्देनोच्य
ते ॥ मधुपर्कैपयोजलंवाप्रतिनिधिः ॥ मध्वलाभेचतंगुडं
वेसाम्बलायनः ॥ अन्यांश्चैः स्विःप्राहविष्टरादीनि ॥
[redacted] अर्घपितुरस्योविष्टरादीनिद्रव्याणित्रिस्त्रिःवा
रत्रयंवदति विष्टरोविष्टरोविष्टरः प्रतिगृह्यतामित्येवं
विष्टरंप्रतिगृह्णाति ॥ वर्ष्मोस्मिसमानानामुद्यतामिवसूर्यः
इमंतमभितिष्ठामियोमाकश्चाभिदासतीत्येनमभ्युपविश
ति ॥ ततोर्घ्यो र्घःपितुःसकाशाद्विष्टरंतूष्णीमेवप्रतिगृह्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं विष्टरं आसनेनिधाय वर्ष्मोस्मीतिमंत्रेणोपविशति ॥ ग्रहणो
पवेशनयोर्मध्येपठितोपिमंत्रः इमं तमभितिष्ठामीतिलिंगादु
पवेशनेविनियुज्यते ॥ पाणिभ्यां विष्टरं प्रतिगृह्य इतिहरिहरः ॥
तदतीवमंदं ॥ प्रमाणाभावात् ॥ मंत्रस्यायमर्थः ॥ अर्घ्यआत्मानं
स्तौति ॥ अर्घ्यो वा य कुलशीलाचारवपुर्गुणैरहं समानां जाती
६४ यानां मध्ये वर्ष्मा श्रेष्ठः ज्येष्ठः अस्मि भवामि ॥ उद्यतां उदयं प्राप्नो ६४
तं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव ॥ इमं विष्टरं तं पुरुष
मुद्दिश्यपविष्टरवद्धं अभिलक्षीकृत्य तिष्ठामि ॥ अधः स्थितो
पर्युपविशामि ॥ यः कश्चन मा अभिदासति ॥ उपक्षीणं
तुमिच्छति ॥ दधि उप [illegible] पादयोरन्यं विष्टरं आसीनाय वि
ष्टरे आसीनाय उपविष्टाय अर्घ्यपाद्ययोरधस्तान्निधानाय

मन्यं विष्टरं ददाति ॥ एतच्च पादप्रक्षालनोत्तरं द्रष्टव्यं ॥ तत्रासति
दृष्टार्थतास्यात् ॥ प्रक्षाल्य हि पादौ विष्टरो क्रियेत इति नैनां च पाह गार्ध्येः
बाधः ॥ तदुक्तं विरोधे धर्मस्तत्परत्वादिति ॥ सव्यं पादं प्रक्षाल्य दक्षि
णं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमं ॥ विराजो दोहोसि वि
वि राजो दोहमशीयमे पाद्यायै विराजो दोह इति ॥ ततः पाद्यं प्राति ८
घ विराजो दोहोसीति मंत्रेण सव्यं पादं प्रक्षाल्य दक्षिणं प्र
क्षालयति सचेदिर अर्घ्यश्चेद्ब्राह्मणोर्घ्यः स्यात्तदा दक्षिणं पा
दं प्रथमं प्रक्षाल्य ततः सव्यं प्रक्षालयति ॥ मंत्रार्थः ॥ प्राणधा
रणादिगुणैः सकलसौहित्येनाविर्विधीयते राजत इति विराड यि
न्नं तस्य विराजो दोहः परिणामसारो रसः स त्वं असि भवसि ॥
तेन दत्तं त्वां विराजो दोहं अशीय ॥ अश्नुवे मा नु यां ॥ कंच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयि विप्रसे पाद्यायै पादयोः साध्वी सपर्या तस्यै तदर्थं विराजो दो
हः मंत्रसंस्मरतं जलं भवेति शेषः ॥ अर्घं प्रतिगृह्णात्यापस्थयुष्मा
भिः सर्वान्कामानवाप्नवानीति ॥ अर्घः समर्पितम् अर्घं प्रतिगृ
ह्णाति आपस्थयुष्माभिरिति मंत्रेण मंत्रार्थः ॥ हे आपः यूयं आ
प स्थ आप्नुहि तेव स्तव थ ॥ युष्माभिः ह्र वासर्वान्कामानभि
प्रार्थान् अवाप्नवानि त्वमेयं ॥ निनयन्नभिमंत्रयते समु
द्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकं वीरा
मा परासेचि मत्पयइति ॥ तमर्घं भूमौ निनयन्नापयन्न
भिमंत्रयते ॥ समुद्रं व इति मंत्रेण ॥ नतु मंत्रांते अर्घं शिरसा
स्विवं घ्राणानुदग्वा निनयन्निति वासुदेवः ॥ मंत्रार्थः ॥ हे आ
पः वो युष्मान्समुद्रं प्रहिणोमि गमयामि ॥ अतः स्वां योनिं स्व

कारणभूतं समुद्रं अभिलक्षीकृत्य गच्छत प्रजत ॥ किंयुष्म
त्प्रसादात् अस्माकं वीराः पुत्राः भ्रातरः अरिष्टाः अनुपहताः
संतु ॥ मत्तः पयः अर्घ्यादिजलं मा परासेचि ॥ अपगतं मा
स्तु ॥ सदैवाहमर्घ्यो भवानीसर्थः ॥ आचामत्यामागन्यशू
सासंसृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानामधिपतिं
पशूनामरिष्टं तनूनामिति ॥ ततो दत्तमाचमनीयं प्रतिगृह्य ॥
आमागन्नित्याचामति सकृदुह्ययति ॥ ततः स्माती चमन ॥ मं
त्रार्थः ॥ हे वरुण जलेश्वर तमेव रूपेण यामा श्रितं मां मा पयसा
सह भावं सामीप्यं वा आगन्व ॥ आगमय ॥ आङ्पसर्गो गन्नि
ति क्रियापदेन संबध्यते ॥ तथा वर्चसा ब्रह्मवर्चसेन संसृज
संसृष्टं कुरु ॥ किं च प्रजानां पुत्रपौत्रादीनां प्रियं पशूनां गो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्वादीनामधिपतिं स्वामिनं च तथा तनूनां देहावयवानां शरीराणां
वा अरिष्टं अहिंसकं कुरु ॥ हे सात्रानेस्यामेनवेदानामाचारस्य
चलं घनात् ॥ ओ नकस्याद नेदोषा अमसर्वं ग्रान्त्यजिघांस
तीत्यादि दर्शिता ॥ मित्रस्यत्वेति मधुपर्कं प्रतीक्षते ॥ ततो ऽघ्यौ
दीयितु हस्तस्थितमधुप इति तं मधुपर्कं मित्रस्यत्वेति प्रात्रेण
६६ मंत्रेण प्रतीक्षते ॥ पश्यतीत्यर्थः ॥ देवस्य त्वेति प्रतिगृह्णा
ति ॥ ततो देवस्य त्वेति प्राशित्रे त्विति प्रकल्पामंत्र[illegible]मधुपर्कं ६६
प्रतिगृह्णाति ॥ सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्र
यौति ॥ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृं
तामीति ॥ तं मधुपर्कं सव्यहस्ते कृत्वा दक्षिणस्य हस्तस्या
नामिकयांगुल्या प्रदक्षिणं त्रिरालोडयति ॥ नमः श्यावास्या

यामितिमंत्रेण ॥ अत्र सव्यहस्तस्थितस्यैव दक्षिणस्याना
मिकया त्रिरालोडनं यथास्यादित्येतदर्थं दक्षिणग्रहणं ॥
मंत्रार्थः ॥ हे अग्ने ते तुभ्यं नमः ॥ किंभूताय श्यावास्याय कपि
शमुखाय ते तव अन्नाशने अघले यन्मे स्याश्यायेन अ
दनीये मधुपर्के कृत्स्नं छांदसः ॥ यद्द्रव्यमाविद्धं संश्लिष्टं
म अदनीयं तेन्निष्कृंतामि छिनद्मि रस्यामि ॥ अनामिकांगुष्ठे
न च त्रिर्निरुक्षयति ॥ मधुपर्कैकदेशं पात्राद्बहिः प्रक्षि
पति ॥ यत्राद्यासंप्रतिसंयवनं निरुक्षणं ॥ एवं च निरुक्षे
ण यव धानाद्यप्रतिसंयवनं मंत्रावृत्तिः ॥ तस्यात्रिः प्राश्ना
ति ॥ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं ॥ तेनाहं म
धुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोसानीति॥ तस्येसर्वयवलक्षणाषष्ठी॥ तस्यमधुपर्कस्यावि:
प्राश्नीयाद्यन्मधुनोमधव्यमिति अनेनमंत्रेण॥ श्रोत्रियमत्र
पिपिहविर्गृह्णन्त्यापेनमंत्रावृत्तिः॥ उच्छिष्टस्यैवमंत्रोच्चा
रणं॥ एवंहिस्मरंति॥ तांबूलेन्दुफलेचैवभुक्तस्नेहानुले
पने॥ मधुपर्केचसोमेचनोच्छिष्टमनुरब्रवीदिति॥ मं
त्रार्थः॥ हेदेवाः मधुनोमधुरंदस्यापत्तंमधव्यंमधुनसा
धुपरमंडरस्यरूपयति प्रभोत्रायाति॥ देहसंघातमि
तिरूपं अन्नाघंत्रीह्यादिवस्याणधारणं अन्नोपाद
नकंच॥ तेनसर्वरूपोपपन्नेनरसेनऊर्कविशेषेणावि
शिष्टेनाहंपरमःसर्वेभ्योगुणाधिकःमधव्यः मधुपर्की
णः॥ अन्नादःसदन्नभोक्ताचअस्तानिभवानि॥ मधुमतीभि

वीप्रहृचं॥ वाविकल्पेनमधुवाताऋतायतेइतिएताभिर्ऋग्भिःप्रा प्रसव्यं
श्नाति॥ ततश्चैवंमधुवाताइतिप्रथमं॥ मधुनक्तमितिद्वितीयं॥
मधुमान्नइतितृतीयं॥ पुत्रायांतेवासीनेवोत्तरतआसीनायो
च्छिष्टंदद्यात्॥ अवत्रीष्टंमधुपर्कस्योच्छिष्टंपुत्रायअंतेवासि
नेश्रोत्रियायवोत्तरतउपविष्टायदद्यात्सर्वंवाप्राश्नीयात्॥
अथवासर्वंस्वयंप्राश्नी..ति॥ प्रागसंचरेनिनयेत्॥ प्राकू
प्रान्त्यांयत्रजनाःनसंचरंति॥ तस्मिन्असंचरेमधुपर्कशे
षंप्रक्षिपेत्॥ आचम्यप्राणान्संमृशति॥ वाङ्मआस्येनसोःप्रा
णोक्ष्णोश्चक्षुःकर्णयोःश्रोत्रंबाह्वोर्बलमूर्वोरोजोरिष्टानि
मेंगानितनूस्तन्वामेसहेति॥ आचम्यवाङ्मइत्येतैर्मंत्रैःप्रति
मंत्रं॥ यथालिंगप्राणायतनानिसंमृशतिहस्तेनस्पृशति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६४ सर्वत्र साकांक्षत्वात् पदस्यास्ति सध्याहारः ॥ अरिष्टानि मे गात्राणि तनू
रिस्तत्र संति स ध्याहारः ॥ मे पदस्य सर्वत्रानुषंगः ॥ नन्वध्याहारा
नुषंगयोः को विशेषः उच्यते ॥ अनुषंगः श्रुतपदानयनं ॥ अ
ध्याहारः अश्रुतपदस्य लौकिकस्यानयनं ॥ वाक्यनिराकां
क्षार्थं प्रयोजनं चाध्याहृतपदस्य संहितावत्प्रयोगो न भ
वति ॥ सावसानं प्रयोगः स्यर्थः ॥ अयमर्थः कथं पाध्या
येरपि प्रयुक्तमंजनप्रकरणे प्रदर्शितः ॥ अत्रैवं वाक्यम् आ ६८
स्येऽस्त्विति मुखं ॥ नसोर्मे प्राणोऽस्त्विति नासिकाछिद्रद्वयं यु
गपत् ॥ अक्ष्णोर्मे चक्षुरस्त्विति अक्षिद्वयं युगपत् ॥
कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणकर्णमभिस्पृश्य ॥ ततो वा
ममनेनैव मंत्रेण ॥ बाह्वोर्मे बलमस्त्विति दक्षिणं बाहुम् ॥

आस्ये अस्तु ॥ नसोर्नासिकयोः ॥ प्राणो घ्राणः ॥ अक्ष्णोः नेत्रयोः कर्ण मु
ततो वाममनेनैव मंत्रेण ॥ ऊर्वोर्मे ओजोऽस्त्विति ऊरुद्वयं युगपदेव ॥
अरिष्टानि सह संत्विति शिरःप्रभृति सर्वांगानि युगपत् ॥ ह
रिहरेण घ्राणाय तेन स्पर्शः सजलहस्तेन कर्तव्य इत्युक्तं ॥
तदतीव मंदं ॥ न ह्यत्र सूत्रे जलग्रहणमस्ति ॥ सर्वांगालं
भेऽभ्याभ्याहस्ताभ्यामोऽप्युक्तः सोऽपि न युक्तः ॥ आच
म्येति ग्रहणं आचांतोदकायेति वक्ष्यमाणत्वात् नाचांत
स्यैव घ्राणाय तन्न समर्शनं माभूदिसे तदर्थं ॥ मंत्रार्थः
मम वागींद्रियं श्रोत्रं श्रवणेंद्रियं ॥ बलं शक्तिः ॥ ओज
स्तेजः ॥ मे मम तनूर्देहः तन्वा देहस्यांगानि चेत्सह युग
पदरिष्टानि अनुपहतानि संतु ॥ आचांतोदकाय गौ शारसं
रिति त्रिः प्राह ॥ आचांत उदकं येनासौ आचांतोदकः ॥ साहाय

तदर्थं शासं अस्मिं आदाय भामिनीयं गौरि स्पर्धयिता त्रिः प्राह ॥ आ
लेप्ययतामिस्य व्याहारः ॥ आचांतोदकाय हेणास्तुन राचमनमि
ति केचित् ॥ आचांतोदकायेतितादर्थे चतुर्थी ॥ शास दानास्य
तादर्थ्ये तु तदर्थं चालंभन धारयं ॥ प्रसाहमातारुद्राणां दुहि
तावसूनां स्वसादित्यानाम मृतस्य नाभिः ॥ प्रणुवोचं चिकि
तुषे जनाय मा गाम नागाम दितिं वधिष्ट ॥ मम चामुष्य च पाप्मा
नं हनोमीति यपालभेत ॥ अथ चेद्यजमानं प्रसाहमा
तेस्येमुं मंत्रं ॥ यदि गामालभेतेत दाम मम चामुष्य च पाप्मानं ह न ८
नोमीति तदंतेप्रयोगः ॥ अत्रामुष्य शब्दमुद्दिश्य स्पर्धयितुर्नाम
ग्रहणं कार्यं ॥ मंत्रार्थः ॥ अमृतस्य क्षीरस्य नाभिराश्रयः ॥ नु
वितके ॥ छंदसि व्यवहिताश्चेत्युपसर्गस्य प्रवोचमित्यनेनान्वयः ॥

३ अदितिं वेदमातरं पयोदानात् ॥ अहं मम अमुष्य स्पर्धयितुः पाप्मानं गो
प्रवोचं ब्रवीमि ॥ चिकितुषे तेनावते जनाय यूयं इमां गां मा व
धिष्ट ॥ मा घ्नत ॥ किं तु गोपशुं विघातुं घ्नतेति तासयो
र्थः ॥ किं भूतां अनागां अनपराधां ॥ अथ यद्युत्सि
सृक्षेन्मम चामुष्य च पाप्मा हतः ॐ मुत्सृजत तृणान्य
त्तिति ब्रूयात् ॥ यदि अग्नौ गामुत्सृष्टुमिच्छेत् दैवं प्रयो
गः ॥ मातारुद्राणामित्युक्त्वा मम चामुष्य च पाप्मा हतः ॥
ॐ मुत्सृजत तृणान्यत्तु ॥ अत्रामुष्य स्थाने स्पर्धयि
तुर्नामग्रहणं ॥ ॐ मुत्सृजत तृणान्यत्तिति उच्चैर्ब्रूयात् ॥
मेपमुपांशु ॥ एवं गवालंभस्य सर्वत्र विकल्पे प्राप्ते केचि
न्नियममाह ॥ न त्वेवामांसोऽर्घः स्याद् अधियज्ञमधिविवाहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मम ५२

कुरुते सैव ब्रूयात् ॥ यज्ञविवाहयोरमांसो चैन्न भवति ॥ यज्ञ
मध्ये ह्रस्य कुरुते सैवं प्रयोगः ॥ अतश्चालंभिप्रमो यज्ञवि
वाहयोः गोरालंभश्च कलिवर्जिते काले भवति ॥ ॥ यज्ञ
धानं गवालंभं संन्यासं पलपैतृकं ॥ देवराच्च सुतोत्पत्तिः कलौ
पंच विवर्जयेदिति ॥ १ ॥ त्पोराद्वार स्मरते ॥ अतश्च गवालंभ
७० स्य कलौ निषिद्धत्वात् ॥ उत्सर्गस्य च यज्ञविवाहयो रद्यास वा ६०
गोरिस्य आरणादि यज्ञविवाहयोः कलौ न प्रवर्तते ॥ यज्ञवि
वाहयोरन्यत्रानुसंधि पक्षएव कलौ ॥ कलौ गोपत्यो निषेधात्
ति स्थाने अजालंभः पायसे वैजयेत्ताभः ॥ परिगते संवत्सरा
घ्यी भवंतीत्युक्तं ॥ तदपवादमाह ॥ यद्यप्यसकृत्संवत्सरस्य
सोमेन यजेत कृतताघ्याएवैनं याजयेयुर्नाकृतताघ्या इति श्रुतेः ॥

२ याजयेयुः ॥ न अकृताघ्याः कुतः श्रुतेः ॥ एतनुक्तमादेन ज्ञायने सोम
यद्यपि संवत्सरस्य मध्ये असकृत्पुनः पुनः सोमेन यजेत तथापि
नं यजमानं कृताघ्या एव ऋत्विजो घ्यानेतु रे यागार्थमिति ॥
यक्ष्यमाणास्त्वृत्विज इत्यनेनैव गतार्थं सा सोमेन यक्ष्यमाणा
वाघ्याइति नियमविधानार्थं पृथगारंभः ॥ ननु वसंते वसंते ज्यो
तिषा यजेतेत्येकस्मिन् संवत्सरे एक एव सोमयागः प्राप्तस्तत्कथ
मुच्यते ॥ असकृत्संवत्सरस्य सोमेन यजेतेत्यस्य ॥ उच्यते ॥
यद्यपि नित्यः सोमयागः सकृदेवानुष्ठातव्यस्तथापि काम्यानां
चोदितानां पुनः पुनः अनुष्ठानं संभवत्येव ॥ द्वादशाहादीनां सत्रा
णि सोवाजपेयस्तस्यानुष्ठानेतदंगभूतानां परि यज्ञानामनु
ष्ठानं भवतीति ॥ तस्मात्साधूक्तमसकृत्संवत्सरस्य सोमेन यजे
पा तेति ॥ वरस्यार्घ्यं [illegible] ॥ वरस्याभवेच्छा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खातघारवागृह्योदितः ॥ मधुपर्कः प्रशस्तव्योऽत्र मन्त्रास्तेऽपि द
त्तरीति ॥ अत्र ऋत्विगादिपूजालक्षणार्थे वरदानमुक्तं अ
र्च्यमानास्वायाम् मधुपर्क इति ॥ याज्ञिकास्तु अर्च्यस्य यद्गृह्यं
कर्मतद्गृह्यं मधुपर्क इति वदन्ति ॥ तथा जगन्नाथकारि
कायां ॥ तद्गृह्योक्तविधिनार्चिष्टदानं तत इति ॥ सर्वत्र य
ज्ञमानगृह्यस्वार्थेन मधुपर्क इति जयंतः ॥ तत्तु केरपिनादत्तं ॥
७१ इति श्रीविश्वरम्भिनिर्विसम्मुख्यपतिश्रीमद्याज्ञिकवामनात्म ७१
जगदाधरस्तेनगृह्यसूत्रभाष्येप्रथमकांडे द्वितीयकंडिका ॥
चत्वारः पाकयज्ञाः पाकस्य यज्ञा इति कर्मणां नामधेयानि च
तुः प्रकारा भवंति ॥ ते के ॥ हुतोहुतः प्रहुतः प्राशितइति ॥ हुतोहो
ममात्रं ॥ यथा सायंप्रातर्होमः ॥ अहुतो यत्र न हु[illegible]यते यथा

स्वस्त्ययनारोहणं ॥ प्रहुतो यत्र हूयते बलिहरणं च यथा पाकया
दिः ॥ प्राशितो यत्र प्राश्यते नैव न होमो न बलिहरणं यथा पा
शीसां पयस्विपायसं ॥ प्रपयितो ब्राह्मणान्नं ततो जयेदिति ॥
ननु पूर्वं चाग्यमानार भैते चत्वारो भवंति ॥ प्रकारकथनं च प्र
वृत्तिविशेषकर्तव्यात्मावादनर्थकमिति चेन्न ज्ञानार्थं प्रका
रांतरसूचनार्थत्वात ॥ चत्वारः प्रकारा उपदिष्टाः ॥ अस्ति हि
पंचमप्रकारः स नोपदिष्टः ॥ तत्सूचनार्थमेवेतत्सूत्रं ॥ ब्र
ह्मासौ ब्रह्मयज्ञ इति ॥ तस्य विधेर्ब्राह्मणोपदिष्टत्वात ॥
एतावता तदवश्यमहरहः स्वाध्यायतामिति भर्तृयज्ञः ॥ पंचसु ५३
बहिःशालायां विवाहे चूडाकरणोपनयने केशांते सीमंतो
न्नयन इति ॥ विवाहादिषु पंचसु कर्मसु मरुधहिः शाल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शायां कर्म भवति ॥ अन्यत्रांतः शालायां बहिः शालायां भव
वा
ति ॥ विवाहे तु मंडपो बहिःशाष्टेनोक्तः ॥ षोडशार्हिकं कुर्या
च्चतुष्पीठोपर्युत्थितं ॥ मंडपं तोरणैर्युक्तं तत्र वेदीं प्रकल्प
येत् ॥ अष्टहस्तं चतुर्हस्तं मंडपं चाधिपष्कुरं ॥ वेदीकरण
नारदोक्तं ॥ हस्तोच्छ्रितां चतुर्हस्तैः चतुरस्रां समंततः ॥
स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनः ॥ समांत
था चतुर्दिक्षु सोपानैरतिशोभितां ॥ प्रागुदक्प्रवणां र
म्यां स्तंभहंसशुकादिभिः ॥ एवं विधामारभ्य मिथुनं सा
ग्निवामिति ॥ सप्तर्षिमते च ॥ मंगलेषु च सर्वेषु मंडपो गृ
हवामतः ॥ कार्यं षोडशहस्तो वा षण्णहस्तो दशादिविधिः ॥ स्तं
भैश्चतुर्भिरेवात्र वेदीमध्ये प्रतिष्ठिता ॥ कारिकायामपि वि

वाहे मंडपे वेदिकरणमुक्तं ॥ उपलिप्त उद्धृताभ्युक्षिते ग्निमुपसमाधा
य ॥ यत्राग्नेः स्थापनं तत्रोपलिप्त उद्धृते अभ्युक्षिते उदकेनाप्यु
क्षिते देशे अग्निस्थापनं ॥ अत्र अग्नेन पंचाग्निसंस्कारा लक्ष्
ष्यंते ॥ ननु परिसमूहनादेरन्यार्थत्वात् ॥ किमर्थमुपलेपना
दिकमुच्यते ॥ स संउच्यते ॥ यत्र क्वचिद्धोमद्रव्यसंपन्नो प्राप्तिः ॥
परिसमूहनादेरग्न्यर्थत्वाद्यत्राग्नेः स्थापनं तत्र तत्रैते भवंति ॥
तथा चालिंगं ॥ उद्धृते वाभ्युक्षिते ग्निमादधातीति ॥ एवमेव
विधिर्यत्र क्वचिद्धोमद्रव्यनेन च होमार्थमग्निस्थापने स्युः ॥
अन्यत्र गृहांतरे ग्निनिधाने अग्निगमनेमथितो अग्नि
स्थापने च नैते स्युः ॥ किंच ॥ एषपवे सपनेन यत्र स्वस्थाने निष्ठ
तेग्नौ स्थालीपाकादि क्रियते तत्रापि चैते स्युस्तन्माभूदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न दा ५२

यनेन सूत्रेण ज्ञाप्यते ॥ उपलिप्त उद्धृतावोक्षिते देशे ऽग्निमुपस
माधाय विवाहोऽस्मरतीति शेषः यद्यैः सूत्रं योजितं ॥ परिसमूह
न परिसंख्या च तेषां मते ॥ निर्मथ्यमेके विवाहे ॥ विवाहकृत्ति
कर्मणो नामधेयं ॥ एके विवाहकर्मणि निर्मथ्यमग्निमिच्छं
७२ ति ॥ अन्ये लौकिकमिच्छंति ॥ निर्मथ्यो ऽरणिनिर्मथितो ग्रा ७३
घः ॥ सर्वेष्वप्यग्निमंथनो भ्रायते ॥ यथा यावती तेनुभं
के इत्युक्ते अध्वरदमष्येनेति ज्ञायते ॥ अन्यथा चिदरेण
ग्राह्या ॥ उदगयन आपूर्यमाणपक्षे पुण्याहे ॥ उदगयने उत्त
रायणे आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे शोभने विष्यादि
रहिते काले देवानि कर्माणि कुर्यात् ॥ एवं हि श्रूयते ॥ स
यच्चोदङ्ङावर्तते देवेषु तर्हि भवतीति ॥ तस्मात्तद्देवकर्मोचितं ॥

आपूर्यमाणः [illegible]
[illegible]
[illegible] सोपि देवानामेव [illegible] यथा य एवापूर्यते ऽर्धमासः स
स देवानामिति श्रुतेः ॥ पुण्याहेपि उदगयनादीनां समुच्चय
स्तेन सर्वदेवकर्मोदगयन आपूर्यमाणपक्षे पुण्याहे का
र्यं ॥ इदं चानुक्तकालविषयं सूत्रं ॥ यत्र नियतः कालः यथा
सायं जुहोति प्रातर्जुहोति यथा पौर्णमास्यां पौर्णमास्या यजे
तामावास्यायाममावास्यया यजेतेत्यादौ तत्तत्काले कार्यं ॥
न हि शुक्लपक्षे पुण्याहादावाग्निहोत्राद्यनुष्ठानमिष्टमत
स्तदनुष्ठातव्यत्वात् ॥ अ उपनयनचूडाकरणादीनि तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दगयनादौ कार्याणि ॥ अन्यानि तु येषु न समुच्चयः संभवति ता
नि यथासंभवमेतेषु कर्तव्यानि ॥ यथा सर्पबलिरनाहिता
ग्न्याग्रयणमित्यादीनि इति तन्त्ररत्ने ॥ एवं पित्र्याणि दक्षिणा
यने पराह्णे च ॥ कुमार्याः पाणिं गृह्णीयात् ॥ कुमार्याः अदत्ते
योन्याः पाणिं गृह्णीयात् ॥ वक्ष्यमाणेन विधिना विवाहं कुर्या
७४ त् ॥ विंशति प्रसूताप्युदासार्थं कुमारीग्रहणं स्मर्यते हितस्याः ॥ ७४
पुनर्विवाहः ॥ त्रिषु त्रिषूत्तरादिषु ॥ उत्तरा आदिर्येषां तान्यु
त्तरादीनि तेषु त्रिषु ॥ अयमर्थः ॥ उत्तराफाल्गुन्योर्हस्तचि
त्रायां च ॥ एवमुत्तराषाढायां श्रवणे धनिष्ठायां च ॥ एवमुत्त
राप्रोष्ठपदायां रेवत्यामश्विन्यां च ॥ स्वातौ मृगशिरसि रो
हिण्यां वा ॥ एतेषामन्यतमेषां नक्षत्रे विवाहो भवतीत्यर्थः ॥

उदगयन आपूर्यमाणपक्षे पुण्याहे इत्युक्तत्वात् ॥ कालप्रसंगा
च्च सप्तसंवत्सरादि कन्याकन्याविवाहकालोत्र नि
रूप्यते ॥ तत्र ज्योतिर्निबंधे ॥ षडब्दमध्ये नोद्वाह्या कन्या वर्ष
द्वयं ततः ॥ सोमो भुंक्ते ततस्तद्वद् गंधर्वश्च तथानलः ॥ त
थायमः ॥ ॥ सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः ॥ कन्या
याः शास्यते राजन् अन्यथा धर्म गर्हितः ॥ विवाहस्तु द्विप्रवर्द
ति संतो वा स्यादयं स्त्रीजनिजन्ममासात् ॥ सप्तसंतरे तु ॥ जन्मतो
गर्भाधानाद्वा पंचमाब्दात्परं शुभं ॥ कुमारीवरणं दानं मेखलाबं
धनं तथेति ॥ उक्तं सर्वसंग्रहकारिकायां ॥ अष्टवर्षा भवेद्गौरी न
ववर्षा तु रोहिणी ॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमे न जन्निकावास्या यावद्रजो वृषली स्मृता ॥ अपरा वृषली ज्ञेया कुमा
री या रजस्वला ॥ प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ॥ मासि मा
सि रजस्तस्याः पिता पिबति शोणितं ॥ एतत्प्रायिकं ज्ञेयं न रजो
दर्शनं भवेत् ॥ स्त्रीणां कासांचिद्वर्षेस्मिन्नाप्नुर्तिमनु नापि ततः ॥
उद्वहेत्त्रिंशद्वर्षस्तु कन्यां द्वादशवार्षिकीं ॥ त्र्यष्टवर्षोष्टवर्षां वा धर्मे
सीदति सत्वरः ॥ एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ वर्षै
रेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयं ॥ त्रिंशद्वर्षो दशाब्दां च भार्यां
विंदति नग्निकां ॥ तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ॥
प्रदानं प्रागृतोस्तस्याः कुर्वन्सदोषभाक् ॥ ज्येष्ठभ्राता पिता मा
ता च दृष्ट्वा कन्यां रजस्वलां ॥ त्रयस्ते नरकं यांति स्वेच्छया मिसप्रभूतीप
मः ॥ यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ॥ असंभाष्यो ह्यपां

क्तेयः स विप्रो वृषलीपतिः ॥ वृषलीसंगृहीता येब्राह्मणो मदमोहितः ॥
सततं सूतकं तस्य ब्रह्महत्या दिने दिने ॥ पितुर्गेहे तु सा कन्या रजः
पश्यत्यसंस्कृता ॥ भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणीं ॥ अपि वा गुणहीनाय नो
परुंध्याद्रजस्वलामिति ॥ अथ मासः ॥ मासः ॥ माघफाल्गुनवैशा
खव्ययधुदा मार्गशीर्षके ॥ ज्येष्ठे चाषाढ़े श्रेयेवसुभगादिविते संयुता ॥ १ ॥
प्रावणोपि च पौषे वा कन्या स्त्राः प्रदेतथा ॥ चैत्राश्वयुक्कार्तिकेषु या
ति वैधव्यतां लघु ॥ २ ॥ नारदः ॥ माघफाल्गुनवैशाखज्येष्ठमासाः शु
भावहाः ॥ कार्तिको मार्गशीर्षश्च मध्यमो निंदिताः परे ॥ ३ ॥ पौषेपि
कुर्यान्मकरस्थिते रवौ चैत्रे भवेन्मेषगते युदास्यात् ॥ प्रशस्तमाषा
ढयुतं विवाहं वदंति गर्गा मिथुने स्थिते र्के ॥ ४ ॥ तथा ॥ मार्गे मासि त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा ज्येष्ठेष्वीरं परिणयं व्रतं ।। ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्ज्य
येत् ।। हस्ति मासं छुरविंश्य पत्वा ज्येष्ठपुत्रस्य कारयेत् ।। डुत्सवादि
पु कार्येषु दिनानि दश वर्जयेत् ।। तथा रत्नकोषे ।। जन्मर्क्षे जन्म
दिवसे जन्ममासे शुभं त्यजेत् ।। ज्येष्ठमासादि गर्भस्य शुभं वर्ज्य
स्त्रिया अपि ।। १ ।। राजमार्तंडे ।। जातं दिनं दूषयते वसिष्ठोह्यष्टौ च
गर्गो नियतं दशाग्निः ।। जातस्य पक्षं किल भागुरिश्च शेषाः स्मृता
स्ताः खलु जन्ममासि ।। जन्ममासे तिथौ भे च विपरीत [illegible] ।। ७६
कार्यं मंगलमित्याह गर्गभार्गवशौनकाः ।। जन्ममासं निषेधेपि
दिनानि दश वर्जयेत् ।। आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथ
योपरे ।। पराशरस्मृतौ वसिष्ठः ।। अज्येष्ठकन्यापायत्र ज्येष्ठपुत्रो
वरो यदि ।। व्यत्ययो वा तयोस्तत्र ज्येष्ठमासः शुभप्रदः ।। ज्येष्ठस्य ज्येष्ठ

कन्याया विवाहो न प्रशस्यते ।। तथा ।। द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्ये
ष्ठं शुभावहं ।। ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतं ।। यत्तु सार्वका
लमेके विवाहमिति वदंति तदनिष्टोढायां कन्यायां वेदितव्यं ।। त
था च राजमार्तंडे ।। राहुग्रस्ते तथा युद्धे पितृणां प्राणसंशये ।। अति
प्रौढा च या कन्या चंद्रलग्नबलेन तु ।। यद्वा ।। एतदासुरादिविषयं विवाह
तत्वाच्च [illegible] परिशिष्टे ।। धर्म्येषु विवाहेषु कालपरिरक्षणं न
धर्म्येष्विति ।। अथ गुर्वादिबलं ।। तत्र गर्गः ।। स्त्रीणां गुरुबलं
श्रेष्ठं पुरुषाणां रवेर्बलं ।। तयोश्चंद्रबलं श्रेष्ठमिति गर्गेण भा
षितं ।। देवलः ।। नष्टात्मजा धनवती विधवा कुशीला पुत्रान्विता
हतधवा सुभगा विपुत्रा ।। स्वामिप्रिया विगतपुत्रधवा धनाढ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८८ ५८

वंध्या भवेत्सुरगुरौ कमठौ जनमतौ गर्गः॥ जन्मत्रि दशमादि
स्थः पूजया शुभदो गुरुः॥ विवाहे च चतुर्थाष्टद्वादशस्थो
मृतिप्रदः॥ अस्यापवादः॥ सर्वत्रापि शुभं [illegible] दद्याद्वाद्या
परं गुरुः॥ पंचषष्ठाब्दयोरेव शुभगोचरता मता॥ सप्तमात्सं
च वर्षे पुत्रस्वोच्चस्वर्क्षगतो यदि॥ अशुभोपि शुभं दद्याच्छु
७ भदः किं पुनः॥ रजस्वलायां कन्यायां गुरुशुद्धिं न चिंत ७७
येत्॥ अष्टमेपि प्रकर्तव्यो विवाहस्त्रिगुणार्चनात्॥ अर्कगु
र्वी बलं मोर्यो रोहिण्यार्कबलास्मृता॥ कन्याचंद्रबलाप्रोक्ता
दुली लग्नतो बला॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहि
णी॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥ बृहस्पतिः॥

सुषचापकुलीरस्थो जीवो यपशुभंगोचरः॥ अतिशोभन
तां दद्याद्विवाहोपनयादिषु॥ शौनकः॥ गुर्वादित्ये व्यतीपाते
च क्रांति चारगे सो॥ वहे राश्यास्ति शुक्रे वा बाले वृद्धेपि
वा गुरौ॥ पौषे चैत्रे च वर्षासु चार चाधिकमासके॥ केतूद्ग
मे निरंक्षे के सिंहस्थे मरणं त्रिणि॥ विवाहव्रतयात्रादि
पुरहर्म्यगृहादिकं॥ शौरं विघोपवि घांश्चयत्नतः परिव
र्जयेत्सौलल्लः॥ अतिचारिगतो जीवो स्तराशिं नैति चे
त्पुनः॥ लुप्तसंवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः॥ सिंहस्थगु
रोरपवादे वसिष्ठेनोक्तः॥ विवाहो दक्षिणे कूले गोतम्यानेत
रे च तु॥ भागीरथ्युत्तरे कूले गौतम्यादक्षिणे तथा॥ वि
सिंहस्थ मकरस्थे च गुरौ यत्नेन वर्जयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाहव्रतबंधयत्रसिंहस्थे ज्येन दुष्यति ॥ पराशरोपि ॥ गोद
भागीरथीमध्ये नो दोषः सिंहगे गुरौ ॥ मध्यस्थे सर्वदेशेषु
तथा मीनगते रवौ ॥ सर्वत्र गुरुबलाभावे तोनको कां
क्षांतिमाचरेत् ॥ सा चास्माभिः प्रयोगे लेखनीया ॥
अतिचारगे गुरौ तु वसिष्ठः ॥ अतिचारेगते जीवे व
७९ र्जितेतदनंतरं ॥ विवाहादिषु कार्येषु अष्टाविंशति
वासरान् ॥ रत्नमालायां ॥ एकपंचनवयुग्मषट्दशात्री ७९
णि सप्तचतुरष्टलाभतः ॥ द्वादशा जवृषभादि राशि
तो घातचंद्र इति कीर्तितो बुधैः ॥ नारदः ॥ भूबाणनव
हस्ताश्वरसादिग्वह्निशैलजाः ॥ वेदाष्टवसुचिवाब्दिसा

घातचंद्रा यथाक्रमं ॥ यात्रायां युद्धकार्येषु घातचंद्रं विव
र्जयेत् ॥ विवाहे सर्वमांगल्ये चौलादौ व्रतबंधने ॥ घात
चंद्रो नैव चिंत्यो इति पाराशरो ब्रवीत् ॥ ज्योतिर्निबंधे
प्युक्तं ॥ विवाहे चौलव्रतबंधयज्ञे महाभिषेके च तथैव राज्ञां ॥
सीमंतयात्रासु तथैव जाते नो चिंतनीयः खलु घातचंद्रः ॥
अकालवृष्टौ नारदः ॥ अकालजा भवेयुश्चेद्विद्युन्नीहार
वृष्टयः ॥ प्रत्यर्कपरिवेषेंद्रचापाभ्रध्वनयो यदि ॥ दोषाय मं
गले नूनमदोषायैव कालजाः ॥ अकालवृष्टिस्वरूपं च
ल्लेनोक्तं ॥ पौषादिचतुरो मासाः प्रोक्ता वृष्टेरकालजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७६ निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव ॥ आपंचदि ७६
नात्कन्यापरिणीतानां शमुपयाति ॥ उल्कापाते द्रुचापप्रब
लघनरजो धूम्रनिर्घातविपुद्धष्टिप्रत्यर्कदोषादिषु स
कलबुधैस्त्याज्यमेवैकरात्रं ॥ दुःस्वप्ने दुर्निमित्ते चाशुभ
तरदृष्टौ दुर्मनोध्वांतबुद्धौ चौले मौंजौ निबंधे परिणय
नविधौ सर्वदा त्याज्यमेव ॥ ज्योतिःप्रकाशे ॥ अर्वाक्षोड
शानां यः संक्रांतेः पुण्यदाः परः ॥ उपनयनव्रतयात्रापरि
णयनादौ विवर्ज्यास्ताः ॥ गर्गः ॥ दिग्दाहे दिनमेकं चपहे स
मदिनानि तु ॥ भूकंपे च समुत्पन्ने अहमेव तु वर्जयेत् ॥

उल्कापाते त्रिदिवसं धूमे पंच दिनानि च ॥ वज्रपाते चैक
दिनं वर्जयेत्सर्वकर्मसु ॥ दर्शनात्प्राहुर्ऋ केतोः सप्तदिनं सऊ
त्र ॥ यावत्केतूद्गमस्तावदशुभः समयो भवेत् ॥ अद्भुतसा
रे अस्यापवादः ॥ अथ दिवसत्रयमध्ये महुपानीयं
श प्रदात्तवति ॥ उत्पात दोषमनंत दैवज्ञाः प्राहुराचार्याः ॥
सबंधतश्चैव ॥ भूकंपादेर्न दोषोस्ति वृद्धिश्राद्धे कृते स
ति ॥ ॥ अथ प्रातकूलादिनिर्णयः ॥ मेधातिथिः ॥ वधूव
रार्थं घटितेषु निश्चितेषु परस्यागेहेषु पकन्यकायाः ॥ मृत्यु
र्यदि स्यान्मनुजस्य कस्यचेत्तदान कार्यं खलु मंगलं बुधैः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंगलं विवाहः ॥ तथा गर्गः ॥ हरते तु निश्चये श्मश्रु सुर्भवति
कस्यचित् ॥ तत्र दानमंगलं कुर्यात् छते वै धव्यमाप्नुयात् ॥
द्वि स्मृतिचंद्रिकायां ॥ हरते वा निश्चये पश्चात्स्मृसुमर्से स्य
गोत्रिणः ॥ तत्र दानमंगलं कार्यं नारी वैधव्यदं ध्रुवं ॥ भृगुः ॥
वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः ॥ तदा नोद्वाहो
८० नैव कार्यः स्ववंशक्षयदोषतः ॥ शौनकः ॥ वरवध्वोः पि ८०
तामाता पितृव्यश्च सहोदरः ॥ एतेषां प्रतिकूलं हि महा
विघ्नप्रदो भवेत् ॥ पितापितामहश्चैव माता चैव पिताम
ही ॥ पितृव्यस्त्री सुतो भ्राता भगिनी चाविवाहिता ॥

एभिरत्रविपन्नैश्च प्रतिकूलं बुधैः स्मृतं ॥ अन्यैरपि विपन्नै
स्तु केचिदूचुर्न तद्भवेत् ॥ संकटे मेधातिथिराह ॥ वाग्दाना
नंतरं यत्र कुलयोः कस्यचिन्मृतिः ॥ तदा संवत्सरादूर्ध्वं वि
वाहो शुभदो भवेत् ॥ स्मृतिरत्नावल्यां ॥ पितुरब्दमशौचं
स्यात्तदर्धं मातुरेव च ॥ मासत्रयं तु भार्यायास्तदर्धं भ्रात
पुत्रयोः ॥ अन्येषां तु सपिंडानामाशौचं मासमीरितं ॥ त
दंते शांतिकं कृत्वा ततो लग्नं विधीयते ॥ ज्योतिःप्रकाशे ॥
प्रतिकूलेपि कर्तव्यो विवाहो मासतः परः ॥ शांतिं विधाय
गां दत्वा वाग्दानादि चरेत्सुनः ॥ शांतिरत्ने विनायकशांतिः ॥
तथा च मेधातिथिः ॥ संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांतिरुत्क्रमणे चाद्य धृत्वा तां शुभमाचरेत्॥ स्मृत्यंतरे॥
प्रतिकूलेन कर्तव्यो गर्भाधानं तुत्रयं॥ प्रतिकूलेपि क
र्तव्यमित्याहुर्वृहुविपूर्वे॥ प्रतिकूले सपिंडस्समासमेकं
विवर्जयेत्॥ ज्योतिःसागरेपि॥ दुर्भिक्षे राष्ट्रभंगे चापि
पीर्वा प्राणसंशयोः॥ प्रौढायामपि कन्यायां नानुकूल्यं
८१ प्रतिक्षते॥ पुरुषत्रयपर्यंतं प्रतिकूलं स्वगोत्रिणां॥ ८१
प्रवेशानिर्गमस्तद्वत्तथा मुंडनमंडने॥ प्रेतकर्माण्यनि
वर्त्य चरेन्नाभ्युदयक्रियां॥ आचतुर्थं ततः पुंसि पंचमे
शुभदं स्मृतं॥ मासिकविषये॥ शात्यायनिः॥ प्रेतश्रा
द्धानि सर्वाणि सपिंडीकरणं तथा॥ अपकृष्यापि कुर्वी

त कर्तुं नांदीमुखद्विजः॥ तदभावे प्रकर्षे दोषमाह शातानः॥
वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्॥ सश्रा
द्धी नरके घोरे पितृभिः सह मज्जतीति॥ स्मृत्यंतरे॥ सपिं
डीकरणादर्वागपकृष्य कृतान्यपि॥ पुनरप्यपकृर॥ विवा
हदिनादारभ्य चतुर्थदिनपर्यंतं मध्ये श्राद्धदिनं चेन्नायाया
ति ताहृच्यः कालो ग्राह्यः॥ तदुक्तं ज्योतिर्निबंधे॥ विवाह
मारभ्य चतुर्थिमध्ये श्राद्धदिनं दर्शदिनं यदि स्यात्॥ वैध
व्यमाप्नोति तदाशु कन्या जीवेत्पतिश्चेदनपत्यता स्यात्॥
तथा॥ विवाहमध्ये यदि चेत्क्षयाहस्तेनाशुमुख्याः पितरो
न यांति॥ वतेविवाहे परतस्तु कुर्याच्छ्राद्धं स्वधाभिर्न तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूषयेतं ॥ श्रुतावपि ॥ य वै शूद्रं दूषयति स्वधाम्नि इति ॥ ॥
तिस्रो ब्राह्मणस्य वर्णानुपूर्वेण ॥ ब्राह्मणस्य वर्णानुपूर्वे
ण वर्णक्रमेण ब्राह्मणी क्षत्रिणी वैश्येति तिस्रो भार्या भ
वंति ॥ वर्णानुपूर्वग्रहणात् ॥ न व्युत्क्रमेण विवाहः ॥ प्रथ
मा ब्राह्मणी ॥ ततः इतरे वर्णक्रमेण ॥ द्वे राजन्यस्य ॥ वर्णा
८२ नुपूर्वेण क्षत्रिया वैश्या चेति द्वे राजन्यस्य भार्ये भवतः ॥ ८२
एका वैश्यस्य सवर्णा भार्या भवति ॥ ॥ सर्वेषां शूद्राम
प्येके मंत्रवर्जं शूद्र ॥ सर्वेषां ब्राह्मणादीनां शूद्रामप्येके भा
र्यामिच्छंति ॥ न शूद्राया धर्मकार्ये ह्यधिकार इति ॥ तथा
च यास्कः ॥ सर्वेषां ब्राह्मणादीनां शूद्रामप्येके भार्यामिच्छंति ॥

विवाह तस्यास्तु मंत्रवर्जं कर्म भवति ॥ एके पुनः शूद्रीपरिणयनं
नेच्छंति ॥ न शूद्राया धर्मकार्ये ह्यधिकार इति ॥ तथा च या
स्कः ॥ रामा रमणाय विंदते न धर्माय इति ॥ अतः शूद्री
परिणयनं रमणार्थमेव ॥ अथैनां वासः परिधापयति ॥
जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा ॥
शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वा
युष्मतीदं परिधत्स्व वासः ॥ अथ वरो जरां गच्छेति मंत्रे
णैनां वधूं वासः परिधापयति ॥ तदीयं मतं तु आचा
र्यमहकं परिधापयनं ॥ अत्राचार्यो हतं वासो ग्राह्यं ॥ "
अहतलक्षणं तु कश्यपेनोक्तं ॥ अहतं यंत्रनिर्मुक्तं वासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोसं स्वयं सुवा॥ रास्तं तत्संग लेनूनं तावत्कालं न सर्वं देति॥
मंत्रार्थः॥ हे कन्ये त्वं जरसं निर्दिष्ट कर्त्वं मया सह गच्छ आयु
हि॥ वासश्च मया संपादितं परिधेहि॥ आधास्यंति कामा
दिभिर्हिंस्यादरक्षयो मनुष्याः तेषां मध्ये अभिनाशस्ति रक्षि
पावाः॥ शतमु प्रमादे॥ तस्मात्सा ती सन्निनाशस्ति पावा भवा॥ श
तं च शरदो वर्षाणि जीव प्रामुहि॥ सुवर्चोः ते जस्विनी॥
९३ रयिं धनं पुत्रांश्च अनुपश्चात्संव्ययस्व॥ अति संवरणी ९३
ष॥ इमा घशाचिकुरु॥ हे आयुष्मति इदंवासः परिध
त्स्व सनुवादः॥ मंत्रस्य वा चकारितार्थे॥ अथोत्तरीयं॥
या अकृंतन्नवयंया अतन्वत याश्च देवीस्तंतूनभि

तोततंथ॥ तास्त्वा देवी र्जरसे संव्ययस्वायुष्मतीदं परि
धत्स्व वासः॥ या अकृंतन्निमनेन मंत्रेणोत्तरीयं परिधाप
यति वर एव॥ तदप्यहतमेव॥ अत्रापि कारितार्थे मंत्रः॥ मं
त्रार्थः॥ याः देवीः देव्यः इदंवासः अकृंतन् कर्तितवत्यः॥ याः
अवयन् वीतवत्यः॥ वेमनि तंतुसंताने॥ उं तत्वसत्यस्य र्दः॥
यास्तंतून्सूत्राणि अतन्वत प्रोतवत्यः॥ तीर्यक्तंतन्वि
स्तारितवत्य इत्यर्थः॥ चकाराद्याः उं ता ओतांश्च तंतूनभि
तः उभयपार्श्वे योरपित तंथ॥ तुरीयोमादितव्यापारेण
प्रथितवत्यः॥ तास्तत्तत्सामर्थ्यदात्र्यो देव्यः त्वत्कायरूपव
दिदं वासः त्वां जरसे दीर्घकालनिर्दिष्टजीवनाय.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदा ५८

संध्यस्यस्य परिधापयतु ॥ पुरुषादित्यस्य पश्च्यां दसः ॥ अतो
हेतोः आयुष्मति इदं एतादृशं वासः परिधत्स्व ॥ उत्तरीय
त्वेन रणीष ॥ अथैनौ समंजयति ॥ समंजंतु विश्वे देवाः
समापो हृदयानि नौ ॥ संमातरिश्वा सं धाता समु देष्ट्री
दधातु नौ ॥ कन्यापिता परस्परं समंजेथामित्यभिप्रेषणेन
२४ एनौ वधूवरौ समंजयति ॥ समंजनं नाम सुमुखीकर २४
णं ॥ परस्परं च गात्रविश्लेष इति भर्तृयज्ञः ॥ परस्परानु
लेपनमिति केचित् ॥ तस्यापि कारिका त्वेवरस्यैवेमं त्रलिंगा मंत्रो
त् ॥ कारयितत्वं च संनिधानात् ॥ कन्यापितुः सन्निहि
तो स्य सौप्रदारत्वात् ॥ उभयोर्मंत्रपाठ इति भर्तृयज्ञः ॥

मंत्रार्थः ॥ हे अन्यके नौ आवयोः हृदयानि मनांसि तन्निष्ठव्यापा
रान्संकल्पात्मकान् विश्वे देवाः आपश्च समंजंतु ॥ गुणातिरे
म याधाने संस्कुर्वंतु ॥ तथा समभ्यगतो मातरिश्वा अनुकूलो वा
युः ॥ तथा चानुकूलः प्रजापतिः ॥ देष्ट्री धर्मोपदेष्ट्री देवता आ
प्प वयोर्हृदयानि संदधातु ॥ उक्तार्थे ॥ पिताप्रत्तामादाय गृहीत्वा
निष्क्रामति ॥ यदैषि मनसा दूरं दिशोनुपवमानो वा ॥ हिरण्य
पर्णो वैकर्णः स त्वा मन्मनसां करोतु असाविति ॥ समंजनोत्त
रं कन्यायाः पित्रा दत्तां कन्यामादाय वरः प्रतिग्रहशालायां सभा
पितमग्निं प्रतिगच्छति ॥ असाविसत्र संबुध्यंतं कन्यानाम
ग्रहणं ॥ अत्र कर्कभाष्यं ॥ आदाय गृहीत्वेति चोभयं न वक्त
व्यं ॥ उच्यते च तत्किमर्थं ॥ अप्राप्तग्रहणस्याप्राप्तिर्ग्रहविधानादानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथास्यादिति॥ येऽत्रैमर्थः॥ अप्रतिग्रहस्यापि कन्याद्रव्यस्य प्रति
ग्रहविधिना आदानं प्रतिग्रहो यथास्यादित्येतदर्थमुपयम
हणं॥ ननु कन्यां दद्यात् कन्यां प्रतिगृह्णीयादिति स्मरणात्॥ अ
थ परिग्रहयोग्यं कन्याद्रव्यमिति सूच्यते॥ सत्यमुच्यते॥ ॥
स च त्यागपूर्वकं हि परस्वत्वापादनं॥ न च कन्याकर्तृत्वं चि दानं ५
८५ दप्यस्त्र कन्याकर्तुं शक्यते॥ नापि परस्य कन्यात्ववृत्ति॥ ८५
विवाहोत्तरमपि ममेयं कन्येत्यभिधानाद्गौणो दद्या
ति॥ यत्तु स्मृतिषु पुत्रदानं चोद्यते तत्रापि गौणो ददातिः॥
पितुरिव परस्यापि पिंडदानं रिक्थभा ब्धं च भवेदित्यर्थः॥ नी३
पञ्चाध्यायस्य समपादे ऽत्र धात्वधिकरणे ऽयमर्थः॥
तत्र रहने॥ यद्वा॥ अप्रतिग्रहयोग्यस्य प्रतिग्रहविधानतः॥

क्षत्रियादेर्यथा दानं स्यादद्यादयेति सूचितमिति रेणुः॥ मंत्रा
पै र्थः॥ [redacted] हे कन्ये पत एषि गच्छसि॥ मनसा चित्तेन दूरं
दूरदेशं दिशः ककुभः अनुलक्षीकृत्य पवमान इति वा॥
युवन् चित्तस्य वायुवच्चंचलत्वात्॥ ततः पवमानो वायु
र्हिरण्यपर्णः सुवर्णपक्षः वि कर्णः पयं सत्वां मन्मनसां म गरुत्मा [illegible]
ऽतचित्तां [redacted] करोतु॥ ममायतां मय्यनुरागिणीं विद धा
तु॥ दारकर्ममाह याज्ञवल्क्यः॥ पिता पितामहो भ्राता सु
कुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः
परः॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ॥ गम्यं
त्वभावे दाराणां कन्या कुर्यात्स्वयंवरमिति॥ [illegible] कुल्यः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तिति क्रमेणादौ पितृकुलस्थ स्तदभावे मातामहकुलस्थः
सर्वाभावे जननी इति प्रयोगरत्ने ॥ प्रकृतिस्थ उन्मादादो
षहीनः ॥ गम्यं गमनार्हं ॥ लावण्यादिगुणयुक्तं ॥ नारदोपि ॥
पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः ॥ मातामहो मा
तुलश्च स्वकुल्यो बांधवस्तथा ॥ माता त्वभावे सर्वेषां प्र
कृतौ यदि वर्तते ॥ तस्यामप्रकृतिस्थायां कन्यां दद्युः स्व
जातयः ॥ यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजे
त् ॥ अत्र प्रकृतिस्थपदग्रहणादप्रकृतिस्थेन यत्कृतं तद
कृतमेव ॥ यथा चापरार्के नारदवचनं ॥ स्वतंत्रोपि यदि न
त्कार्यं कुर्यादप्रकृतिं गतः ॥ तदप्यकृतमेव स्यादस्वातं

त्र्यस्य हेतुत इति ॥ यदि तु सप्तपदी विवाहहोमादि प्रधानं
जातं तदा गवैकल्पेपि नारदोक्तिर्विवाहदाक्षिणात्यगौडप्र
वेषु ॥ विवाहश्च कन्यास्विभासो न्यदगामिति स्मरसर्वसारे ॥
अथैनां समीक्षयत्यघोरचक्षुरपतिघ्न्येधि शिवा पशु
भ्यः सुमनाः सुवर्चाः ॥ वीरसूर्देवकामा स्योना शन्नो भ
व द्विपदे शं चतुष्पदे ॥ सोमः प्रथमो विविदे गंधर्वो विवि
द उत्तरः ॥ तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥
सोमो ददद्गंधर्वाय गंधर्वो ददग्नये ॥ रयिं च पुत्रांश्चा
दादग्निर्मह्यमथो इमां ॥ सा नः पूषा शिवतमामेरय ॥ सा
न ऊरू उशती विहर ॥ यस्यामुशंतः प्रहराम शेपं यस्यामु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भामाब ह्वोनिर्विष्या इति ॥ अनिक्रमणोत्तरं कारितोपदे
शात् ॥ कन्यापि तापरस्परं समं जेथामिस्य ध्येषणेन
समीक्षणं कारयति ॥ ततस्तौ वधूवरौ परस्परं समीक्ष
णं कुरुतः ॥ लिंगाद्या वरः समीक्षमाणां कन्यां समीक्षमाणः ॥
अघोरचक्षुरिति तां श्चरोमंत्रा त्यहति ॥ मंत्रार्थः ॥
८७ हे कन्ये त्वं अघोरचक्षुः सौम्यदृष्टिः ॥ अपारहृष्टिर्वा ॥ ८७
एधि भव ॥ तथा अपतिघ्नी अकार्यकरणेन पत्युर्घा
तिनी ॥ तथा मा भव ॥ तथा पशुभ्यः पशुद्वस्तुतेभ्यः शिवा
हितैषिणी च भव ॥ सुमनाः प्रसन्नचित्ता ॥ सुवर्चाः सुप्र
भावयुक्ता ॥ वीरसूः सत्पुत्रजननी ॥ देवकामा देवानभ्या

दीन् कामयते ॥ स्योना सुखवती ॥ नोस्माकं शं सुखहेतुः द्विपदे मनु
ष्यवर्गाय ॥ चतुष्पदे पशुवर्गाय भव ॥ हे कन्ये ते त्वां सोमश्चं
द्रः तेतव प्रथमः आद्यःपतिः विविदे जन्मदिने लब्धवान् ॥ वि
दलाभे ॥ ततः सार्धवर्षद्वयानंतरं गंधर्वः सूर्यो विविदे ॥ अ
तउत्तरस्तद्वितीयोयंपतिः ॥ ततोग्निरपि तावता काले
न विविदे ॥ अतोयंतव तृतीयः पतिर्यथाहुः ॥ पूर्वं स्त्रियः
सुरैर्भुक्ताः सोमगंधर्ववह्निभिरिति ॥ तथा ते तव तुरीय
श्चतुर्थः मनुष्यजाः मानुषाः अहमेवेस्पर्थः ॥ किमिदानीं
चतुर्णामपीयं पत्नी नेत्याह ॥ सोमश्चंद्रस्त्रिंशन्मासानुभु
क्त्वा गंधर्वः सूर्यस्तस्मै अददत् ददौ ॥ सोपितावत्कालं भुक्त्वा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभक्तैरेदर्शनं च

अग्नये अदद ह्य॥ सन्याग्निमं सुमिमां अदद त्वदत्तवान् ॥ नमे
वलमिमां ॥ किंतु पुत्रान्सुतान्रयिं धनं च ॥ येकारा ऋमी
दिन्याद दारिति संबंधः ॥ या सर्वलोकसाक्षिणी पूषा देवतासा
इमां शिवतमां कल्याणगुणशीलां धरत्वा नोस्मान्प्रेरयतु ॥ इ
रयतु ॥ आटोकत्रीनं घां दसं ॥ अस्मदनुरक्तां करोत्विसर्थः ॥
८८ सा यास्मतः सुखं पुत्रांश्च कामयमाना ॥ उरू सक्थिनी जानु ८८
नोरूर्ध्वभागदंडौ [illegible] हरौ विहरत्वां ॥ विरणोतु ॥ प्रसारयतिस
र्थः ॥ मध्यमपुरुष श्रूयां दसः प्रयोजनमाह ॥ यस्यां स्त्रियो
नौ उशंतः सुखं इच्छंतः ॥ शेपंलिंगं प्रहराम ॥ प्रवेशयाम
वयं ॥ यस्यां कन्यायां ॥ उ एवार्थे ॥ यस्यामेव बहवः कामाः धर्म

१ अग्नेः प्रदक्षिणं कृत्वा रयिधा कन्यायाः वासः परिधानादिकर्तव्यमिति
ध्वदं ॥ अपरे तु स्मो दो णाति ॥ ६

पुत्ररतिसुखरूपाः संतु वा ॥ किमर्थं ॥ निविश्यै अग्निलेचा
घ्युपासनयां तः करणशुद्धिद्वारा सायुज्यमुक्तये ॥ ॥ इ
ति श्रीविरग्निचित्सम्राट्स्थपतिश्रीमिश्रयाज्ञिकधामनु
मज दीक्षित गदाधरविरचिते सूत्रभाष्ये प्रथमकांडे चतुर्थी
कंडिका ॥ ४ ॥ छ ॥ प्रदक्षिणमग्निं पर्याणीयैके ॥ एके आचा
र्याः अग्नेः प्रदक्षिणं करणं वदंति ॥ अतश्च विकल्पः ॥ पश्चा
दग्नेस्तेजनीकटं वा दक्षिणपादेन प्रवृत्योपविशति ॥ त
तो वरोग्नेः पश्चात्स्थापितां तेजनीं कटं वा दक्षिणपादेन
प्रवृत्य कन्या उल्लंघ्याग्नेः पश्चादुपविशति ॥ तेजनी तृण
पुलिको च्यते ॥ कटः प्रसिद्धः ॥ अत्र पश्चादुपवेशनं वच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभावे तु सर्वत्रोत्तरतउपचारो यज्ञस्यानेनउपवेशनं॥ ब्रह्मणस्तत्र
द्रस्य दक्षिणतः कन्याउपविशति॥ ते जनी कर्ममिति द्वितीयानि
र्देशादेतयोः संस्कारः॥ ननूपमुक्तमुपयोक्ष्यमाणं वा द्रव्यं संस्कार्यं
न चानयोरन्यतरउपमुक्तमुपयोक्ष्यमाणं वा भवति॥ तत्कथमयं
संस्कारः॥ सत्यं॥ यद्यप्यत्र शाब्दो नो प्रयोगो नोक्तस्तथाप्यासने
२९ द्रव्याकांक्षत्वादेतस्य प्रयोजनाकांक्षत्वादेवं कल्प्यते॥ उपवेश २९
नार्थोयं संस्कार इति॥ तेन तेजन्युपरि कर्मस्योपरि वोपवेशनं ए
वं च दृष्टार्थता लाभः॥ आक्रमणं च तया सह कर्तव्यमिति सर्दय
सहरिहरौ॥ अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः स
र्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्च॥ आघारौ आज्यभा
गौ च विधीयते॥ आघारः पूर्वः उत्तरस्मिंस्तत्रेत्युक्तः पूर्वः हरिह

रणप्रजापतये स्वाहेति पूर्वाघारो दर्शितः॥ तद्दतीवाश्रुतं॥ नच
त्रमंत्रोस्ति॥ दर्शपूर्णमासयोः परिभाषित घारस्वाहारोपि प्रति
गेरु षिध्यते॥ नस्वाहेति च नाक्तं हि नोनिरुक्तं प्रेत घतु क्वचिदिति॥
ननु आघारादि प्रभावे नवेघादिकं कुतो नायाति॥ उच्यते॥
गृह्यस्थालीपाकानां कर्मसु अन्य [illegible] होमइत्यनेनैवं ज्ञाय य
ते॥ यावंतोत्र पदार्था उक्तास्तावंत एव भवंति॥ नान्ये॥ उत्त
राघारे प्रतिनिगघ होमत्वं न घत्रमंत्रोस्ति॥ एवमाज्यभाग
योरपि महाव्याहृतयो महाव्याहृति मंत्रा त्रयः भूर्भुवः स्व
स्तिस्त्रो महाव्याहृतय इत्युक्तत्वात्॥ सर्वप्रायश्चित्तं च त्वन्नो
अग्न इत्यादिमंत्रैः पंचाहुतयो हूयंते॥ तासां संज्ञा॥ प्रजाप
तं प्रजापतिदेवतात्मको होमः॥ स्विष्टकृद्धोमं॥ यजमानो वै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सणोन्वारब्ध आघारादिस्विष्टकृतं करोति ॥ अन्वारंभस्त्वकुर्वीन
निगमपरिशिष्टात् ॥ एतान्निसर्गं सर्वत्र ॥ एतदाघारादिस्विष्ट
कृदंतं कर्म सर्वत्र यत्र होमात्मकं कर्म तत्र सर्वत्र भवति ॥ यत्र
पुनर्होमत्वं नास्ति ॥ यथास्तरारोहणे लांगलयोजने च त
त्रैतन्न भवति ॥ प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्ध
१० विः ॥ चेद्यदि आज्यद्रव्यादन्यद्रव्यं चर्वादि कर्मणि भवति ॥
तदा महाव्याहृतिहोमात्प्राक् पूर्वं स्विष्टकृद्धोमो भवति ॥ चर्वा १०
दिद्रव्यहोमादेव ॥ केवलाज्यहोमे तु सर्वहोमांते आज्येनैव स्वि
ष्टकृत् ॥ सर्वप्रायश्चित्तं प्राजापत्यांतरमेतदावापस्थानं वि
वाहे ॥ सर्वप्रायश्चित्तं च त्वन्नो अग्न इत्यादि पंचमंत्रैर्होमः ॥ प्रा
जापत्यं प्रजापते देवतात्मको होमः ॥ एतयोरंतरं मध्यं सर्वप्रा

यश्चित्तं प्राजापत्यांतरं एतद्विवाहे विवाहकर्मणि आवापस्थानं वक्ष्यमा
णानां अनुष्ठानकाल इत्यर्थः ॥ राष्ट्रभृत इच्छन् ॥ अस्मिन्विवाहक
र्मणि इच्छन्निच्छया राष्ट्रभृत्संज्ञका होमाः स्युः ॥ ऋताषाडृतधामा
द्वादश ५ ग्निर्गंधर्व इत्यादिभिर्मंत्रैराग्निकाहोमा राष्ट्रभृतः ॥ जयाभ्याता
नांश्च जानन्येन कर्मणेच्छेदिति वचनात् ॥ जयाश्चाभ्यातानां
श्च जयाभ्यातानाः तान् जयाभ्यातानान् जानन्निच्छन् जुहो
ति ॥ अतश्च विकल्पः ॥ चत्रा बोराष्ट्रभृद्भिः सन्नियोगार्थः ॥ इ
च्छया जुहोतीति कुत इति चेत् ॥ येन कर्मणेच्छेदिति वचनात् ॥ येन
कर्मणा ऋद्धिमिच्छेत्तत्र जयान् जुहोतीति वचनं भवतीति ॥ अत
श्चानात्रापि ऋद्धिमिच्छता जयाहोमः कार्य इति ज्ञायते ॥ जैमिनिस्तु
ना जयादीनामनारभ्याधीतानां येन कर्मणेच्छेत्तत्र जयान् जुहोतीत्यादिभिर्वा ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येरेवसामान्यतोलौकिकवैदिकमंगलेप्राप्ते अपवादपस्तु वैदिकास्तेन कृ
यत्राहवनीयोस्तितत्रैतेसुरितिसिद्धांतितत्वा हे॥ जयामंत्राना
ह॥चित्तंचाचित्तिश्चाकूतंचाकूतिश्चविज्ञातंचविज्ञातिश्चमन
श्चशाकरीश्चदर्शश्चपौर्णमासंचबृहच्चरथंतरंचप्रजापति
र्जयानिंद्रायवृष्णेप्रायछदुग्रः पृतनाजयेषु॥तस्मैविशःस
मनमंतसर्वाःसउग्रःसइहव्योबभूवस्वाहेति॥ मंत्रार्थः॥चित्तं
हो १ चप्रजापतिर्यवैंद्रायप्रायछत्॥तथाचित्तादि[illegible]मपिप्रयछति हो १
जयो०श्री ति क्रियांविपरीणम्योत्तरत्रसंबंधः॥तस्मैचसर्वे[illegible]तेमस्तु॥ तत्रसंतो हु ४
नाधारंहृदयं॥चित्तिस्तत्रस्थाचेतना॥आकूतंचाभिमतं॥आ
कूतिश्चाभिमानः॥यद्वाचित्तंज्ञानेंद्रियं॥ज्ञाताचेकवचनं॥चि
त्तिस्तद्देवता॥आकूतंकर्मेन्द्रियं॥आकूतिस्तद्देवता॥विज्ञातंत्वि

न्द्रियादिज्ञानमपरोक्षं॥विज्ञातिस्तद्देवता॥मनःप्रसिद्धं॥शाक्वरीःशाक्व
र्यस्तछन्दसः॥दर्शपूर्णमासौतद्देवते॥बृहद्रथंतरेसामनी॥तद्देवते वा॥
सर्वत्रप्रथमांतंचोक्तवाक्यार्थःसंबध्यते॥प्रजापतिःपरमेश्वरः॥
जयंतिशत्रूनितिजयाःतान्जयान्मंत्रानिंद्रायप्रयछत्ददौ॥
किमर्थं॥वृष्णेअभिमानोरथवर्षणीय॥इंद्रविशेषणंवा॥त [illegible] तः
सइंद्रःपृतनाजयेषुअसुरसेनाविजयाख्यकर्मसु उग्रःप्रचंडः
बभूव॥ततस्तस्मैइंद्रायविशःप्रजाःसमनमंतःसम्यक्नेमुः॥
सउग्रोयो॥सचेंद्रःहव्यःहवनीयःईज्यःबभूवस्वाहा॥तस्मैसुहुत
मस्तु॥ ॥तथाचतैत्तिरीयाश्रुतिः॥देवासुराःसंयत्ताआसन्सइं
द्रः प्रजापतिमुपाधावत्सतस्माएताञ्जयान्प्रायछत्तानजुहोत्ता
तोदेवाअसुरानजयंस्तज्जयानांजयत्वमिति॥अत्रप्रजाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्जयानिसेकेनापि जयलिंगेन छत्रिन्यायेन त्रयोदशामंत्रा जया
इत्युच्यंते ॥ इमान्यभिधारवांते शेषपदस्थानि देवतापदानि एषांप्रयोग
काले संप्रदानलक्षणेन संप्रयोगश्चितायस्वाहादीनि भईय
न्तः ॥ नेति कश्चीद्यः ॥ न चेमानि देवतापदानि किंतर्हि मंत्राश्चैते ॥
ते च यथाम्नाता एव प्रोक्ष्याः ॥ अभ्यातानसंज्ञका मंत्रा नाह ॥
अग्निर्भूतानामधिपतिः समावत्विंद्रो ज्येष्ठानां यमः पृथिव्या
६२ वायुरंतरिक्षस्य सूर्यो दिवश्चंद्रमा नक्षत्राणां बृहस्पतिर्ब्रह्म ६२
णो मित्रः सत्यानां वरुणोपां समुद्रः स्रोत्यानामन्नं साम्राज्यानां
मधिपति तन्मावतु ॥ सोम ओषधीनां सविता प्रसवानां रुद्रः
पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते
मावंतु ॥ पितरः पितामहाः परेवरे तत तास्त तामहाः ॥ इहमावंत

स्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहू
त्यां स्वाहा ॥ मंत्रार्थः ॥ अग्निः प्रजापतिः भूतानां स्थावरादीनां अधि
मं पतिः इंद्राः समां अवतु ॥ यातु ॥ कं अस्मिन्ब्रह्मणि अस्मिन्ब्रह्मकर्म
णि होमादौ ॥ पुनरस्मिन्क्षत्रे क्षत्रकर्मणि प्रजापालनादौ ॥ पुनरस्यामा
शिषि ॥ ब्राह्मणैः संपादिते प्रशंसने पुत्रादिसुखकामनायां वा ॥ कुत्र अ
स्यां कन्यायां किंभूतायां पुरोधायां पुरःस्थितायां ॥ अस्मिन्कर्मणि विवा
हे अस्यां देवहूत्यां देवताह्वाने देवतोद्देशेन होमे वा स्वाहा हुतमस्तु ॥
अयं च वाक्यार्थ उपरिष्टादपि सप्तदशसु संबध्यते ॥ शिष्टं स्पष्टं ॥
एतेषु दशमंत्रा अभ्यातानाः ॥ अग्निर्भूतानामित्यादिसु गंनुपंथा
मिसंता द्वाविंशतिरभ्यावाराः इति कर्ककारिका कारोत ॥ इसर्वत्रानु त्रि
षजेति ॥ एतेषु मंत्रेषु प्रतिमंत्रं यथालिंगं यथावचनं समावत्विति सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिदेवकृत्यां स्वाहेसंतंवायवेक देवां अनु य कल्पं ॥ तत्रास्माभिः
प्रयोगलेखने प्रदर्शितं ॥ ॥ अग्निरैतु प्रथमो देवतानां सो स्यै
प्रजां मुंचतु मृत्युपाशात् ॥ तदयं राजा वरुणो नुमन्यतां यथेयं स्त्री
पौत्रं मघन्न रोदात् स्वाहा ॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै न
यतु दीर्घमायुः ॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानंदम
६३ भिविबुध्यतामियं स्वाहा ॥ स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि ६३
धेह्ययथा यजत्र ॥ यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धे
हि चित्रं स्वाहा ॥ सुगन्नु पंथां प्रदिशन्न एहि ॥ ज्योतिष्मध्येह्यज
रन्न आयुः ॥ अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृ
णोतु न स्वाहेति ॥ ॥ अग्निरैतु प्रथम इत्यादि चतुर्भिर्मंत्रैः प्रतमंत्रः
आज्याहुतीर्जुहोति ॥ अग्निरैतु प्रथम इति प्रथमा ॥१॥ इमाम

ग्निरिति द्वितीया ॥ स्वस्तिन इति तृतीया ॥३॥ सुगन्नु पंथामिति चतुर्थी ॥४॥
मंत्रार्थः ॥ अग्निः एतु आगच्छतु ॥ किंभूतः देवतानां प्रथमः जो प्रथ
मि: मः आद्यः प्रधानत्वात् ॥ अस्यै अस्याः कन्यायाः प्रजां भाविपुत्रा
२ याभि दिरूपां मुंचतु मोचयतु ॥ तथ्य प्रजामोचनं ॥ राजा वरुणो नुमन्यतां ॥
अनुजानातु ॥ यथा येनानुज्ञानेन प्रकारेण वा इयं कन्या स्त्री पौत्रं ॥
पुत्रभवं अघं दुःखं न रोदात् ॥ शोकं प्राप्य न रोदिष्यति ॥ क
दाचिदपि अपत्यवियोगो माभवत्विति तात्पर्यः ॥ इमां कन्यां गार्हपत्योग्नि
स्त्रायतां रक्षतु ॥ गार्हपत्याभिधो भावाग्निः पालयतु ॥ इमां पत्नीम
ग्निहोत्रिणीं धर्त्री रक्षतु ॥ अस्यै अस्याः प्रजां दीर्घमायुः नि दुष्ट बहु
काल जीवनं नयतु प्रापयतु ॥ ॥ अशून्यं च अशून्योपस्थान्सपुत्रप्रस
वा ॥ अवं था... तिया वतः ॥ यदा निसं भव सह संगतो संगा अस्तु भवतु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ मेध जीवतांदीर्घायुषां मातां यास्तु॥ जीवसुत्रास्व वस्विस पर्थः॥ किंच पोत्वं पुत्र
संबंध जं आनंद सुखं अस्ति अस्मिन्मय॥ आस्मिमुख्येन सर्व भावे
न वा प्राप्य विबुध्यतां॥ जानातु॥ सर्वज्ञा स्त्विर्य र्थः॥ यद्वापो त्वमानंदं
विधं२ विशिष्टतया बुध्यतां निद्रा सुखापे सां स्वस्त्वा जागर्त्विति॥ ॥ हेसुस्मी
यजंतं त्राय तइति यजत्रः हे यजत्र॥ यस्मात्वं सर्व प्रभू अतो नो
स्माकं विश्वानि सर्वाणि कर्माणि अयथा अमर्धरतानि कर्माणि स्व धा
६४ स्ति संपूर्णानि यथा स्या तथा धेहि॥ अनुष्ठानि ध्रुवा स्थापय॥ किंच रु४
दिव ओ स्वर्गे लोक मधि याप॥ आ पृथिव्याः पृथिव्यामधि याप॥
यत्त्वं महिमानं अस्मासु धेहि स्थापय॥ किंच॥ अस्यां पृथिव्यां जा
तं यत्तु द्रविणं वसु चित्रं नानारूपं स्वर्णरत्नादि भेदेन प्रशस्तं॥ ५
श्रेष्ठं॥ य आदिवि स्वर्गे जातं तदप्यस्मासु धेहि॥ हे अग्ने नोस्मान् रहि॥

आगच्छ॥ अस्मद्गृहदागम नो स्माकं सुम [illegible] सुखगम्यं [illegible] ः पंथा
नं अर्चि रादिमार्गं प्रदिशान् उपदिश न्न संपादय नूतं॥ आयुर्नि इतियाच
दुष्ट जीवनं धेहि॥ देहि किंभूतं॥ अजरं जरयोमदि पराभव रहि
नि तं अजरं इत्यपि विशेषणं॥ विभक्ति व्यत्ययेन॥ पुनः किंभूतं॥ ज्योति वा
मतस्त्र कार्याके॥ तस्त्रतिबंध को मृत्सु रपि नो स्माकं भव प्रसादाद
पैतु अपगच्छतु॥ अमृतमानंदं च नो स्मान् आगात्॥ आगच्छ
तु॥ वैवस्वतो यमस्य नोस्माकं अभयं हस्तं बंधेन पापात्तावो
दुखहेतु भयाभावं कृणोतु॥ करोतु॥ परमस्य वितिच॥ चेका
दशाहुतिं जुहोति॥ परमस्यवि स्पनेन मंत्रेण मंत्रस्याप्यत्रा दु
दक स्पत्री॥ एके प्राशानां ते॥ एके आचार्याः संस्रवप्राश
नां ते स्मामाहुतिमिच्छंति॥ तस्मिन्पक्षे परमस्युविति होमांते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरेतस्य संस्रवप्राशनं ॥ ॥ मुनिश्रोत्रियरग्निचित्सम्राट् स्थपतिश्री
वामनात्मज दीक्षितगदाधर धृतेगृह्यसूत्रभाष्ये प्रथमकांडे पंचमी
कंडिका ॥ ५ ॥ ॥ कुमार्या भ्राता शमीपलाशमिश्रान्लाजानंज
लीनांजलावावपति ॥ कुमार्याः कन्यायाः बंधुः भ्राता शमीपत्रमि
श्रितान् लाजान् अंजलिना कन्यायाः अंजलौ आवपति प्रक्षिपति ॥
लाजा शब्देन भ्रष्टा व्रीहय उच्यंते ॥ ॥ तां जुहोति संहतेन तिष्ठ
९५ न्त्यर्यमणं देवं कन्याग्निमयक्षत ॥ स नो अर्यमा देवः प्रेतो मुंचतु मा प
ते स्वाहा ॥ इयन्नार्युपब्रूते लाजानावपंतिका ॥ आयुष्मानस्तु मे प ९५
तिरेधंतां ज्ञातयो मम स्वाहा ॥ इमान्लाजानावपाम्यग्नौ समृद्धिक
रणं तव ॥ मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा ॥ ॥
ततो कुमारी तिष्ठति ॥ बधां तान्लाजान् स्वांजलौ स्थितान् संहत
तेन अविरलेनांजलिना अर्यमणमित्यादिभिस्त्रिभिर्मंत्रैर्जुहोति ॥

अविच्छिन्नसंजलिस्रुचेव जुहुयादित्याश्वलायनः ॥ तत्रैकैकेन मंत्रेण
प्रक्षिप्तलाजानामाहुतीयां त्रीणि जुहोति ॥ एवं च होमत्रयं भवति ॥
अत्र भारिकोद्धारः ॥ तिष्ठं तास्तिष्ठंतो पत्याग्रही तां जालिनैव सा ॥
अंजलिस्थितास्त्रिधास्तवीन्धां मुरवी प्रतिमंत्रतेः ॥ ॥ आपस्तंबेन तीर्थे
न दैवेनैवेति बहूचः ॥ अन्यो भ्रातुरभावे स्याद्बांधवो ज्ञातिरेव वेति ॥
भ्रात्राभ्यां हस्थानो वेत्याश्वलायनगृह्ये ॥ भ्राहस्थाने पितृव्यस्य मातु
लस्य च यः सुतः ॥ मातृस्वसृसुतस्तद्वत्पितृष्वसुरिति ॥ बहूचकारि
कायां ॥ द्रव्यत्यागे तु वरस्य कर्तृत्वं ॥ प्रधानं स्वामीफलयोगादिसुक
त्वात् ॥ मंत्रार्थः ॥ कन्याः पूर्वाः प्रथमं ॥ अर्यमणं सूर्यं ॥ देवं कांतं ॥ अग्निं
अग्निस्वरूपं वरलाभाय अयक्षत ॥ अयजन्त ॥ लिङ्ग्... द् स्वरूपं ॥
स नो अर्यमा देवस्ता लिरिश्वाय तो ता नो स्मान्न्इदानीं परिणीता कन्याइतः
पितृकुलप्रमुंचतु प्रमोचयतु ॥ यद्वा यरो ब्रूते ॥ कन्यां य अर्यमणमग्नि
मापतेः पत्युः कुलात्सह चारित्वाद्वार्यमाप्रमुंचतु ॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपेणाय जन्न सोऽर्यमा देवः पत्नेः प्रमुमेत्तः सकाशादिमां नोप्रमुंचतु माप
मोचयतु ॥ इतः अस्याः कन्यायाः सकाशात् मनोप्रमुंचतु ॥ अत्रेदं मंत्रं
यं न स्पैव वरपहिताप्रवृत्ति ॥ इयं नारीव धूः उपप्रब्रुः समीते ब्रूते ॥ ॥ किं
कुर्वती ॥ लाजानावपंती ही न्न आव पंतिका अग्नौ विभागन्नुः प्रक्षिपंती ॥
स्वार्थेकः ॥ किं ब्रूते तदाह ॥ मे मम पतिरायुष्मान् सकलदीर्घायुरस्तु ॥
६६ भवतु ॥ मम ज्ञातयः एधंतां वर्धंतामिति ॥ किंच ॥ हे पते इमान् अग्नौ आ ६६
प्रक्षिपामि वपामि ॥ किंभूतान् समृद्धिकरणं तव समृद्धिहेतवे ॥ अतो मम कन्या
याः तुभ्यं च तव च भर्तुः ॥ मलोपश्छांदसः ॥ संवननं वशीकरणमन्यो
न्यमनुरागः ॥ अथास्य दक्षिणं हस्तं गृह्णाति ॥ तदयमग्निरर्यमा अनु
मन्यतां अनुमोदनं कुरुतां ॥ इयं च स्वाहा ॥ तत्पत्नी अनुमन्यतां ॥
अथास्य दक्षिणं हस्तं गृह्णाति सांगुष्ठं गृभ्णामि ते सौभगत्वाय ह
स्तं मया पत्या जरदष्टिर्यथासः ॥ भगोऽर्यमा सविता पुरंधिर्मह्यं त्वादु
तदयमग्निरर्यमा अनुमन्यतां ॥ अनुमोदनं कुरुतां ॥ इयं च स्वाहा तत्पत्नी अनुमन्यतां ॥

गार्हपत्याय देवाः ॥ अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहं ॥ सामाहमस्मि ऋक्
त्वं द्यौरहं पृथिवी त्वं ॥ तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयाव
है पुत्रान् विंदावहै बहून् ॥ ते संतु जरदष्टयः संप्रियौ रोचिष्णू सुम
नस्यमानौ ॥ पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम श
रदः शतमिति ॥ अस्येति चतुर्थ्यर्थे षष्ठ्यर्थे ॥ अस्याः कुमार्याः दक्षि
णं सांगुष्ठं अंगुष्ठसहितं हस्तं गृह्णाति ॥ वरः स्वहस्तेनादत्ते ॥ गृभ्णामि
ते इति मंत्रेण ॥ अथशब्दो विस्पष्टानंतर्यद्योतनार्थः ॥
मंत्रार्थः ॥ हे कन्ये ते तव हस्तं गृभ्णामि ॥ हृपलोपश्छांदसीरिति भवेत् ॥ य
थायेन गृहीतहस्तेन मया पत्या त्वं जरदष्टिः जरस्थरा ॥ बहुवर्षा ॥
आयुष्मती आसन् वर्तीस्यर्थे निपातः ॥ भगादयश्च यो देवास्त्वां मां
ह्यं अदुः दत्तवंतः ॥ किमर्थं ॥ गार्हपत्याय ॥ गृहस्वामिनी भार्या सा विगा
र्हपत्य सेवितुं वा ॥ किंच ॥ सौभगत्वाय सुभगानां समूहः सौभगं तस्य भावः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽनग्नवंतसोऽतथैनिरतिशयानंदो दोषय इत्यर्थः॥ किंभूतां त्वां॥ पुरं
धिः द्वितीयार्थे प्रथमा॥ श्रेष्ठां सुरूपवतीं वा॥ तथा च श्रुतिः॥ पुरंधिर्यो
षेति योषित्स्येव रूपं दधातीति॥ कश्चैयं अमो विष्णुरहमस्मि॥ अमति
सर्वत्र गच्छति। सर्वं जानाति वेत्ति॥ नमिनोति हिनस्तीति वा अमा॥
तथा सौति सुवति सूते वा विश्वमिति सा लक्ष्मीस्त्वमसि॥ किंच॥ सावि
त्री त्रयीरूपा त्वमसि॥ अमो देवत्रयरूपोऽहमस्मि॥ ग्रामं इच्छति एतन्य
 ति तत्र एव एते न्यतः तान्दतन्यतः कलहकारिण इत्यर्थः॥ तत्रेष॥ ए
तनाभिः सेनाभिर्यतंते एतनायतः तान् एतनायतः॥ अवयवार्थी ता
न्स्त्वा बाधस्व॥ भग्नोद्यमान्कुरु॥ अथमा गांगायति॥ सरस्व
ती येदमवत्सु नगे वा जिनीवति॥ यां त्वां विश्वस्य भूतस्य प्रजाया
मस्यायतः॥ यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत्॥ तामद्य
गाथां गास्यामि या स्त्रीणामुत्तमं यश इति॥ अथ कया या दक्षिण

पादे अश्मनि निहित एव वरः सरस्वती येदमवेति मांगाथां गायति॥ मंत्रा
र्थः॥ हे सरस्वति वाग्देवते सुभगे कल्याणि वाजिनीवति॥ वाजः अन्नं
ददति अस्यामिव वाजिनी वती॥ अन्नवती॥ यद्वा॥ वाजाः पक्षाः सन्त्य
स्या इति वाजिनी हंसी॥ तत्र द्यदाति इदं युग्मं॥ कर्मप्रधानत्वा॥ प्र इष्टते
या अवरक्षत्यां त्वां अस्य विश्वस्य भूतस्य जातस्य पृथिव्यादेर्वा॥ प्र
जायां प्रसूत्यां जनित्रिं माहुः॥ किंभूतां॥ अग्रतः प्रथमां तदेव प्रपंच
यति॥ यस्यां प्रकृतिरूपायां त्वं इदं सर्वं विश्वं तथा भूतं पृथिव्यादिस
र्वं जगत् अस्तं गच्छत्॥ आसप्रलये लीनमित्यर्थः॥ पुनः सृष्ट्यादौ च
त्वाः सकाशात् समभवत्॥ जातं तस्याः सरस्वत्याः संबंधिनीं तां गाथां
गुणप्रभाववस्तु प्रकाशिकां अद्य गास्यामि॥ या श्रुता सती स्त्रीणामु
त्तमं श्रेष्ठं यशः कीर्तिं ददाति॥ अथ परिक्रामंतस्तु भ्यमग्रे पर्यवहन्सू
र्यां वहतुना सह॥ पुनः पतिभ्यो जायां दाग्ने प्रजया सहेति॥ अथ धतक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा देववरवध्वौ अग्नेः परिक्रमणं कुरुतस्तुभ्यमग्रे इत्यनेन मंत्रेण ॥ मंत्रस्य
लिंगाद्धारस्यैव ॥ मंत्रार्थः ॥ हे अग्ने तुभ्यं त्वदर्थमेव सोमादयः अग्ने पूर्वं
जन्मादिना दारभ्य पर्यवहन् परिगृहीतवंतः ॥ ततः सूर्यो सूर्यसंबंधि
नो भार्यो इमां भवान्वहतु ॥ किंभूतः नो पुरुषः परमपुरुषार्थ हेतु रित्य
र्थः ॥ तां जायां जायात्वेन पुनः पश्चात्स्वभोगानंतरं प्रजा पुत्रैः सह मम
ह्यमदाः ॥ देति संधिरार्षः ॥ एवं द्विरपरं त्वा अदिदि ॥ एवमनेन प्रकारे २९
९ ण जौलौदि कुमार्याः भ्राता तेत्यां चारभ्य परिक्रमणांतं यावत्कर्मो कं
तावत् ॥ द्विः वारद्वयमपरं पुनर्भवति ॥ चतुर्थं शूर्पकुष्ठयास्सर्वा
न्लाजानावपति भगाय स्वाहेति ॥ एतायेव [illegible] समासे चतुर्थे
लाजाहोमं जुहुयात् ॥ तत्रायं विशेषः ॥ कुमार्याभ्राता शूर्पकुष्ठया
शूर्पकोणेन शूर्पे अवशिष्टान्सर्वान्लाजान्कुमार्याः अंजलावाव
पति ॥ तान्कुमारी भगाय स्वाहेत्यनेन मंत्रेण जुहोति ॥ अत्र हरिहर

मिश्रैरयुक्तैरिव पांडिस्यंहृतमस्ति ॥ तत्र तेषां पंथः ॥ ततः समाप्त्याशा तूष्णीं
चतुर्थपरिक्रमणं वधूवरौ कुरुतः ॥ नेतरथावृत्तिं ॥ इतथा रंध्रत्तेः कार
णस्याध्यवायस्याभावात् ॥ ब्रह्माग्न्योरंतरागमनं हीतरथावृत्तिकारणम् ॥
कुतइतिचेत् ॥ हविषात्रस्वां कल्पिजा पंचपथापूर्वभिति परिभाषासूत्रा
त् ॥ तेन परिक्रमणं कुर्वंतौ वधूवरौ ब्रह्माग्न्योर्मध्येन गच्छेतामिति ॥ से
वीथ्यपंचधातातत्स्र ॥ अप्रसुः ॥ नहीतरथावृत्तिकारणं व्यवायः ॥ किंतर्हि
वचनादप्रदक्षिणावर्तनं ह्रस्वा प्रदाक्षिणावर्तनं वाहरत्वाद्धतरथावृत्तिः
कार्या ॥ तथा च परिभाषासूत्रम् ॥ विद्वस्याद्रस्य वेतरथावृत्तिरिति ॥ अ
यमर्थः ॥ विद्वस्य प्रदक्षिणमार्तेनेह्र त्वा आर्व्वस्य प्रदक्षिणमार्तेनं ह्रत्वा
इतरथावृत्तिः प्रत्यावृत्तिः कर्तव्या ॥ यत्र आत्मतः प्रदक्षिणावृत्तिः ह्र
त्वात्तत्र प्रदक्षिणावृत्तिरित्यर्थः ॥ ब्रह्माग्न्योर्मध्येव धूवरौ न गच्छेतामि
त्येतस्य तूपन्यासाद्धंह विष्यात्रेति सूचंदर्शितं ॥ तदविपरीतं ॥ नद्येत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत्राद्ब्रह्माग्न्योर्मध्येव ध्रुवशौनगच्छेत इत्यायाते किंत्वेतस्मादेव सूत्रान्म
ध्येगमनं हविषात्रेस्यार्थः॥हविर्ब्रह्मेत्यादि॥पात्राणि शूर्पादीनि॥
स्वामी कर्मजन्यफलभोक्ता यजमानः॥पत्नी च ऋत्विजः ब्रह्माद्याः
एतेषामेकत्र समवायेषु सति पूर्वं पूर्वं अस्मिन् सूत्रे प्रथमं प्रथम
मुपदिष्टं तदपेक्ष्य याबहिर्भवति॥हविरादीनां यतस्ततो न पत्न्या ऋ
११ त्विग्यजमानानां चेतस्ततो गमनागमने कर्मार्थमुपवेशने च सर्वत्रा ११
यमंतर्बहिर्भावो ज्ञेय इत्यर्थः॥ऋत्विजां ब्रह्मादीनामेकत्र समा
वेशाने चांतर्बहिर्भावः॥ततश्च व ध्रुवरावन्नेः प्रदक्षिणं कुर्वतोऽग्ने
त्तरं गत्वा॥तन्मध्यम एव गच्छेदिति॥तथा च कारिकायां॥दंपत्यो
र्गच्छतोस्तत्र ब्रह्माग्नि अंतरा गतिरिति॥त्रिः परिणीतां प्राजाप
त्यं हुत्वा॥त्रिः परिणीतां कुमारीं सैतीं प्राजापत्यं प्रजापतिर्देवता

मकहोमं हुत्वा॥त्रिर्गृह्णामि तत्रथा वस्ति पुरा सार्थम्॥उक्तं हि परिभा
षायां॥वित्स्यारस्यैवेतरथा रत्तिरिति॥अत्राचारात्तु संधी चतुर्थप
रिक्रमणं कुरुत इति वासुदेवगंगाधरहरिहरेणुश्रीकृष्णाः॥७॥
इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहाल जदीक्षितगदाधरकृते
गृह्यसूत्रभाष्ये प्रथमकांडे सप्तमी कंडिका॥७॥ ॥अथैनामुदीची
ं सप्त पदानि प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वा
रि मायोभवाय पंच पशुभ्यः षड् ऋतुभ्यः सखे सप्तपदा भव सामा
मनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुषजति॥अथ वरः॥
एनां कुमारीमग्नेरुत्तरतः उदीचीमुदङ्मुखी एकमिषे द्वे इत्येतैः सप्त
मंत्रैः सप्त पदानि प्रक्रामयति॥कारितत्वात्सप्तपदानि प्रक्रमणे स्वातं
त्र्येषणेति॥कुमार्याः दक्षिणपादं गृहीत्वा॥अग्ने रग्ने स्थापयतीत्यर्थे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुस्त्वान्नयत्विति सर्वत्र षट्सु मंत्रेष्वनुषंगः ॥ न तु सप्तमे मंत्रे ॥ तुल्ययो
गित्वात्साकांक्षित्वाच्च पूर्वमंत्रमिति कर्काचार्यः ॥ अन्येषां भाष्यकारा
णां च द्वित्रिकाराणां च मते सर्वमंत्रेष्वनुषंगः ॥ मंत्रपाठो वरस्य ॥ अत्रै
वं प्रयोगः ॥ एकमिषे विष्णुस्त्वां नयतु ॥ द्वे ऊर्जे विष्णुस्त्वां नयतु ॥ त्री
णि रायस्पोषाय विष्णुस्त्वां नतु ॥ चत्वारि मायोभवाय वि॰ तु ॥ पंच प
शुभ्यो वि ॥ तु ॥ षडृतुभ्यो विष्णुस्त्वां नयतु ॥ सखे सप्तपदा भव सखे स
१०० सपदा भव सा मामनुव्रता भवेति ॥ प्रक्रमणेषु सप्तपाद नातिक्रम १००
णमिति रेणुदीक्षितः ॥ मंत्रार्थः ॥ ईषे अन्नाय ॥ ऊर्जे बलाय ॥ रा
यस्पोषाय धनपुष्ट्यै ॥ मायः सुखं तत्संभवः उत्सत्तिः पशुभ्यादिभ्यस्त त
त्सुखाय सखे इह एतैर्मित्रसात्वं सप्तपदा भूः सादि सप्तलोकप्रख्याता
भव ॥ मां अनुवर्तेनी च भव ॥ निष्क्रमणप्रभृत्युदकुंभं स्कंधे स्था

दक्षिणतोऽग्नेर्वाग्यतस्तिष्ठतो भवति ॥ निष्क्रमणं पित्राप्रतामाक्षायगृही
तानि ष्क्रामतीत्येतावदुच्यते ॥ तदारभ्य कश्चित्पुरुषः उदकपूर्णं कुं
भं स्कंधे गृहीत्वा विवाहाग्नेर्दक्षिणतो वाग्यतस्तूष्णींतिष्ठेत् ॥ उत्त
रत एकेषां ॥ एकेषां आचार्याणां मते अग्नेरुत्तरतस्तिष्ठति ॥
अतश्च विकल्पः ॥ तत एनां मूर्धन्यभिषिंचत्यापः शिवाः शिवतमाः
शांताः शांततमास्तास्ते कृण्वंतु भेषजमिति ॥ ततस्तस्मादुदकुं
भादुदकेन जलमादाय एनां वधूं मूर्ध्नि त्रीरसिवर एव आपः
शिवा इत्यनेन मंत्रेणाभिषिंचति ॥ मंत्रार्थः ॥ याः आपः शिवाः क
ल्याणहेतवः शिवतमाः अभ्युदयकारिण्यः ॥ शांताः सुखकर्त्र्यः ॥
ता आपः ते तव भेषजं आरोग्यं कृण्वंतु कुर्वंतु ॥ आपो हि ष्ठेति
च तिसृभिः ॥ चकारात्तस्मादुदकादापो हि ष्ठेति त्रिभिर्मंत्रैरभिषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फः कार्यः॥ ॥अथैनां सूर्यमुदीक्षयतितच्चक्षुरिति॥ अथ एनां
वधूं वरः सूर्यमुदीक्षयति॥ सूर्यावेक्षणं कारयति॥ उदीक्षयती
ति णेरित्वाद् घोषणा॥ सूर्यमुदीक्षस्वेति॥ सा च वरेण प्रेरि
ता सूर्यं पश्यतीति तच्चक्षुरित्यनेन मंत्रेण॥ तद् दिवा विवाहपक्षे ए
तद् इतरेणु दीक्षित हरिहरौ॥ अस्यास्तु सूर्यावेक्षणा यथानुप
पत्या अस्तमिते ध्रुवं दर्शयतीत्यत्रास्तमितेग्रहणाच्च एतन्मूला
१०१ नुसारिणां दिवैव विवाहस्सूच्यते॥ अथास्ये दक्षिणांसं समधि १०१
हृदयमालभते॥ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते
अस्तु॥ मम वाच्य मेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु म
ह्यमिति॥ अस्येति चतुर्थ्यर्थे षष्ठी॥ अस्याः वध्वाः दक्षिणं
समधि दक्षिणस्य अंसस्य स्कन्धस्य अधि उपरि हस्तं नीत्वा॥

मम व्रते अनेन मंत्रेण तस्याः हृदयमालभते वरः॥ हे कन्ये इत्य
ध्याहारः॥ मम व्रते तेन शास्त्रविहित नियमादौ ते तव हृदयं मनः
दधामि स्थापयामि॥ किं च॥ मम चित्तमनु॥ मम चित्तानुकूलं
ते तव चित्तमस्तु॥ त्वं च मम वाचं वचनं एकमना अव्यग्रचित्ता सती
मनोवृत्तिं जुषस्व॥ हृष्टचित्तादरेण कुरुष्व॥ सा त्वां च तत एव बृह
स्पतिर्मह्यं मदर्थं मां प्रसादयितुमित्यर्थः॥ नियुनक्तु नियोज
यतु॥ अथैनामभिमंत्रयते॥ सुमंगलीरियं वधूरिमां
समेत पश्यत॥ सौभाग्यमस्यै दत्वायाथास्तं विपरेतनेति॥
वर एनां वधूं सुमंगलीरित्यनेन मंत्रेण अभिमंत्रयते॥ अत्रा
चाराच्च तत्रस्त्रियो मंगलं कुर्वंति॥ तथा च कारिकायां॥
पतिपुत्रान्विताभव्याश्च तत्र सुभगा अपि॥ सौभाग्यमस्यै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वधूस्तां मंगलाचारपूर्वकमिति ॥ मंत्रार्थः ॥ हे विवाहदेवताः इयं
वधूः सुमंगलीः । शोभनमंगलरूपा ॥ विसर्गश्छंदसः अत इमां
कन्यां समेत संगच्छत संगत्य च ॥ इमां पश्यत दृष्ट्वा विलोकयत ॥
किंच ॥ अस्यै सौभाग्यं दत्वा त्ति गृहं प्राप्यमा तइत्यर्थः ॥ न वि
परेतन । विमुखतया परा इत अपगच्छत । पुनरपि पुत्रादिमंग
लमाशास्य पुनरागमनाय व्रजत इत्यर्थः ॥ पय यस्तं याथन
१०२ हि न विपरेतन नेति ॥ असोमनसा इति श्रुतेः ॥ नोढ पुरुषो न्मध्य १०२
प्राग्वो दग्वानुगुप्त आगार आनडुहे रोहि ते चर्मण्युपवेशयन्
तीह गावो निषीदंत्विति राभ्यां इह पुरुषाः इह सहस्रदक्षिणो
यज्ञ इह पूषा निषीदंत्विति ॥ ततो वरस्तां वधूं उन्मथ्य उक्षि
प्य उत्थाप्य प्राक् प्राच्यां उदक् उदीच्यां वा अनुगुप्ते आगारे

परिवृते रोहिते रक्तवर्णे आनडुहे चर्मणि उपवेशयतीह गाव इत्य
नेन मंत्रेण ॥ चर्म चैतद् ग्रीवमुपरि लोमास्तीर्णं भवति ॥ चर्मण्युत्तरलो
मनि प्राक्ग्रीवाणीति परिभाषितत्वात् ॥ रोहपुरुषः कश्चिद् बलवान्
पुरुष इति हरिहरः ॥ रोहपुरुषो जितेंद्रिय इति भर्तृयज्ञाः ॥ जामाते
व रोहपुरुष इति रेणुदीक्षितगंगाधरौ ॥ अस्माकमपि मतं वरएव ॥ त
स्य च रोहत्वं जितेंद्रियत्वेन । अन्यथा वध्वा अनुगुप्तागारनयनेमन
सिउन्मादो स्यात् नचैषापि भार्यात्वमुत्पन्नमिति ॥ मंत्रार्थः ॥ इह कन्या
निवेशने गावः अश्वाः पुरुषाश्च निषीदंतु वसंतु ॥ इह पदावृत्तिः कर्तृ
भेदापेक्षया ॥ किंच ॥ उक्तार्थो ॥ इहैव सहस्रं गावो दक्षिणा यस्य स
यज्ञः पूषा पुष्टिकरो निषीदंतु ॥ पूषा वै सहस्रदक्षिणा आसेति श्रु
तेः ॥ ग्रामवचनं च कुर्युर्विवाहश्मशानयोः ॥ विवाहे श्मशाने च वृ
द्धानां स्त्रीणां वचनं वाक्यं कुर्युः ॥ सूत्रे अनुपनिबद्धमपि वधूवर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योर्गन्धिस्त्रक्रमालाधारणं॥ उभयोर्वस्त्राभ्यां ग्रंथिकरणं करग्रहणेन्य
धं२ ग्नौ पुत्रिकाधारणं वरहृदयेदध्यादिलापनादिताश्च यत्स्मरंति तदपि क
र्त्तव्यमित्यर्थः॥ चशब्दाद्देशाचारेपि॥ ग्रामवृद्धेन स्वकुलवृद्धाः
स्त्रियोभिधीयते॥ ताहि पूर्वपुरुषैरनुष्ठीयमानं सदाचारं स्मरंति॥
१०३ ग्रामवचनं लोकवचनमिति भर्तृयज्ञः॥ वृद्धानां स्त्रीणां वचनं कार्य १०३
मिति कुत इत्यत आह॥ ग्रामं प्रविशतादिति वचनात्तस्मात्तयोर्ग्रामिः
प्रमाणमिति श्रुतेः॥ ग्रामं वृद्धानां स्त्रीणामाचारं प्रविशतादिति स्मृ
तिवचनात्॥ ननु ग्रामं प्रविशतादिति स्मृतिवचनात्॥ हरिद्रालापनादौ
अस्तु प्रमाणं यत्र तु अथैनामश्मानमारोहयतीत्येतदनंतरं तूष्णीं
वरस्य पाषाणारोहणं कारयित्वा॥ कुमार्या भ्राता वरांगुष्ठोपरि पिप
लं निधाय वराद्द्रव्यादिग्रह्णातीति ताः स्मरंति तदप्रमाणं लोभमू
लत्वेन वैसर्जनीयवस्त्रवदित्यत आह॥ तयोर्विवाहश्मशानयोर्ग्रामिः

प्रमाणमिति श्रुतिवचनात्ताभिः स्मर्यते रूप्यग्रहणादि तदपि प्रमा
णमिति प्रत्यक्षश्रुतिमूलत्वात्॥ आचार्याय वरं ददाति॥ ततो वरः आ
चार्याय स्वकीयाय वरं ददाति॥ गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्या
श्वो वैश्यस्य॥ वरशब्दार्थव्याख्यानं करोति॥ ब्राह्मणश्चेद्वरयि
ता तदा गां ददाति॥ क्षत्रियश्चेद्वरस्तदा ग्रामं वरं ददाति॥ वैश्यश्चे
द्वरस्तदा अश्वं वरं ददाति॥ एते वरा विवाह एव प्रकरणात्॥ सर्वा
सु वरचोदनासु गवादयो वरशब्दवाच्या इति भर्तृयज्ञः॥ ॥ अधि
रथं शतं दुहितृमते॥ ददातीत्यनुवर्त्तते॥ दुहितृमानयमस्य दु
हितर एव न पुत्राः॥ तस्मै दुहितृमते रथेनाधिकं गवां शतं दत्वा
तस्य कन्यामुद्वहेत्॥ प्रतिषिद्धा ह्यसौ॥ मनुः॥ तस्मै दुहितृमते
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता॥ नोपयच्छेत तां कन्यां
पुत्रिकाधर्मशंकयेति॥ तस्याः परिक्रियाय रथाधिकं गवां शतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शनात्॥ अस्तमिते ध्रुवं दर्शयति ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि
पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः श
तमिति॥ अस्तमिते नक्षत्रं ध्रुवं ध्रुवसंज्ञं नक्षत्रं दर्शयति ध्रुवमसीत्यने
न मंत्रेण॥ ध्रुवमीक्षमाणे संध्योपषणा॥ अयमेव मंत्रः कारितार्थे॥ अत्रक
र्कभाष्यं॥ अस्तमिते ध्रुवं दर्शयति। ध्रुवमसीत्यनेन मंत्रेण कारितार्थे चाय त्रै ५
१०४ मेवमंत्रः॥ पश्यामीत्यत्रैतण्यर्थेपि दृष्टं भवति दर्शयामीति तदुक्तं भव १०४
ति पश्यामीति मंत्रोपि चैवं व्यवस्थितः॥ ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृह
स्पतिर्मया पत्या प्रजावती संजीव शरदः शतमिति कुमार्यो वाच्यं तेन इति॥ व
धूमंत्रपाठ इति भातिमानं गंगाधरो॥ मंत्रार्थः॥ हे वधु त्वं ध्रुवमसि ध्रु
वा शाश्वती असि भव सियतः त्वा त्वां ध्रुवं तारका विशेषं पश्यामि दर्शया
मि। मंत्रांते भर्तृणापि चज्ञेयः॥ अंत स्वमसि ध्रुवा शाश्वती। पोष्या पोषणी
या। महत्त्वाद्पोष्ट्री वा। एधि भव। वर्धयेति वा॥ एतदर्थमेव बृहस्पति
र्मह्यं त्वां मह्यमादात्॥ दत्तवान्। अतो मया पत्या भर्त्रा सह प्रजाव

ती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि जीव प्राणिहि॥ सा यदि न पश्ये
त्पश्यामीत्येव ब्रूयात्॥ सा कन्या यदि ध्रुवसंज्ञकं सूक्ष्मं नक्षत्रं न पश्ये
त्तदा पश्यामीत्येव वक्तव्यं तेन पा॥ न पश्यामीति न ब्रूयात्॥ त्रिरात्रमक्षा
रालवणाशिनौ स्यातां। लग्नदिनमारभ्य त्रिरात्रं यावत्तु वधूवरौ अक्षा
रं अलवणं चाश्नीतः स्वेवं त्री लौ स्यातां॥ अधः शायी यातां॥ अभूंधो
मौ स्वपेतां॥ खट्वाद्युदासार्थो धः शब्दः॥ नास्तरणव्युदासार्थः॥ संवत्स
रं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमंततः। विवाहदिनमारभ्य
संवत्सरं यावत् न मिथुनमुपेयातां॥ ब्रह्मचारिणौ स्यातां। द्वादशरात्रं वा।
षड्रात्रं वा। त्रिरात्रं वा॥ ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहा
याज्ञिकवामनात्मजदीक्षितगदाधरकृते सूत्रभाष्ये प्रथमकांडे अष्ट
मी कंडिका॥ ८॥ अथ विवाहपदार्थक्रमः॥ तत्र तावत्तदुपर्योक्तयाज्ञिकं ग॰१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्संक्षेपेणोच्यते॥ अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः॥ आश्र
मेण विना तिष्ठन् प्रायश्चित्ती भवेद्द्विज इति दक्षस्मरणे॥ अविप्लु
तो ब्रह्मचर्येणाबाह्यंतरलक्षण्यां स्त्रियमुद्वहेत॥ अनन्यपूर्वि
कां कांतां असपिंडां यवीयसीं॥ अरोगिणीं भ्रातृमतीं असमाना
र्षगोत्रजामिति याज्ञवल्क्योक्तेः॥ अविप्लुतो ब्रह्मचर्येणाबा
ह्यंतरलक्षणयुक्तां स्त्रियमुद्वहेत॥ तत्र कुलमध्ये परीक्षेतेति गु
१०५ ह्यांतरवचनादौ सदाचारादिगुणान्वया हीनक्रियत्वादिदोषरही १०५
नेन यावत्परीक्ष्य कुलं तत्कन्या ग्राह्या॥ तदनु लक्षणान्यपि परीक्ष्यं॥ लक्ष
णानि च शुभाशुभसूचकानि॥ अनुलोमकेशादशनत्वादीनि प्रश
स्तगम्यानि ग्राह्याणि॥ तथा च मनुः॥ अव्यंगांगीं सौम्यनाम्नीं हंस
वारणगामिनीं॥ तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रिय
मिति॥ मान्यं तरा पि तान्युक्तान्याश्वलायनगृह्ये॥ दुर्विज्ञेया
नि लक्षणान्यष्टौ पिंडान्कृत्वा ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्र

तिष्ठितं॥ यदियं कुमार्यभिजाता तदीयमिह प्रतिपद्यतां यत्सत्यं त
दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति॥ क्षे
त्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विंद्याद्गो
ष्ठात्पशुमती वेदीपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसंपन्ना दे
वनात्कितवी चतुष्पथाद्विप्रव्राजिनी इरिणादधन्या श्मशानात्पतिघ्नीति॥
अस्यार्थः॥ दुर्विज्ञेयानि लक्षणान्येवं परीक्षेत॥ क्षेत्रादिभ्यो मृदं आहृ
त्य अष्टौ पिंडान् कृत्वा ऋतमग्र इत्यनेन मंत्रेण मृत्पिंडानभिमंत्र्य कुमा
पिंडा रीं ब्रूयादेषां मध्ये एकं पिंडं गृहाणेति॥ यदि कस्मिन्नपि संवत्सरे द्विःफलति
तदुभयतः सस्यं क्षेत्रं॥ तस्मात्क्षेत्रादाहृतं पिंडं गृह्णीयाच्चेदन्नवती अ
स्याः प्रजा भविष्यतीति विंद्यात्॥ एवमुत्तरत्रापि ज्ञेयं॥ अपवृत्ते कर्मणि
मा वेदिः सा वेदीपुरीषं॥ अविदासी ह्रदो नाम अशोष्यो ह्रदः॥ देवनं द्यू
तस्थानं॥ इरणं भूषणं॥ विप्रव्राजिनी विधं प्रजननशीला स्वैरिणी तिया
वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्॥ पतिं हंतीति पतिघ्नी॥ अत्रैवं क्रमः॥ क्षेत्रादिभ्यो मृदाहरणं पिंडा
एककरणं॥ अन्यस्य क्षतमग्न इति पिंडाभिमंत्रणं॥ एषामेकं गृहाणेति
प्रैषः॥ क्षेत्रपिंडग्रहणे अस्याः प्रजा अन्नवती भविष्यतीति ज्ञातव्यं॥
गोष्ठपिंडदानेपशुमती॥ वेदीपिंडादाने ब्रह्मवर्चस्विनी॥ ह्रदपिंडादाने
सर्वसंपन्ना॥ द्यूतस्थानपिंडादाने पक्षिनिनी चतुष्पथपिंडादाने
१०६ स्वैरिणी॥ ऊषरपिंडादाने धनरहिता॥ श्मशाने भूमेः पिंडादाने पति १०६
घ्नी॥ अत्र प्रजास्तुति निंदाद्वारेण सैव स्तुता निंदिता चेति मंतव्यं॥
उत्तरैस्तु त्रिभिर्वाक्यैः सैव निंद्यते॥ अनन्यपूर्विकेत्यनेन वाग्दत्ताम
नोदत्ता अग्निं परिगता सप्तपदीं नीता भुक्ता गृहीतगर्भा प्रसूता
चेति सप्त पुनर्भ्वो व्यावर्त्तिताः॥ कांतां मनोरमनोनयनयोरानंदक
रीं॥ असपिंडेति सापिंड्यवर्ज्जनं॥ तच्चैककर्तृकशरीरावयवान्वयेन भव
ति॥ एकस्य हि पितुर्मातुर्वा शरीरावयवाः पुत्रपौत्रादिषु साक्षात्स

रंपरया वा प्रभुक्तशोणितादिरूपेणानुस्यूताः॥ यद्यपि पत्न्याः पत्न्यास
ह भ्रातृपत्नीनां च परस्परं नैतत्संभवति तथाप्याधारत्वेनैकशरी
रान्वयवान्वयोस्त्येव॥ एकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारेण ता
स्वाहिता इति मिताक्षराराकीमदनपारिजातादय आहुः॥ कथंचि
देकपिंडक्रियाप्रवेशान निर्वापसापिंड्यं चंद्रिकापराकर्मेधाति
थिमाधवादयो वदंति॥ तन्नेयं विधात्रेरवयवान्वयेन सापिं
ड्यात्तिप्रसंगेनयेकपिंडदानक्रियान्वयित्वेन वा गुरुशिष्यादेरपि
श्राद्धदेवतात्वे सापिंड्यमिति न क्वाप्यसपिंडेत्यत्र आह याज्ञवल्क्यः॥
पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा इति॥ मातृपक्षे पं
चमात्पितृपक्षे सप्तमादूर्ध्वं सापिंड्यं निवर्त्तत इति शेषः॥ कूट
स्थमारभ्यात्र गणना कार्या॥ तदुक्तं॥ वध्वा वरस्य वा तातः कू
टस्थाद्यदि सप्तमः॥ पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्त्तत इति॥
कूटस्थो मूलपुरुषः। यतः संतानभेदः॥ यवीयसीत्यपेक्षयाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयसा च वपुषा च सूनां ॥ अरोगिणीं च चिकित्सराजयक्ष्मादिरोगरहि
तां ॥ भ्रातृमतीमिति पुत्रिकाकरणशंकानिवृत्त्यर्थं ॥ यत्र तु पुत्रिकाका
रणाभावनिश्चयस्तत्र अभ्रातृकामप्युद्वहेत् ॥ असमानार्षगोत्रजां ॥
ऋषेरिदमार्षं ॥ गोत्रप्रवर्तकस्य मुनेर्व्यावर्तकः प्रवर इत्यर्थः ॥ गोत्रं
वंशपरंपराप्रसिद्धं ॥ असमाने आर्षगोत्रे यस्य तस्माज्जाता या न
१०६ भवति तां ॥ यास्कवाधूलमौनमौकानां भिन्नगोत्राणामपि भार्गववि १०६
वैतहव्यसावेतसेति । प्रवरैक्यमिति तत्र विवाहो मा भूदिति अस
मानार्षजामित्युक्तं ॥ आंगिरसांबरीषयौवनाश्वेति मांधात्रांबरीष
यौवनाश्वेति ॥ आंगिरसपाधान्यात्प्रवरभेदेपि यौवनाश्वेति गोत्रैक्यं ॥
तादृशाविवाहवारणाय समानगोत्रजामित्युक्तं ॥ तथा च गोत्रप्र
वरौ पृथक् पर्युदासेनिमित्तभूतौ प्रवरैक्ये विशेषमाह बौधा
यनः ॥ पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृग्वंगिरो
गणेष्वेवं शेषेष्वेकोपि वारयेदिति ॥ विवाहविशेषः ॥ ॥ इतिसं

क्षिप्तगोत्रप्रवरनिर्णयः ॥ ॥ अथ समानार्षगोत्रजाविवाहे प्रा
यश्चित्तं ॥ परिणीय सगोत्रां तु समानप्रवरां तथा ॥ त्यागं कृत्वा द्विज
स्तस्यास्ततश्चांद्रायणं चरेत् ॥ त्यागश्चोपभोगस्य न तु तस्याः ॥
समानप्रवरां कन्यामेकगोत्रामथापि वा ॥ विवाहयति यो मूढस्त
स्य वक्ष्यामि निष्कृतिं ॥ उत्सृज्य तां ततो भार्यां मातृवत्परिपालये
दिति शातातपस्मृतेः ॥ समानप्रवरस्वरूपं च बौधायनेनोक्तं ॥
एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ॥ तावत्समानगोत्रत्वमृते
भृग्वंगिरोगणादिति ॥ समानगोत्रत्वं समानप्रवरत्वमित्यर्थः ॥
५ वि अथ सापत्नविषये ॥ सापिंड्यां सपत्नमातामहकुलेप्यातिदेशि
कात्सापिंड्यात्सपत्नमातामहकुलेप्यातिदेशिकात्सापिंड्याद
विवाहः ॥ तथा च सुमंतुः ॥ पितृपत्न्यः सर्वा मातरस्तद्भ्रात
रो मातुलाः ॥ तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्त
दपत्यानि भागिनेयानि अन्यथा संकरकारिण्यः स्मरति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र यावद्वचनं वाचनीकमिति न्यायेन परिगणितेभ्यो व्याति
देशिकसापिंड्यं न तु पंचमसप्तमपर्यंतं कुचित्तु वचनादेव वि
वाहनिषेधः॥ यथा बह्वृचगृह्यपरिशिष्टे॥ अविरुद्धसंबंधामु
पयच्छेदीस कल्यां सवर्णे च विरुद्धसंबंधं दर्शयति॥ यथा भार्या
स्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति॥ तथा च नारदः॥ पूर्वदु
१०८ तेनैव कार्यो नैकस्मै दुहितृद्वयं॥ नैवैकजनन्ये च कन्ये द्वे पु १०८
त्रयोर्नैकजन्मनोः॥ न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदा च नै
ति॥ ॥अथ वरगुणाः॥ तत्र बुद्धिमते कन्यां प्रयच्छेदिति
बह्वृचगृह्ये यमः॥ कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च
सनाथतां च॥ एतान् गुणान्सप्त निरीक्ष्य देया कन्या बुधैः
शेषमचिंतनीयं॥ याज्ञवल्क्यः॥ एतैरेव गुणैर्युक्तः सव
र्णः श्रोत्रियो वरः॥ यत्नात्परिक्षितपुंस्त्वे युवा धीमान्
जनप्रियः॥ एतैः कन्यागुणैः॥ अनन्यपूर्विकां च यवी

यसीं भ्रात्मत्यव्यतिरिक्तैर्युक्तः॥ कात्यायनः॥ उन्मत्तः पतितः
कुष्ठी षंढश्चैव समगोत्रजः॥ चक्षुःश्रोत्रविहीनश्च तथापस्मार
दूषितः॥ वरदोषाः स्मृता ह्येते कन्यादोषाः प्रकीर्तिताः॥ नार
दः॥ परीक्ष्य पुरुषं पुंस्त्वे निजैरेवांगलक्षणैः॥ पुमांश्चेद्दवि
केत्वेन स कन्यां लब्धुमर्हति॥ सुबद्धजत्रुजानुश्च स्निग्धसुब
द्धांसशिरोधरः॥ यस्यापि प्लवते मूत्रं ह्रादि मूत्रं च फेनिलं॥
पुमान्स्याल्लक्षणैरेभिः॥ विपरीतस्तु षंढकः॥ अपत्यार्थं स्त्रियः
सृष्टाः स्त्री क्षेत्रं बीजिनो नराः॥ क्षेत्रं बीजवते देयं नाबीजी
क्षेत्रमर्हति॥ अथ कन्यावरयोर्वृहस्पतिस्सानुकूल्याभाव
स्प४ नेसानुकूल्याय वृहस्पतिशांतिः॥ तत्र शौनकः॥ कन्योद्वाहस्य
काले तु अनुकूलं न विद्यते॥ ब्राह्मणस्योपनयने गुरोर्वि
धिरुदाहृतः॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत्॥
ईशान्यां धवलं कुंभं धान्योपरि निधाय च॥ दमनं मधुपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घं च पालाशं चैव सर्षपानु ॥ मांसी गुडूच्यपामार्गा विडंगी शं
खिनी वचा ॥ सहदेवी हरिक्रांता सर्वौषधिगणा वरी ॥ बला च सह
देवी च निशाद्वितयमेव च ॥ स्थाज्यभागपर्यंतं स्वशाखोक्तवि
धानतः ॥ इहोक्तसंगडेभ्य चर्वीत पुष्पाक्षतादिभिः ॥ देवपूजो
त्तरे काले ततः कुंभानुमंत्रणं ॥ अश्वत्थे समिधश्चाज्यं पा
१०९ यसं सर्पिषा युतं ॥ यवव्रीहितिलाः साज्या मंत्रेणेव बृहस्प १०९
तेः ॥ अष्टोत्तरशतं सर्वं हामशेषं समापयेत् ॥ पुत्रदारस
मेतस्य अभिषेकं समाचरेत् ॥ कुंभाभिमंत्रेणोक्तेश्च समुद्र
ज्येष्ठमंत्रैः ॥ प्रतिमां कुंभवस्त्रं च आचार्याय निवेदयेत् ॥
ब्राह्मणान् भोजयेत्पश्चाच्छुभदः स्यान्न संशयः ॥ अथा
परिहार्य कन्यावैधव्ययोगमुच्यते ॥ तत्र मार्कंडेयपु
राणे ॥ बाला वैधव्ययोगे तु कुंभषु प्रतिमादिभिः ॥ ह
त्वा लग्नं ततः पश्चात्कन्यो दाह्येति चापरे ॥ अत्रे पुनर्भू

दोषाभाव उक्तो विधानखंडे ॥ स्वर्णं बुपिप्पलानां च प्रतिमा
विष्णुरूपिणी ॥ तया सह विवाहे तु पुनर्भूत्वं न जायते ॥
सूर्यारुणसंवादे ॥ ॥ विवाहात्पूर्वकाले च चंद्रतारा
बलान्विते ॥ विवाहोक्तं च मंथन्या कुंभेन सह वोढयेत् ॥
सूत्रेण वेष्टयेत्सम्यक् दशतंतु विधानतः ॥ कुंकुमोलंकृत तद्दे
हं तयोरेकांत मंदिरे ॥ ततः कुंभं च निःसार्य प्रभंज्य सलि
ले शायेत ॥ ततो भिषेचनं कुर्यात्संच पल्लव वारिभिः ॥ कुं
नम प्रार्थनापि तत्रैवोक्ता ॥ वरुणांग स्वरूपाय जीवनानां स
माश्रय ॥ पतिं जीवय कन्यायाः श्रीरपुत्र सुखं कुरु ॥ देहि
विष्णो वरं देव कन्यां पालय दुःखतः ॥ ततोलंकार वस्त्रा
द्यं वराय प्रतिपादयेत् ॥ ॥ इति कुंभविवाहः ॥ ॥ त
त्रैव मूर्तिदानमप्युक्तं ॥ ॥ ब्राह्मण साधुमामंत्र्य
संपूज्य विधिविधाहणे ॥ तत्सेदघाविधानेन विष्णोर्मूर्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११० चर्स्तुते जे॥ शुद्धवर्ण सुवर्णेन विनिर्मातां यथा पुनः॥ निर्मि ११०
तां रुचिरां शंखचक्रगदा चक्राब्जसंयुताम्॥ दधानां वाससी पीते कु
म्भोदोसलिलमालिनीम्॥ सदक्षिणां सतां दद्यान्मंत्रमेनमुदीर
येत्॥ यन्मया प्राक् जनुषि स्वकन्यापतिसमागमम्॥ वि
घ्नो ये विशीर्णश्च स्त्राचोरितो वाऽपि विरूपया॥ प्रथमानं मघो
रं च पशः सौख्यं धनीयतां वैधव्याद्यति दुःखौघानाशा
येसुखलब्धये॥ बहुसौभाग्यलब्ध्यै च महाविष्णो
रिमां तनुम्॥ सौवर्णां निर्मितां शक्त्या तुभ्यं संप्रददे द्वि
ज॥ अनघाहमस्मीति चिरकालं प्रजपेदिति॥ एवमस्त्विति तं
स्यो क्तिं गृहीत्वा स्वगृहं व्रजेत्॥ ततो वैवाहिकीं कुर्याद्विधि
दातामृगीदृशः॥ अन्ये श्रेयः पृच्छ वि.वाह रक्षसे च नान्यस्तत्रै
रा१ व ज्ञेयाः॥ ग्रंथगौरवभयान्नेहोच्यते॥ अथ विवाहकाले कन्या
अनुमति चेत्तत्र यद्धर्मशास्त्रे॥ विवाहे विहितेतंत्रे होमकाल उपस्थिते॥

कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः॥ स्नापयित्वा तु
तां कन्यामर्चयित्वा यथाविधि॥ युंजानामाहुतिं हुत्वा ततः
कर्माणि योजयेत्॥ युंजानः प्रथमं मित्यनेन मंत्रेण आहु
तिं हुत्वेत्यर्थः॥ यज्ञो॥ विवाहहोमे प्रक्रांते यदि कन्या रजस्वला॥
त्रिरात्रं दंपती स्यातां पृथक्शय्यासनाशनौ॥ चतुर्थेऽह्नि
संस्नातौ तस्मिन्नग्नौ यथाविधि॥ जुहुयातामिति श्रीधरः॥
अथ विवाहे आशौचनिर्णयः॥ विधिवत्प्रत्ते कन्यावरणे त्रि
रात्रादि व्रतस्समाप्ते पर्यंते मध्ये आशौचप्राप्तौ तदयोः ह्य
सद्यः शौचं चंद्रिकाकार आह॥ तत्र याज्ञवल्क्यः॥ दाने वि
वाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यः शौ
चं विधीयते॥ इति॥ दातुर्वरस्य कन्यायाश्च सद्यःशौचं विवा
हइत्यर्थः॥ बृहस्पतिः॥ विवाहोत्सवयज्ञेषु त्वंतरामृतसूत
के॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः॥ षट्त्रिंशन्मते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवाहोत्सवयज्ञेषु चंतराम्हतसूतके ॥ परैरन्नं प्रदातव्यं भोक्त
व्यं च द्विजोत्तमैः ॥ व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे ॥ प्रारब्धे
सूतकं नस्यादनारब्धे तु सूतकं ॥ प्रारंभश्च तेनोक्तः ॥ प्रारंभो
वरणं यज्ञे संकल्पव्रतसत्रयोः ॥ नांदीमुखं विवाहादौ श्राद्धे पाक
परिक्रिया ॥ इति ॥ वरणमिति मधुपर्के ॥ तथा च ब्राह्मे ॥ गृही प.५
१११ तमधुपर्कस्य यजमानाच्च ऋत्विजः ॥ पश्चादाशौचे पतिते ११२
न भवेदिति निश्चयः ॥ मधुपर्कात्पूर्वं तु भवेदाशौचमिति
रामांडारभाष्ये ॥ शुद्धिविवेकेप्येवमेव ॥ नांदीमुखावधि
श्चावत्स्य कल्पे अधिक इति तत्कः ॥ एकविंशत्य हर्यज्ञे विवा
हे दशवासराः ॥ त्रिषट् चौलोपनयने नांदीश्राद्धं विधीयते ॥
इति ॥ तेन एकविंशत्याद्यहरंतः पातातियदि यज्ञादि
भिर्भवति तथा आवश्यके पि शौचे पूर्वं श्राद्धं कुर्यादित्यर्थः ॥

प्रारंभाभावे पि कन्याया आधायस्त्वे सन्निहितलग्नांतराभावे च हे
मादिपूर्वकं विवाहरनुज्ञामाह ॥ अभावे रजसि शुध्यर्थं कृष्मांडैर्जुहु
याद्घृते ॥ गांदद्यात्संच गव्याशी ततः शुध्यति सूतकी ॥ उपकल्पितवि
हुसंभारस्यापि तत्सन्निहितलग्नांतराभावेनेसंभारधारणाशक्तौ
आशौचाभावमाह विज्ञः ॥ न देवप्रतिष्ठाविवाहयोः पूर्वं संभरण
योरिति ॥ अथ रजोदोषनिर्णयः ॥ वधूवरान्यतरयोर्जननी चेद्रज २
स्वला ॥ तस्याः शुद्धेः परं कार्यं मांगल्यं मनुरब्रवीत् ॥ माधवीये ॥ प्रारब्धे
भोक्तु विवाहस्य माता यदि रजस्वला ॥ निवृत्तिस्तस्य कर्तव्या सहत्वे
श्रुति चोदनात् ॥ प्रारंभास्त्राजित्तिनांदीश्राद्धात्प्राजित्तिर्ज्ञेयं ॥ नां
वि५ दीमुखविवाहोदास्कृत्ते ॥ नातस्येव प्रारंभोक्ते ॥ वृद्धमनुः ॥ वि
४ह वाहव्रतचूडासु माता यदि रजस्वला ॥ तदा न मंगलं कार्यं शुद्धौ कार्यं
शुभेप्सुभिः ॥ मेधातिथिः ॥ चौले च व्रतबंधे च विवाहे यज्ञकर्म
णि ॥ भार्या रजस्वला यस्य प्रायस्तस्य न शोभनं ॥ गर्गः ॥ यस्या
मातादिमांगल्ये माता यदि रजस्वला ॥ तदा न तत्र कर्तव्यमायुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षयकरं यतः॥ बृहस्पतिः॥ वैधव्यं च विवाहे स्यात् उडुलंघ्रतं
धने॥ चूडायां च शिरोरोगमृत्यु स्फोटिं च पात्रप्रवेशयोः॥ आयुष्मु
दयिकेश्चोहोत्तरं कपर्दिकारिकासु विशेषः॥ स्मृति कौ ददयवाः
शुध्यै गां दद्याद्धोमपूर्वकं॥ प्रासके कुम्भे शिशुः हि स्यादिति न स्यां
नष्टधति॥ अलाभे सुमुहूर्तस्य रजोदोषे तु संगते॥ श्रियं संपूज्य
११२ तत्कुर्यात् सा णिग्रहनमुक्तमें मंगलं॥ हेमी माषमितां पत्नीं श्रीसूक्ते ११२
विधिना चैर्चयेत्॥ प्रत्यर्चं पापसंहृत्या अभिषेकं समाचरेद्
दि॥ अथ विवाहभेदाः॥ मनुः॥ ब्राह्मो दैवस्तथा चार्षः प्राजाप
तिस्तथा पुनः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः॥ च
त्वारो ब्राह्मणस्याद्या राज्ञो गांधर्वराक्षसौ॥ राक्षसश्चासुरो
वैश्ये शूद्रे चांत्यगर्हितः॥ अंत्यः पैशाचः॥ गांधर्वादिषु विप
ति भावो यपश्चाद्धोमादिसत्कर्म्मतं कार्यं गांधर्वासुरपै

शाचाविवाहो राक्षसश्च यः॥ पूर्वं परीयहस्तेषु पश्चाद्धोमो विधीय
ते इति परिशिष्टात्॥ होमाच्च नो वेवराय देया स तिष्ठुनोति॥ बौधा
यन आह॥ बलाद्दपहृता कन्या मंत्रैर्यदि न संस्कृता॥ अन्यस्मै विधि
वद्देया यथा कन्या तथैव सेति॥ बलात्कलौ द्रूपलक्षणं॥ ॥ अथ
वाग्दानोत्तरं वरमरणे विशेषः॥ अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं व
रो यदि॥ न च मंत्रोपनीता स्यात् कुमारी पितुरेव सा॥ देशांतरगमने तु
कात्यायनः॥ वरयित्वा तु यः कश्चित् प्रवसेत् पुरुषो यदा॥ ऋत्यागमां
स्त्रीनती स कन्यान्यं वरयेत् पतिं॥ याज्ञवल्क्यः॥ दत्तामपि हरेत्पू
र्वाच्छ्रेयांश्चेद्वर आव्रजेत्॥ वशिष्ठः॥ कुलशीलविहीनस्य षंढा
दिपतितस्य च॥ अपस्मारविधर्मस्य रोगिणां वेषधारिणां॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च॥ ॥ अथ धर्मार्थं वि
वाहकरणे फलं॥ तत्र महाभारते॥ ज्ञात्वा सवित्तसामर्थ्यादेकं
यो वाहयेद्द्विजं॥ तेनाप्याप्नोति तत्स्थानं शिवभक्तेन यत् ध्रुवं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातृपितृविहीनं तु संस्कारोद्वहनादिभिः ॥ यस्तां पाययति तस्येह पुण्यसंख्या न विद्यते ॥ भविष्ये ॥ विवाहादिक्रियाकालेतत्क्रियासिद्धिकारणं ॥ पूः प्रयच्छति धर्मज्ञः सोश्वमेधफलं लभेत् ॥ अथ वाग्दानविधिः ॥ ज्योतिःशास्त्रोक्ते शुभे काले द्वौ च त्री रौष्टौ वा प्रशस्तवेषा वरपित्रादिना सहिताः शकुनदर्शनपूर्वकं कन्यागृहमेत्य कन्यापितुः प्रार्थना कार्या । मत्पुत्रार्थं कन्यां प्रयच्छेति ॥ अथ दाता भो
११३ यथानुमतिं कृत्वा दास्यामीति चो चैव ब्रूयात् ॥ ततः कन्यादाता प्राङ्मुख उपविश्य आचम्य देशकालौ स्मृत्वा करिष्यमाणविवाहाङ्गभूतं वाग्दानमहं करिष्ये तदङ्गं गणपतिपूजनं करिष्य इति संकल्प्य ११३
८५ गंधादिदक्षिणांतेर्गणपतिं पूजयित्वा स्वाच्छेनेवरपितरं प्राङ्मुखमुपवेश्य स्वयं च तस्मात्प्रत्यङ्मुख उपविश्य तं गंधाक्षतांबूलादिभिः पूजयित्वा हरिद्राखंडपञ्चकं पूगीफलानि च गंधाक्षतांबूलसहितानि गृहीत्वा अमुकगोत्रोत्पन्नां अमुकनाम्नीमिमां कन्यां

ज्योतिर्विदादिष्टे मुहूर्ते दास्येऽहमिति वाचा संप्रददे इति चोक्त्वा ॥ अव्यंगेपतितेक्लीबे दशदोषविवर्जिते ॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ ॥ इति पठेत् ॥ ततो मंत्रांतरं पठेत् ॥ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया ॥ कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव ॥ ततो वरपिता ब्रूयात् ॥ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया ॥ वरावलोकनविधौ निश्चितस्त्वं सुखी भव ॥ एवं परस्परं
स्वीकृत्य तरी प्रात्रर्थमित्रार्थं मित्या द्याद्दुःकार्यं ॥ ततो वरपिता गंधाक्षतशुभवस्त्रयुग्मभूषणतांबूलपुष्पादिभिः पथा
चीरं कन्यां पूजयेत् ॥ ततो ब्राह्मणाः आशीर्मंत्रान्पठेयुः ॥ ॥
इति वाग्दानं ॥ अथ मण्डपकरणं ज्योतिर्निबंधे ॥ कर्तव्यं मंगले
वेसं सं३ स्वादौ मंडला यांकुरार्पणं ॥ नवमे वा पि पंचमे दिवसे विवाहात्
तृतीये वा जनक्षत्रे शुभवारे शुभोदये ॥ सम्यग्भाण्डालंकृतस्तु सवितानध्वजतोरणैः ॥ सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशं सं८५

तत्र मस्त्रिकृता स्विश्रंबगृहीत्वा पुनरागतः॥ स्नानमये च पथवा वैणवे
षु पात्रेषु भोजयेत्॥ अनेकबीजसंयुक्तं तोयपुष्पोपशोभितं॥ शौ
नकः॥ अथाधानकर्मसंस्कारं जातकर्म च नाम च॥ क्रियान्यत्र विधा
तव्यं मंगलेषंकुरार्पणं॥ बृहस्पतिः॥ अर्यंतिके कार्येषु कार्यं सद्यों
कुरार्पणं॥ ततो वैवाहिकेषु शुभे मुहूर्ते वधूवरयोस्तैलहरिद्रालापूना
११४ दि यथाचारं कार्यं॥ अथ विवाहदिनात्पूर्वं दिनद्वये॥ तत्र पूर्वं ग ११४
णपतिपूजनं॥ ततः पूर्वोक्तलक्षणं मंडपं कृत्वा तत्प्रतिष्ठां कुर्यात्॥
ततः पूर्वाह्ने सपत्नीकः कृतनित्यं गोधूतमांगलिके वेषः॥ शुभासने
उपविश्याचम्य प्राणानायम्येष्टदेवतागुर्वादिभ्यो नमस्कारं कृत्वा
देशकालौ संकीर्त्य अस्या अमुकनाम्न्याः श्वः करिष्यमाण विवाहांगभू
तं स्वस्तिवाचनं मंडपप्रतिष्ठा मातृपूजनं वसोर्धारापूजनं आयुष्यप ज
नांदीश्राद्धं चाहं करिष्ये॥ इति संकल्पं कुर्यात्॥ ततो ब्राह्मणनृप
वैश्यस्य स्विवाचनं कुर्यात्॥ मंडपप्रतिष्ठायां चेवो दूर्वाशमीपल्लवं

कुलवृक्षपल्लवानाम्रादीन् विशालवृक्षपत्रवेष्टितान् सूत्रेण पंचभावे
ष्टयेत्॥ आग्नेयकोणस्थं मंडपस्तंभोपरि नंदिनी नामकं वेष्टितं मनो
जूतिरिति स्थापयित्वा तत्र नंदिनीं पूजयेत्॥ तद्वत्स्था॥ आपो हिष्ठेति
प्रोक्ष्य गंधद्वारामिति गंधाक्षतं॥ दधिक्राव्णो इति दधि॥ कांडात्कांडादि
ति दूर्वा पुष्पाणि समर्पयेत्॥ ततो नैर्ऋत्यवायव्येशानस्तंभेषु मंडप
मध्योपरिभागे काष्ठे च क्रमेण नलिनी चैवोमापभुवं हस्तिनीं नामवे
ष्टितानि पूर्ववत्स्थापयित्वा पूजयेत्॥ ततो मातृपूजनं वसोर्धाराप
जनं॥ आयुष्यं वर्चस्यमिति आयुष्यजपं कुर्यात्॥ एषामनुष्ठानप्र
कारः पूर्वोक्तो द्रष्टव्यः॥ ततो नांदीश्राद्धं॥ इदं चोद्वाहे पिता कुर्या
त् द्वितीयादौ वर एव॥ तथा स्मृतौ॥ नांदीश्राद्धं पिता कुर्यादाद्ये
पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥ मंडनः॥
पित्रोरस्तु जीवतोः कुर्यात्सुनः पाणिग्रहं यदा॥ पितुर्नांदीमुखं
श्राद्धं नोक्तं तस्य मनीषिभिरिति॥ पितुरभावे असंस्कृतास्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्कार्या भ्रातृभिः पूर्वसंस्कृत इति यत्तु क्रमस्तेन क्रमेण
ज्येष्ठभ्रात्रादिभिर्देयो दिति चंद्रिकादय आहुः॥ हेमाद्रिस्तु॥
तस्य पितुरभावेपः पितृव्यमातुलादिः संस्कुर्यात् संस्कार्या पितृव्यो
रप्यानुतस्य पितृभ्य इति व्याचख्यौ अत्र चैव क्रमं विस्तरभया
न्नोच्यते॥ रेणुककारिकायां॥ उक्तकाले विवाहांगं कुर्यान्नांदीमु
खं पिता॥ देशांतरे विवाहश्चेत्तत्र गत्वा भवेदिदं॥ अत्र पदार्थक्रमो
११५ स्मर्तव्यस्तैः श्राद्धप्रयोगे आलोचनीयः॥ एवं वरपिता स्वगृहे पि सर्वं ११५
कुर्यात्॥ इदं चैव धूपित्राद्युक्ता नांदीश्राद्धं कार्यं॥ तदुक्तं कारिका
यां॥ न मंडपादिकं कर्म कन्यस्य श्राद्धमंतरेति॥ आचारोप्येवं॥ ततो
वरगृहे गत्वा वरवरणं कार्यं॥ तत्र गणपतिं स्मृत्वा॥ देशकालौ संकी ७४
र्त्य करिष्यमाण विवाहांगवरणं करिष्ये॥ इति संकल्प्य॥ उपवीतादी
न्युपस्थाप्यनेदिति तानि दद्यात् शिवराय देव्यापादौ प्रक्षाल्य चंद
नादिभिः पूजां कुर्यात्॥ वरणे देयानि द्रव्याण्याचंद्रेश्वरः॥ उप

न३

वीतं फलं पुष्पं वासांसि विविधानि च॥ देवं वराय वरणे कन्याभ्रात्रा
द्विजेन चेति॥ इति पूर्वदिनकृत्यं॥ आगतो सर्वमेतद्विवाहदिन एव
कुर्यात्॥ अथ विवाहदिनकृत्यं॥ तत्र पूर्वं घटिस्थापनं कार्यं॥ नारदः॥
षडंगुलमुखो सेधं द्वादशांगुलमायतं॥ कुर्यात्कपालवत्ताम्रपात्रं
तद्विद्धिः पलैः॥ ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाथवाथवा॥ शुभे मंड
ले धार्यदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्॥ तत्र मंत्रः॥ मुख्यं त्वमसि यं
त्राणां ब्रह्मणा निर्मितं पुरा॥ भावाभावाय दंपत्योः कालसंधिनकारण
णमिति॥ ततो वरः कृतनित्यक्रियः इष्टदेवतां पित्रादींश्च नमस्कृत्य तै
रनुमोदितो यथाविभवमश्वादिमारूढ एव वधूगृहं गत्वा द्वारदेशे प्राङ्मुख
स्तिष्ठेत्॥ ततः कन्यापिता मधुपर्केण समर्चयेत्॥ अथ मधुपर्कः॥
तत्र वरस्य वैकल्पिकावधारणं॥ यन्मधुन इति मधुपर्काशनं॥ शेष
स्य प्रागसंचरे निनयनं॥ एतौ विकल्पौ स्मरेत्॥ ततः साधु भवानास्ता
मिति अर्घपिता अर्च्यप्रतिवदति॥ अर्चयेत्यर्च्यस्य प्रतिवचनमिति
वासुदेवभट्टादयः॥ विष्टरादीनामाहरणं॥ अर्घ्यपितुर्विष्टरादानं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्घयितुर्व्यतिरिक्त अन्यं अर्घ्यं संबोधयति॥ विष्टरो विष्टरो विष्ट-
रः प्रतिगृह्यतामिति सनेन॥ ततोऽर्घ्योऽर्घयितुः सकाशाद्विष्टरमादायासने
निधाय बध्नोऽस्मिन्समानानामिति स्कूपविशेति॥ ततः पाद्योदकदानमर्घयि-
तुः॥ ततोऽर्घ्यमन्यं संबोधयति॥ पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामिति॥ ततो-
र्घ्यो यितुः सकाशात्पाद्यं प्रतिगृह्य दक्षिणं पादं प्रक्षालयति॥ विराजो दो-
होसीति॥ ततोनेनैव मंत्रेण वामपादप्रक्षालनं॥ राजन्यवैश्ययोस्तु पूर्वं वा-
११६ मपादप्रक्षालनं॥ अर्घयितुर्विष्टरदानं॥ अन्यः प्राह विष्टरो विष्टरो विष्टरः ११६
प्रतिगृह्यतामिति॥ ततोऽर्घ्यो द्वितीयं विष्टरं प्रतिगृह्य भूमौ निधाय वध्नो-
स्मीत्यनेन तत्र तस्योपरि पादौ निदधाति॥ अर्घयितुरर्घदानं॥ अन्यः प्राह॥
अर्घोऽर्घोऽर्घः प्रतिगृह्यतामिति॥ ततोऽर्घ्य आपस्थ युष्माभिरिति स-
र्वैः प्रतिगृह्णाति॥ अर्घ्यस्तमर्घं निनयन्न शिंमंत्र्यपते समुद्रं व इति॥ ततो-
र्घयितुराचमनीयदानं॥ पुनरन्यः प्राह॥ आचमनीयमाचमनी-
यमाचमनीयं प्रतिगृह्यतामिति॥ ततोऽर्घ्ययितुराचमनीयं प्रति-
गृह्य आमागन्यशसेति सकृदाचामति॥ ततः स्मार्ताचमनं॥

अर्घयितुर्मधुपर्कदानं॥ अन्य आह॥ मधुपर्को मधुपर्को मधु-
पर्कः प्रतिगृह्यतामिति॥ ततोऽर्घ्योऽर्घयितृहस्तस्थितं मधुपर्कं मि-
त्वे त्रस्यत्वेनेनेक्षते॥ ततो मधुपर्कं देवस्य त्वा॰ हस्ताभ्यां प्रतिगृह्णा-
ति प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया लोडयति नमः श्या-
वास्यायेति॥ ततो मधुपर्कैकदेशस्यानामिकांगुष्ठेन बहिः प्रक्षेपः॥ पुनर्न-
मः श्यावास्यायेत्यालोडनं॥ मधुपर्कैकदेशस्य बहिः प्रक्षेपः॥ पुनरस्ते-
नैव मंत्रेणालोडनं तृतीयवारं॥ पुनरपि मधुपर्कैकदेशस्य बहिः प्र-
क्षेपः॥ एवं च त्रिरालोडनं त्रिर्निरूक्षणमनामिकांगुष्ठेन भवति॥
ततोऽर्घ्यो मधुपर्कैकदेशं यन्मधुनो मधव्यमिति प्राश्नाति॥ पुनः अ-
नेनैव मंत्रेण वारद्वयं उच्छिष्टमेव प्राश्नाति॥ उच्छिष्टदोषाभावो मनू-
क्तो द्रष्टव्यः॥ मधुमति निर्वाप्य स्वचं प्राशनं॥ ततोऽर्घ्यो मधुपर्क-
शेषं पुत्राय शिष्याय वा उत्तरतः उपविष्टाय ददाति॥ अथवास्त्व-
पमेव सर्वं प्राश्नाति॥ प्राग संचरे वा निनयनं॥ ततोऽर्घ्यः आचम्य प्रा-
णान्संमृशेत्॥ तत्रैवं॥ वाङ्म आस्येऽस्त्विति मुखमालभते॥ नसोर्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणो अस्त्विति नासिकाछिद्रद्वयं युगपत् ॥ अक्ष्णोर्मे चक्षुः अस्त्विति
अक्षिद्वयं युगपत् ॥ कर्णयोर्मे श्रोत्रं मे अस्त्विति दक्षिणं कर्णमभिमृश्य
ततो वाममनेनैव मन्त्रेण ॥ बाह्वोर्मे बलं मे अस्त्विति दक्षिणबाहुं ॥ ततो वाम
मनेनैव मन्त्रेण ॥ ऊर्वोर्मे ओजः अस्त्विति ऊरुद्वयं युगपदेव ॥ अरिष्टानि
मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरः प्रभृति सर्वाण्यङ्गानि युगपत् ॥ त
तो गामानीयाभ्यर्चितायास्तस्याः समादाय गोर्गौ आलभ्यतामिति संप्रैषे प्रतिवद
११८ ति ॥ ततोऽर्घ्यः प्रसीद माता रुद्राणामित्यादि वधिष्टे संतमुक्त्वा मम चामुष्य ११८
चपाप्मान [illegible] हनोमिति ब्रूयात् ॥ यद्य [illegible] मम चामुष्य च पाप्मा हतः
ओं मुत्सृजत तृणान्यत्त्विति ब्रूयात् ॥ विवाहयज्ञयोः स्वकृत विषयमेनालं
भः ॥ स च कालो न भवति ॥ सूर्यं तेन शातु ॥ आलंभाभावे तु गोरुत्सर्जनादि
दि कर्म पिन भवति ॥ सर्वत्रालंभाभावेषु सर्गस्य वेति [illegible] कारिकायां ॥ गोरा
लंभनिषेधात्सर्वत्रोत्सर्जनं कलौ विनिमधुपर्कः ॥ ततो गन्धमाल्य
वस्त्रयज्ञोपवीतयुगाभरणादिभिर्वरं यथाविभवं पूजयेत् ॥ अथ क
न्या स्नाता परिहिताहलवस्त्रा गृहान्तः शोभाग्यादि का सना गौरीं

त्रि २

पूजयित्वा तत्रैव गौरीं ध्यात्वा तिष्ठेत् ॥ ततो वरः कुशकण्डिकायां पञ्चभूसं
स्कारान् कृत्वा लौकिकाग्नेः स्थापनं करोति ॥ निर्मथ्याग्नेर्वा स्थापनं ॥ ततो
वैकल्पिकाववधारणं वरस्य ॥ अग्नेः श्वा तेजन्याः निधानं ॥ अग्नेरुत्तरतः
कुशकण्डिका ॥ उत्तरतः पात्रासादनं ॥ द्वे पवित्रे [illegible] मयी आज्यस्थाली ॥ पात्रो
[illegible] समिधः प्रोक्षणी आघारौ समिद्धतमे आज्यभागौ वरो दक्षिणा राष्ट्रभृद्
होमः ॥ जयाहोमः ॥ अभ्यातानहोमः ॥ सुगं नु पन्थामिति स्रौह संतत परम
स्योद्दिष्टे कां आहुती ॥ वध्वा अनडुहश्चर्मोपरि स्थान प्राच्या त्रिरात्रं समिधः
[illegible] ॥ इति वैकल्पिकानामेव धारणं ॥ ततो मातुलादि कन्या
नयनं करोति ॥ सा चागत्य प्रत्यङ्मुखी उपविशति ॥ अत्र वधूवरयोरं
मध्ये वस्त्रेणान्तर्धानं ॥ ततो वरो वधूं जरां गच्छेति मन्त्रेण वासः परि
धापयति ॥ वरस्य चोत्तरीयं या अकृन्तन्निति अनेन परिधापयति ॥ ततः क
न्या पितुरध्येषणं ॥ समञ्जन्त्विति मन्त्रेण ॥ अत्र वधूवरयोर्गोत्रप्रवर
पितामह पूर्वकं प्रपितामहपितृणां त्रिनामग्रहणं कार्यमिति वासुदेवः [illegible]
सौ ॥ सद्दद्दिति गाङ्गाधरैः ॥ अथ कन्यादानतन्त्रं प्रक्रमः ॥ दाता वरद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिणतः स्वदक्षिणदेशस्थपत्नीसहितउदङ्मुखउपविश्य ब्राह्मणशि
रः द्विराचम्य कुशपाणिः प्राणानायम्य देशकालावनुकीर्त्य मम
समस्तपितॄणां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पो
क्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंततेर्द्वा
दशावरानूर्ध्वान्दशापरान्पुरुषान्पवित्रीकर्तुमात्मनश्च लक्ष्मीना ११८
रायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये ॥ इति कु ११८
शाक्षतयुतजलेन संकल्प्य सपत्नीकः ॥ कन्यां कनकसंपन्नां कनकाभ
रणैर्युतां ॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वंभ
रः सर्वभूताः साक्षिण्यः सर्वदेवताः ॥ इमां कन्यां प्रदास्यामि पितॄ
णां तारणाय च ॥ इति मंत्रौ पठित्वा स्वदक्षिणस्थभार्यादत्तपूर्वकल्पि
तजलधारां कन्यादक्षिणहस्ते गृहीत्वा वरदक्षिणकरे क्षिपेत् ॥ अ
मुकगोत्रो अमुकोऽहं मम समस्तपित्रादिप्रीतये इयं तं पूर्ववदुच्चार्य
अमुकामुकप्रवरोपेतामुकगोत्रायामुकप्रपौत्रायामुकपौ
त्रायामुकपुत्रायामुकश्रीधररूपिणे वरायामुकप्रवरोपेतामुकप्रपौ

त्रीममुकपौत्रीममुकपुत्रीममुकनाम्नीं कन्यां श्रीरूपिणीं प्रजापतिदैवत्यां
प्रजोत्पादनार्थं तुभ्यं संप्रददे ॥ इति वरहस्ते सकुशाक्षतजलं क्षिपेत् ॥ प्रजा
पतिः प्रीयतामिति मनसा स्मरेत् ॥ न ममेति वाच्यतामिति प्रयोगरत्ने ॥ ने
त्यपरे ॥ वरः ॐ स्वस्तीत्युक्त्वा प्रतिग्रहं करोति ॥ ततो दाता ॥ गौरीं कन्या
मिमां विप्र यथाशक्ति विभूषितां ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्र
य ॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः ॥ कन्ये मे पृष्ठतो भूया
स्त्वद्दानान्मोक्षमाप्नुयात् ॥ मम वंशकुले जाता पालिता वत्सराष्टकं ॥ तु
भ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी ॥ न्यूनं वयस्कायां ॥ पालिता वर्षस
तकमिसाघाहुः कीर्यः ॥ धर्मे चार्थे च कामे च नातिचरितव्या त्व
५४ येयं ॥ नातिचरामीति वरः ॥ दाता देशकालौ संकीर्त्य कृतस्यास्य कन्यादा
नस्य प्रतिष्ठासिद्ध्यर्थं इमां दक्षिणां तुभ्यमहं संप्रददे ॥ इति सजलं य
थाशक्ति सुवर्णदानं दक्षिणात्वेन वरहस्ते दत्वा न ममेति वदेत् ॥ ॐ
स्वस्तीति वरः ॥ ततो दाता जलभाजनं भोजनभाजनं गोमहिष्यश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गजदासीदासभूवाहनालंकारादि यथाविभवं संकल्पपूर्वकं वराय
दद्यात्॥ अत्र कौदादिनिकामस्त्विति पाठ इति हरिहरगंगाधरौ॥ त
तो वरो वधूं गृहीत्वा गृहान्निष्क्रामतीति यदैषि मनसेति॥ असौ स्थाने
वधूनाम देशः॥ निष्क्रमणप्रभृति कश्चन पुरुषो दक्षिणस्कंधे वारिपू
र्णकुंभं गृहीत्वाऽग्नेरुत्तरतो दक्षिणतो वा वाग्यतस्तिष्ठेत्॥ ततः पर
स्परं समीक्षेथामित्याह॥ अन्योन्यसमीक्षणं॥ अघोरचक्षुरिति च
११९ कर्तृके समीक्षणे मंत्रपाठः॥ दंपत्योरग्नेः प्रदक्षिणीकरणं॥ अत्र ११९
वासःपरिधानादिकर्म॥ ततः पश्चादग्नेस्तेजनीकटं वा दक्षिणपादेन प्र
वृत्योपविशति वरः॥ वरदक्षिणतो वध्वा उपवेशनं॥ ततो ब्रह्मोपवेश
नादि चरुवर्ज्जमाज्यभागांते विशेषः॥ पवित्रच्छेदनकुशादिवरांतानां
मासादनं॥ उपकल्पनीयानि॥ शूर्पे शमीपलाशमिश्रा लाजाः॥ दृष
त्॥ लोहमानडुहं चर्म॥ कुमार्या भ्राता॥ आचार्याय वरद्रव्यं॥
ओं स्य भागांते आज्येनैव भूः स्वाहा॥ भुवः स्वाहा॥ त्वं च नो० स त्वं नो०॥
अयाश्चाग्ने० ये ते शतं० उदुत्तमं० एतत्सर्वं प्रायश्चित्तं हुत्वा राष्ट्रभृ

स्वः स्वाहा २

होमः॥ तत्र मंत्रा नान्वारंभः॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्ष
त्रं पातु तस्मै स्वाहा वाट्॥ ओं इदमृताषाहे ऋतधाम्नेऽग्नये गंधर्वाय
मम॥ १॥ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसो मुदो ना
मताभ्यः स्वाहा॥ ओं इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम॥ २॥
ओं संहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै
स्वाहा वाट्॥ इदं संहिताय विश्वसाम्ने सूर्याय गंधर्वाय०॥ ३॥ सं
हितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो ना
मताभ्यः स्वाहा॥ ओं इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम॥ ४॥
सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
वाट्॥ ओं इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय न मम॥ ५॥
सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुर
यो नामताभ्यः स्वाहा॥ इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो न मम॥ ६॥
इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ मु इदमिषिराय विश्वव्यचसे वाताय गंधर्वायेन मम ॥७॥ इषिरो
विश्वव्यचा वातो गंधर्वस्तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा ॥ ॐ
इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न मम ॥८॥ ॐ भुज्युः सुपर्णो यज्ञो गंधर्वः
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ ॐ मु इदं भुज्यवे सुपर्णा
य यज्ञाय गंधर्वाय न मम ॥९॥ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य
१२० दक्षिणाऽप्सरसस्तावा नाम ताभ्यः स्वाहा ॥ ॐ मु इदं दक्षिणा १२०
भ्योऽप्सरोभ्यस्तावाभ्यो न मम ॥१०॥ प्रजापतिर्विश्वकर्मा मनो गं
धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ ॐ मु इदं प्रजापत
ये विश्वकर्मणे मनसे गंधर्वाय न मम ॥११॥ ॐ मु प्रजा॰ विश्वकर्म्मा
मनो गंधर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा ॥
ॐ इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यो न मम ॥१२॥ ॥ इति रा
ष्ट्रभृद्धोमः ॥ ॥ अथ जया होमः ॥ ॐ चित्तं च स्वाहा ॥ ॐ इ
दं चित्ताय ॥ न ममेति सर्वत्र वाच्यं ॥ ॐ मु चित्तिश्च स्वाहा ॥ इदं चित्त्यै ॥

आकूतं च स्वाहा ॥ ॐ इदमाकूताय ॥ ॐ आकूतिश्च स्वाहा ॥
इदमाकूत्यै ॥ ॐ विज्ञातं च स्वाहा ॥ ॐ इदं विज्ञाताय ॥ ॐ विज्ञातिश्च
स्वाहा ॥ ॐ मु इदं विज्ञात्यै ॥ मनश्च स्वाहा ॥ इदं मनसे । शाक्वरीश्च स्वा
हा । इदं शाक्वरीभ्यः । दर्शश्च स्वाहा । इदं दर्शाय । पौर्णमासं च स्वाहा ।
इदं पौर्णमासाय । बृहच्च स्वाहा । इदं बृहते । ॐ रथंतरं च स्वाहा ।
इदं रथंतराय । प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतना
जयेषु तस्मै विशः समनमंत सर्वाः स उग्रः स इ हव्यो बभूव स्वा
हा ॥ इदं प्रजापतये न मम ॥ ॥ इति जया होमः ॥ ॥ अथा
भ्यातान होमः ॥ अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्य
स्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहू
त्या॰ स्वाहा ॥ इदमग्नये भूतानामधिपतये न मम ॥ इंद्रो ज्येष्ठा
नामधिपतिः स मावतु॰ त्या॰ स्वाहा ॥ इदमिंद्राय ज्येष्ठानाम
धिपतये ॥ वक्ष्यमाणेषु मंत्रेषु समावत्वित्यादि मंत्रशेषस्यानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खंगः॥यमः पृथिव्या अधिपतिः॰ देवताः सा॰स्वाहा॥इमदंयमायपृ
थिव्या अधिपतये॥अत्रोदकालं भद्रनिवासुदेवः॥वायुरंतरिक्षस्या
प॰३ धि॰इदंवायवेंतरिक्षस्याधिपतये॥सूर्यो दिवोधिपतिः स॰इदं सूर्याय
दिवोधिपतये॥चंद्रमा नक्षत्राणामधिपतिः स॰इदंचंद्रमसेनक्ष
त्राणामधिपधिपतये॥बृहस्पतिर्ब्रह्मणो धिपतिः स॰इदं बृह
१२१ स्पतयेब्रह्मणो धिपतये॥मित्रः सत्यानामधिपतिः स॰इदं मित्रा १२१
यसत्यानामधिपतयेनमम॥वरुणोपामधिपतिः स॰इदं वरुणाया
पामधिपतयेनमम॥समुद्रस्रोत्यानामधिपतिः स॰इदं समुद्रा
यस्रोत्यानामधिपतये॥अन्नं साम्राज्यानामधिपतिर्तन्मा
वत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे॰इदमन्नायसाम्राज्यानामधिपतये॥
ना सोम ओषधीनामधिपतिः स मा॰इदं सोमाय ओषधीनामधिपतये॥
सविताप्रसवानामधिपतिः स॰इदं सवित्रे प्रसवानामधिपतये॥
रुद्रः पशूनामधिपतिः स॰इदं रुद्राय पशूनामधिपतये॥उद

कोपस्पर्शनं॥त्वष्टारूपाणामधिपतिः स॰इदं त्वष्ट्रे रूपाणामधिप
तये॥विष्णुः पर्वतानामधिपतिः स॰इदं विष्णवे पर्वतानामधिपतये॥
मरुतो गणानामधिपतयस्ते मावंत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे॰इदं मरु
द्भ्यो गणानामधिपतिभ्यः॥पितरः पितामहाः परेवरे ततास्ततामहाः॥
इह मावंत्वस्मिन्ब्रह्मन्निसाद्धि॰इदं पितृभ्यः पितामहेभ्यः परेभ्यो व
रेभ्यस्ततेभ्यस्ततामहेभ्यः॥उदकोपस्पर्शः॥ ॥इत्यभ्यातानहो
मः॥अग्निरैतु प्रथमो देवतानां सो॰रोदां स्वाहा॥इदमग्नये॰इमा द
मग्निस्त्रायतां गा॰इदमग्नये॥स्वस्ति नो अग्ने॰दिवः॰स्वाहा॥इदम
ग्नये॥सुगंन्नुपथां॰हरणोतु स्वाहा॥इदं वैवस्वताय॥परं मृत्यो अनु॰
वीमान्स्वाहा॥इदं मृत्यवे॥उदकोपस्पर्शः॥संस्रवप्राशनांते वा अ
यं होमः॥ततः कुमार्या भ्राता शमीपलाशमिश्रांल्लाजानंजलीनांज
लावावपति तान्कुमारी त्रिः हरत्यो जुहोति॥अर्यमणं नि प्रथमां॥
इदमर्यम्णे न मम इति वरस्य त्यागः॥इयं नार्युपब्रूते इति द्वितीयां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदमग्नये। इमांल्लाजानावपामीति तृतीयां॥ इदमग्नये कन्यैव मंत्र
यं पठति॥ ततो वरो गृभ्णामि ते सौभगत्वाये साधार भ्यश्चरदः श
तमिसंतेन मंत्रेण कन्यायाः अंगुष्ठसहितं हस्तं दक्षिणं हस्तं गृह्णा
मीति॥ अथैनामश्मानमारोहयति दक्षिणपादेनोत्तरतस्थापितं आ
रोहेममश्मानमिति मंत्रेण वरस्य मंत्रपाठः॥ ततः सरस्वती प्रेदमवेति
१२२ मां गाथां पठति॥ अथ वधूवरो अग्नेः प्रदक्षिणं परिक्रामतः॥ तुभ्य १२२
मग्ने पर्यवहन्निति वरपठितमंत्रेण॥ ततो लाजावपनादि परिक्रमणांतं
परिक्रमणांस्तृश्यमयाद्वयं कुर्यात्॥ ततस्तृतीयपरिक्रमणांते शूर्पको
णेन सर्वांल्लाजानामंजलौ प्रक्षेपः॥ ततः कुमारी तान् जुहोति भगाय
स्वाहेति॥ इदं भगाय न ममेति वरः॥ अत्राचारात्तूष्णीं चतुर्थं परि
क्रमणं कुरुत इति रेणुदीक्षितादयः॥ ततो वर आज्येन प्रजापतये स्वा
हेति॥ इदं प्रजापतये॥ अथैनामुदीचीं सप्तपदानि प्रक्रामयसे
ति ब्रूयात्॥ एकमिषे विष्णुस्त्वान्वयत्विति मंत्रं पठित्वा प्रथमं॥ द्वे

ऊर्जे विष्णुस्त्वान्वयत्विति द्वितीयं॥ त्रीणि रायस्पोषाय वि० तृतीयं॥
चत्वारि मायोभवाय वि० चतुर्थं॥ पंच पशुभ्यो वि० पंचमं॥ षड्ऋतुभ्यो
वि० षष्ठं॥ सखे सप्तपदा भव सा मामनुव्रता भवेति सप्तमं॥ ततो वरः पूर्व
धृतादुदकुंभादुदकमादायापः शिवा इति मंत्रेण वध्वा मूर्द्धन्यभिषिंचति॥
ततो वरः तच्चक्षुरुदीक्षस्वेति वधू प्रेक्ष्यति॥ सा च तच्चक्षुरित्यादि शृणुया
म शरदः शतमित्यंतेन मंत्रेण सूर्यमुदीक्षते॥ ततो वरो वध्वा दक्षिणस्कं
धोपरि हस्तं नीत्वा मम व्रते इति मंत्रेण तस्या हृदयमालभते॥ ततो वरो
वधूमभिमंत्रयते सुमंगलीरिति॥ अत्राचारात् स्त्रियः सिंदूरदानादि
कं कुर्वंति॥ ततो वरः स्त्रीमुद्धृत्य प्राच्यामुदीच्यां वा परिष्टते रोहिता
नडुहे उपवेशयति गावइति॥ ततो वर आगत्य पश्चादग्नेरुपविश्याग्नये
स्विष्टकृते स्वाहेति जुहोति॥ इदमग्नये स्विष्टकृते॥ संस्रवप्राशनं॥
मार्जनं॥ पवित्रप्रतिपत्तिः॥ प्रणीताविमोकः॥ ब्रह्मणे दक्षिणादानं॥
८१३ ततः स्वकीयामाचार्यो यतोदेति॥ ब्राह्मणश्चेत्॥ ततो वरोऽस्तमिते ध्रु
वं दर्शयति ध्रुवमसीति मंत्रेण॥ सा चेत्तूष्णीं ध्रुवं पश्यति॥ सा यदि न
ध्रुवं पश्येत्तथापि पश्यामीत्येव ब्रूयात्॥ ततो दंपत्योरक्षारादि नियमाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति विवाहोपदार्थक्रमः॥ ॥अथ देवकोत्थापनं॥ मंडपोद्वासनाविधिः॥
तत्रकालः॥ समे च दिवसे कुर्याद्देवकोत्थापनं बुधः॥ षष्ठं च विषमं नेष्टं मु
क्त्वा पंचमसप्तमौ॥ समेषु षष्ठं विषमेषु पंचमसप्तमाति विक्तं दिनं ना
त्रेष्टमित्यर्थः॥ कैसंत्तपूर्वकं सर्वदेवताः प्रत्येकं पूजयित्वा उत्तिष्ठ ब्रह्म
णस्पते इति विसर्जयेत्॥ मंडपोद्वासनं यथाकुलाचारं कुर्यात्॥ ॥
अथ वध्वाः प्रथमगृहप्रवेशः॥ वधूप्रवेशः प्रथमे तृतीये शुभप्रदः
य पंचमे थवा [illegible]॥ द्वितीये वाथ चतुर्थके वा षष्ठे वियोगमर्थदुःखदः स्या १२३
१२३ त्॥ तत्काले॥ स्वभवने पुरप्रवेशे देशानां विप्लवे तथोद्वाहे॥ नववधूगृह
गमने प्रतिशुक्रविचारणा नास्ति॥ नित्ययाने गृहे जीर्णे प्राशनांते
गं५ शुभसप्तसु॥ वधूप्रवेशमांगल्ये न मोक्षं गुरुशुक्रयोः॥ ज्योतिःप्रका
शे॥ वामे शुक्रे नवोढायाः सुखदा निश्चयदक्षिणे॥ धनं धान्यं च पृष्ठ
स्थे सर्वनाशः पुरस्थिते॥ नवोढायास्तु वैधव्यं यदुक्तं संमुखे भृगौ॥
तदेव विबुधैर्ज्ञेयं केवलं तद्विरामभे॥ पूर्वतोभ्युदिते शुक्रे प्रयायाद्
दक्षिणापरे॥ पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशौ॥ तथा भाद्र

पदमारभ्य पूर्वा दिशमुख्या दिक्षु प्रति दिशं मासत्रयं कपाटं ज्ञेयं॥ चैत्रमार
भ्य पूर्वाद्यष्ट दिक्षु मुख्य दिक्षु मासद्वयं विदिक्ष्वेकं मासं क्रमेण कुर्वं
ज्ञानीयात्॥ इदं कपाटं ग्रामांतरे नववधूगमने वेद्यं॥ नियतकालेपि के
[illegible] चिन्निषेधमाहुर्गर्गः॥ व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि॥ श्रा
द्धं विना शुभं नैव प्रोष्ठकालेपि मानवः॥ तथा॥ अमासंक्रांति विष्ट्यादि
प्राप्तेकालेपि नाचरेत्॥ इति॥ विवाहात्प्रथमे पौषे आषाढे चाधिमा
सके॥ भर्तृर्गृहे वसेत्स्त्री चैत्रे तातगृहे तथा॥ ॥इति वधूगृह
गमनविधिः॥ अथ गर्गमते पदार्थक्रमे विशेषः॥ अग्निस्थापनादिब्रा
ह्मणतर्पणांतं विवाहकर्म॥ प्रथमं आचार्यकर्तृकमग्निस्थापनं॥
ततो मधुपर्कादि॥ अर्चयेत्तिवरः॥ विष्टरो विष्टरो विष्टर विसन्यः॥
प्रतिगृह्यतामिति दाता॥ प्रतिगृह्णामी वरः॥ एवमग्रे सर्वत्र पाद्यादौ
ज्ञेयं कस्मिन्विष्टरे आसनं॥ तदैवं तेनैव मंत्रेण पादयोरधस्तान्निधा
नं द्वितीयविष्टरस्य॥ प्राणान्संमर्षने नास्ति स्वधा हारः सर्वत्र॥
गोरालंभाने लाउशांतिवाचनं पुण्याहस्थाने॥ ततो मधुपर्कोर्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसमापनं॥ ततः सदक्षिणं कन्यादानं॥ ततः कौतुकागारं प्रविशति॥
युवतीनां मंगलाचारयुक्तानां अप्रतिकूलाभावेन प्रविशति॥ अन्यत्रा
भ्यक्षपत्रेके॥ ततः आचार्यो वासः परिधापयति॥ जरां गच्छेति॥ उ
त्तरीयं च॥ समंजनं॥ अघोषणमाचीर्यस्य॥ कंकणबंधनं परस्परं॥
दक्षिणहस्तेन पाणिं गृहीत्वा निष्क्रामति यदैषीति॥ कन्याया नामग्रतो
आचार्यः॥ परस्परं समीक्षणं॥ उदकुंभस्कंधे स्त्वा॥ तस्थिवयं॥ ततः
१२४ प्रदक्षिणमग्निं परीत्य पश्चादग्नेस्तेजन्याकटे दक्षिणपादं दत्वोपवे १२४
शनं॥ ब्रह्मोपवेशनादि सर्वप्रायश्चित्तांते विशेषः॥ आसादने चरो
रभावः॥ शूर्पे शमीपलाशमिश्राः लाजाः दृषदुपलेत्यच॥ अनडुह
श्चानावरम्भ्य॥ पर्युक्षणांते आघारादि सर्वप्रायश्चित्तांते॥ राष्ट्रभृ
दादीनामिष्टंजयाहोमः॥ राष्ट्रभृद्धोमे॥ ऋतषाट०॥ सनइदं०॥
इति प्रथमा॥ तस्यौषधयोऽइति द्वितीयः॥ एवमग्रेपि॥ ततो जया
होमः॥ तत्र चित्तायेस्वाहेति चतुर्थ्यंतेन प्रयोग इति श्री अनंतो
दीक्षायणयज्ञेस्वाहाकारः सर्वत्र साकांक्षत्वादिति सूत्रेणेति गर्गः॥

ततो भ्यातान होमः॥ ततो ग्निरैतु विसाहुति चतुष्टयं॥ परं मृत्स्यविति
चात्र॥ ततः कुमार्यो हस्तयोरुपस्तरणं भ्रातुः॥ माता कुमारीहस्तलेपन
ददाति॥ तां लाजानामावपनमंजलौ॥ प्रसभिधारणं॥ सव्यसंहतेन द
क्षिणेन होमः॥ इदमर्यम्णो इति प्रथमस्य त्यागः॥ द्वितीयतृतीययो
रग्नये॥ अर्यमणमिति त्रयाणां पाणौ वरस्य पाणिग्रहणं अश्मान
मारोहस्वेति प्रैषपूर्वकमारोहणं॥ परिक्रमणं॥ एवं वारद्वयं लाजा
दिपरिक्रमणांतं॥ भगाय स्वाहेसनेन विम्याहं वारत्रयहोमः॥ तूष्णीं
परिक्रमणं॥ प्रजापतये होमः॥ सप्तपदी॥ अभिषेकः॥ ततो निस्क्रि दा८
श्च्य प्रैषपूर्वकं सूर्यावेक्षणं॥ हृदयालंभः॥ शाकटेश्चर्ममास्तरणे वरः
कन्यामुपवेशयति॥ स्विष्टकृद्धोमः॥ संस्रवभक्षः॥ परं मृत्स्यावसत्र
वाहोमः॥ मार्जनं॥ पवित्रप्रतिपत्तिः॥ ब्रह्मणे दक्षिणादानं॥ आचा
र्यायगोदानं॥ अस्तमिते ध्रुवदर्शनं प्रैषपूर्वकं ध्रुवमसीति वध्वाः
पाठः॥ बर्हिर्होमः प्रणीताविमोकः॥ क्रमपिवर्गे समिदाधानं॥ उत्स
र्जनं ब्रह्मणः॥ उपयमनकुशानामग्नौ प्रक्षेपः॥ ब्राह्मणभोजनं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते न

इति गर्भ विशेषः ॥ अथ पुनर्विवाहः ॥ इते विवाहे पंचांगशुद्धिरादि
त्यादिदोषश्चेज्जातः ॥ तदा ज्योतिःशास्त्रोक्तकालविशेषे पुनर्विवाहः
कार्यः ॥ तदाह सिंहश्रीधरीये ॥ पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृ
द्धिदं ॥ लग्नेंदुलग्नयोर्दोषे ग्रहताराद्दिसंभवे ॥ अन्येषु शुभकालेषु
दुष्टयोगादिसंभवे ॥ विवाहे चापि दंपत्योराशौ चादिसमुद्भवे ॥ तस्य दो
षस्य नाशार्थं पुनर्वैवाह्यमीप्सते ॥ अयनं चोत्तरं श्रेष्ठं वह्निमे नु विशेष
 तः ॥ आषाढमार्गशीर्षौ द्वौ वर्ज्यौ शेषाः शुभावहाः ॥ विवाहोक्त
तिथ्यंतराशिवारादिवर्गजाः ॥ करणायोगसंज्ञा विग्रहगोचरयोग
काः ॥ तस्मिन्विवाहसमये शुभदाश्च तथैव हि ॥ पूर्वोक्तेषु दिने राज्ञे चवि
वाहः शुभदो भवेत् ॥ अथ द्वितीयादिविवाहविधिः ॥ तत्राधिवेदनीया
आह ॥ याज्ञवल्क्यः ॥ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा ॥
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ अधिविन्ना तु भर्त
व्या महदेनोऽन्यथा भवेत् ॥ अधिवेत्तव्या तदुपरि स्त्र्यंतरं कर्तव्यमि
त्यर्थः ॥ आपस्तंबः ॥ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति ॥ अधि

वेदने प्रतीक्षाकालं मनुराह ॥ वंध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्र
जा ॥ एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥ इत्यर्थं तु विवाहांते
र विशेषः ॥ एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति ॥ समर्थस्तोष
यित्वार्थैः पूर्वोढामपरां वहेत् ॥ याज्ञवल्क्यस्तु ॥ आज्ञासंपादिनीं द
क्षां वीरसूं प्रियवादिनीं ॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रि
यः ॥ सधनो धनस्तृतीयांशमधनो ग्रासाच्छादनात्मकं भरणं दाप्य इ
त्यर्थः ॥ या त्वेतापरितुष्टा गृहान्निर्गच्छेत्तां प्रसाह मनुः ॥ अधि
विन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ॥ सा सद्यः संनिरोद्धव्या
त्याज्या वा कुलसंनिधाविति ॥ बहुभार्यो ज्येष्ठयैव सह धर्मं
सपत्नीकसाध्यं कुर्यादिति ॥ हेमाद्रौ कात्यायनः ॥ अग्निशि
ष्टादिसुश्रूषां बहुभार्यः सवर्णया ॥ कारयेत्तद्बहुत्वे चेज्ज्येष्ठ
या गर्हिता न चेत् ॥ इति ॥ शेषशुश्रूषा आतिथ्यादिपूजा ॥ सा
च पत्नीसंपाद्यधर्ममात्रोपलक्षणार्थं ॥ गर्हिताधर्म्ययोग्यत्वापा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दकृपा तिष्टसा दित्तोषवतीन चेदिसर्थः॥ नाहवीचे नतया किंचेने
न विथमाकु निष्यापिकारयेत्॥ याज्ञवल्क्यः॥ सस्त्रीमन्या सवर्णा
यां धर्मकार्यं नकारयेत्॥ सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेत
रा॥ अन्यामसवर्णां॥ इत्यादाधानेस रुधिरतो नेक भार्या विषयं॥
अन धिकृतायास्तु प्रसक्त्यभाव इति॥ तत्रापि केवल कृ चाथर्मा
१२६ ध्यावेक्षणादियजमानो चु बरीसमानं च देकयैव सवर्णयाऽन्ये १२६
ष्ठया कारयेत्॥ पत्नीसन्नहनादि नुकत्ट संस्कारकं॥ सहाग्नि दत्ता
भिः सवर्णाभिरिसो दिमीमा सामासलनसांसुज्ञानं॥ द्वितीयादि
विवाहे ग्नि नियममाह होमायकासायनः॥ सदारोन्यान्पुनर्दारान्
वोढुं कारणांतरात्॥ यदीच्छेदग्निमान्कुर्वन्क्व होमोस्य विधीयते॥
स्वाग्नावेव भवेद्धोमो लौकिके न कदाचनेति॥ अयं नियमः॥ संभ
नवे। मामांतरादावसंभवेतु लौकिकाग्नौ॥ अत्र द्वितीयादिविवा
हे जीवत्पितृकोपि स्वयमेव नांदीश्राद्धं कुर्यात्॥ नांदीश्राद्धं पिताकु

र्यादाद्ये पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिक
मिति स्मृतेः॥ तत्रापि स्ववर्गे विवाहाय मातृमातामहस्ववर्गयोः कु
र्यात्। मातरि जीवंत्यां मातामहस्ववर्गस्यैव॥ तस्मिन्नपि जीवति द्वि
रुलोपाद्वित्रिश्राद्धलोप एव॥ सोपि साग्निकश्चेद्येभ्यः स्वजनक
पिता दद्यात्तेभ्यः स्वयमपि दद्यात्॥ येभ्य एव पिता दद्यात्तेभ्यो
दद्यात्स्वयं सुत इति वचनात्॥ अन्ये तु साग्निकोपि पितृदेवताभ्यो
दद्यान्न तु लोपः॥ व्होतीर्थं चसन्यस्तेतानेव पतितेसनि॥
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति मैत्रायणीयपरि
शिष्टादित्याहुः॥ द्वितीयादिविवाहे कालविशेषः संग्रहे॥ प्रमया
मृतिवासराद्धितः पुनरूद्वाहविधिर्वरस्य च॥ विषमे पदिवसरेषु
चौयुगले चापि मृतिप्रदा भवेत्॥ जीवंत्यां पूर्वपत्न्यां द्वितीया
दिविवाहे नायं कालनियमः॥ ॥ अथ तृतीयादिमानुषी

यविवाहस्यनिषिद्धत्वात्तस्मिन्कर्तव्ये अर्कविवाहविधिः॥५ तृतीया
त्रिषेधमाह कश्यपः॥ तृतीयांमानुषीयविवाहस्यनिषिद्धत्वात्तस्मिन्क
र्तव्ये अर्कविवाहविधिः॥ तृतीयांनिषेधमाह [illegible]॥ तृतीयां
मानुषीं नैव चतुर्थीं यः समुद्वहेत्॥ पुत्रपौत्रादिसंपन्नः कुटुंबी साग्नि
को वरः। उद्वहेदिति सिध्यर्थं तृतीयां न कदाचन॥ मोहादज्ञानतो
वापि यदि गच्छेत्तु मानुषीं॥ नश्यत्येव न संदेहो गार्ग्यस्य वचनं यथा॥
१२८ अन्यत्रापि॥ तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत्॥ चतुर्था
दिविवाहार्थं तर्हि सा विधवा भवेत्॥ आदित्यदिवसे वापि हस्त १२८
र्क्षे वा शनैश्चरे॥ शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकं॥ इत्या
दि ब्रह्मपुराणे दर्शितं॥ ग्रामात्प्राच्यामुदीच्यां वा सुपुष्पफ
लसंयुतं॥ परीक्ष्य पत्रतो धवलं स्वच्छं इत्यादि यथाविधिः॥ प्रा
तः॥ स्नात्वालंकृत्य तत्वा सस्त्र रक्तगंधादिभूषितं॥ सपुष्पफलशाखे
कमर्कगुल्मं समाश्रयेत्॥ सम्यक्क्षणेन संयुक्तमर्कं संस्थाप्य
पल्लवैः॥ अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्सुधीः॥ अर्कस

र्धं

न्निधिमागत्य तत्र स्वस्ति वाचयेत्॥ नांदीश्राद्धं हिरण्ये
न अष्टवर्गान्प्रपूजयेत्॥ पूजयेन्मधुपर्केण वरं विप्रस्य हस्त
तः॥ यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणं॥ उष्णीषगंधमाल्या
दि वरायास्मै प्रदापयेत्॥ स्वशाखोक्तप्रकारेण मधुपर्कं समा
चरेत्॥ अथ ब्रह्मपुराणे॥ यथाविधीयस्यानंतरं॥ इत्यर्कं
पुरतस्तिष्ठन् प्रार्थयेत् द्विजोत्तमः॥ त्रिलोकवासिन्सप्ताश्व छा
याया सहितं रविं॥ वस्त्रैर्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत्॥
तन्मंत्रेण आकृष्णेनेत्यादिना॥ अन्यत्रापि॥ श्वेतवस्त्रेण संवे
ष्ट्य तथा कार्पासतंतुभिः॥ गंधपुष्पैः समभ्यर्च्य तल्लिंगैरु
भि विंच्य च॥ गुडोदनेन नैवेद्यं तांबूलं च समर्पयेत्॥ अर्कं
प्रदक्षिणीकुर्वन् जपेन्मंत्रमिमं बुधः॥ मम प्रीतिकरायेयं
मया सृष्टा पुरातनी॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं प्र
तिरक्षतु॥ पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन मंत्रवित्॥ न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्तेमंगलेदेवीनमः सवितुरात्मजे॥ आदिमां द्रुपयादेवीपत्नी
त्वमेहरागता॥ अर्कस्य ब्रह्मणस्सृष्टः सर्वप्राणिहितायच॥ वृक्षा
णामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः॥ तृतीयोद्वाहजंपापंमृत्युंचाशु
विनाशय॥ ततश्च कन्यावरणं त्रिपुरुषकुलमुद्धरेत्॥ आदित्यः
सविता सूर्यः पुत्रीपौत्रीचनप्तृका॥ गोत्रंकाश्यपइत्युक्तंलोके
१२८ लौकिकमाचरेत्॥ सुमुहूर्तेर्कं निरीक्ष्येन स्वस्तिसूक्तमुदी १२८
रयन्॥ आशीर्भिस्ससहितैः कुर्यादाचार्यप्रमुखैर्द्विजैः॥ अथा
धि चार्यंसमाहूय विंनातन्मुखावलं॥ प्रतिगृह्य ततो होमं गृह्योक्त
विधिनाचरेत्॥ आचार्यस्यदानमंत्रमाह व्यासः॥ अर्ककन्या
मिमांविप्र यथाशक्तिविभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां वि
प्रसमाश्रय॥ अंत्यपक्षतनमकोनिष्ट्रबीकंकणपूर्वकं॥ या
वसंचावृत्ततो कर्कं प्रवेशयेदिति॥ स्वशाखोक्तेन मंत्रेणगा

यत्र्यावीयवाजपेत्॥ पंचीकृत्य पुनः सूत्रं स्कंधेनधार्ति मंत्रतः॥
रहस्यामेतिमंत्रेण सूत्ररक्षाप्रकल्पयेत्॥ अर्कस्यपत्तैरः
पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभाश्च निक्षिपेत्सभ्याद्योग्निया
दिचतुष्टये॥ सवस्त्रप्रतिकुंभंचत्रिःसूत्रेणेन्वेष्टये॥ हरिद्रा
गंधसंयुक्तं पूरयेच्छीतलंजलं॥ प्रतिकुंभंमहाविष्णुंसंपूज्य
घा परमेश्वरं॥ पौष्ट्यादि नैवेद्यांतां कुर्यात्तेवमंत्रवित्॥
अत्र होम प्रकारः॥ शौनकेन प्रदर्शितः॥ तृतीयेस्त्रीविवा
हेतु संप्राप्ते पुरुषस्यतु॥ अर्कविवाहंकवक्ष्यामि शौनकोहं
हं विधानतः॥ अर्कसन्निधिमागत्य तत्रस्वस्त्यादिवाच
येत्॥ नांदीश्राद्धं प्रकुर्वीत तस्थंडिलंचप्रकल्पयेत्॥ अ
र्कमभ्यर्च्य सौर्याचगंधपुष्पाक्षतादिभिः॥ सौर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यदेवस्या आदृष्टेने सादि कूचा ॥ स्वयं चालंस्तद दस्त्र
मात्पाभिः ॥ अर्कस्यो सरदेशेतु समन्वारब्ध एतया ॥ ततया
कन्यया ॥ उल्लेखनादिकं कुर्यादाघारातमतः परं ॥ आज्याहुतीच
जुहुया संगोभिरनये कया ॥ कस्मै त्वा काम कामाय स्येतवै श्य
ततहपरं ॥ व्यस्ताभिश्च समस्ताभिस्तेतश्च स्विष्टकृद्भवेत् ॥ पवि
१२९ रोचनपर्यंतमपाश्च सादिकं कमात् ॥ प्रार्थनामंदि विशेषमा १२९
हा व्यासः ॥ पुनः प्रदक्षिणं कृत्वा मंत्रमेतमुदीरयेत् ॥ मया कृत त्रोध
मिदं कर्म स्थावरेषु जरायुणा ॥ अर्कोप स्यानिधीनो देहि तस्स
र्वेक्षंतुमर्हसि ॥ इत्युक्त्वा शांतिसूक्तानि जपांतं विसर्जेत्सुनः ॥
गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः ॥ इतरेभ्यो विवि
प्रेभ्यो दक्षिणां चापि शक्तितः ॥ ततः सर्वं गुरवे दद्यात्ततः पुण्या
हवाचरेत् ॥ अत्रयं च तद्दिने कर्तव्यमुक्तं ब्रह्मपुराणे ॥ च

तुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च ॥ विसृज्य होममग्निं च विधि
नामानुषीपरां ॥ उद्वहेदन्यथा नैव पुत्रपौत्रादिवृद्धिमान् ॥ नमेकेनु
न च मित्राणि मंगलं नैव गच्छति ॥ एवमेव द्विजश्रेष्ठ विधिनास्मिन्मनुष्य
हेतु ॥ धनधान्यसमृद्धिश्च इष्टोशक्तिः परत्र चेत ॥ अत्रैव संक्षेपतः
प्रयोगः ॥ उक्ते आदित्यवारादौ उक्तदेशीय यथोक्तार्कसमीपे गत्वा चम्य
प्राणानायम्य देशकालौ संकीर्त्य मम मत्तीयमानुषी विवाहदोषपाप
परिहारार्थमर्केण विवाहं करिष्ये इति संकल्प्य आचार्यवरणं स्वस्ति
वाचनाघूक्तक्रमेण कुर्यात् ॥ अत्र होमे विशेषः ॥ देशादि संकी कं
र्त्य विवाहांगभूतं होमं करिष्ये ॥ ततो अग्निस्थापनाद्याघारा
तं कृत्वा आज्येन षडाहुतीर्जुहुयात् ॥ सं गोभिरांगिरसो नक्ष
मणो भग इवेदं अर्यमणं निनाय ॥ जने मित्रा न दंपती अनक्ति
बृहस्पते वाजया शूरिवाजौ स्वाहा ॥ इदं बृहस्पतये न मम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स:

यस्मै त्वां काम कामाय वयं सम्राज्य आमहे ॥ तमस्मभ्यं कामं दत्वा
थेदं धृतं पिब स्वाहा ॥ इदमग्नये न मम ॥ ३ ॥ भूः स्वाहा ॥ ३ ॥ भुवः
स्वाहा ॥ ४ ॥ स्वः स्वाहा ॥ ५ ॥ भूर्भुवः स्वाहा ॥ ६ ॥ स्यागकृतः ॥ त
तो स्विष्टकृत्त्वा हुत्वा सादि होमशेषं समापयेत् ॥ ततः प्रदक्षिणप्रार्थ
१३० नादि कुर्मशेषं ॥ समापनं ॥ इति अर्कविवाहः ॥ ॥ अथैकक्रि १३०
यानिर्णयः ॥ ॥ तत्र वृहन्मनुः ॥ एकमातृजयोरेकवत्सरे पु
रुषस्त्रियोः न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥ अथ
एकस्य पुंसो विवाहद्वयमेकवत्सरे निषिद्धं मातृभेदाभावात् ॥
नारदः ॥ पुत्रोद्वाहात्परं पुत्री विवाहो न ऋतुत्रये ॥ न तयोर्व्र
तमुद्वाहान्मंडनादपि मुंडनं ॥ वरारुः ॥ विवाहस्त्वेकजातानां
षण्मासाभ्यंतरे यदि ॥ असंशयं त्रिभिर्वर्षैस्तत्रैका विध

वा भवेत् ॥ वसिष्ठः ॥ न पुंविवाहोर्ध्वमृतुत्रयेपि विवाहकार्यं दुहि
तुः प्रकुर्यात् ॥ न मुंडनाच्चापि हि मुंडनं च गोत्रैकतायां यदि ना
स्ति भेदः ॥ एकोदरभ्रातृविवाहद्वयस्य स्वसुर्न पाणिग्रहणं विधे
यं ॥ षण्मासमध्ये मुनयः समूचुर्न मुंडनं मंडनतोपि कार्यं ॥
एतदपवादोप्यत्रैव ॥ ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनं ॥
तदा एकोदरस्यापि विवाहस्तु प्रशस्यते ॥ सारावल्यां ॥
फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनयने ॥ भेदोब्दस्य प्रकुर्वी
त न तु त्रयविलंबनं ॥ संहिताप्रदीपे ॥ ऊर्ध्वं विवाहात्तनयस्य नै
वं कार्यो विवाहो दुहितुः समार्धं ॥ अप्राप्य कन्यां भ्य सुरा
लयं च वधूप्रवेशं यास्य च गृहं न चादौ ॥ वसिष्ठः ॥ द्विरागमनं
त्वेकगृहे पिनेष्टं श्रूं शुभं तु पश्चान्नवभिर्दिनैश्च ॥ अव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३१ त्र्यकं शौभनमुत्सवो वा द्वारेथवाचार्ये भिन्नेदतो वा॥ एकोदर १३१
प्रसूतानां नाग्निकार्यत्रयं भवेत्॥ भिन्नोदरप्रसूतानां नेति शातात
पो ब्रवीत्॥ ज्योतिर्निबंधे॥ कासोमनः॥ कुले ऽन्नतु त्र्यपादवौ श्रुत
नाव्दतु मुंडनं॥ प्रवेशनिर्गमो नेष्टो नकुर्यान्मंगलत्रयं॥ कुर्वन्ति
मुनयः केचिदन्यस्मिन्वत्सरे यदि॥ लघुर्वा गुरुर्वा कार्ये श्रासने
मित्तिकं तु यत्॥ पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः॥
मुंडनं तौलमित्युक्तं अतो द्वाहोत्तु मंगलं॥ चौलमुंडनमेवोक्तं व
र्जयेन्मंडनास्वरं॥ मौंजीचौ भयतः कापोयनो मौंजीन मुंडनं॥
अभिन्नेवत्सरे पित्र्यान्तदहस्तं न भेदयेत्॥ अभेदेतु विनाशस्या
न्न कुर्यादेकमंडपे॥ संकटे तु कपर्दिकारिकास्तु॥ उद्वाहपु
त्रीन पिता विदध्यात्सुत्वं तरस्योद्वहनं कदापि॥ पावकत्वं तु थं

दिनमत्र पूर्वे समाप्य चान्योद्वहनं विदध्यात्॥ कारयपः॥ भ्रा
मु॰२ तृयुगे स्वयुगे भ्रातृस्वसृ तु युगे तथा॥ न कुर्यान्मंगलं किंचिदेक
स्मिन्मंडपे हनि॥ ज्योतिर्विवरणे॥ एकोदरयोर्द्वयोरेकदिनो
द्वहने भवेन्नाशः॥ नघंतरेत्वेकदिनेऽप्याहुः संकटे शुभं॥ ऊर्ध्वं
विवाहाच्छुभदो नरस्य नारीविवाहो न ऋतुत्रये स्यात्॥ नारीवि
वाहात्तदहः पित्रास्तं नरस्य पाणिग्रहमाहुरार्याः॥ भिन्नमातृ चौ॰
जयोस्तु एकवासरे विवाह एवमेधातिथिः॥ पृथक्मातृजयोः का
र्यो विवाहस्त्वेकवासरे॥ एकस्मिन्मंडपे कार्यः पृथग्वेदिकयोस्त
था॥ पुष्पर्द्धिकयोः कार्ये दर्शनं न शिरस्कयोः॥ भगिनीभ्यामुभा
भ्यां च पावकस्सप्तपदी भवेत्॥ यमयोस्तु विशेषः॥ गार्ग्यः॥ एक
स्मिन्वासरे प्राप्ते कुर्यात्यमलजातयोः॥ क्षौरं चैव विवाहं च मौं
जीबंधनमेव च॥ तथा कारिकायां॥ एकस्मिन्वत्सरे चैव वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरेमंडपे तथा॥ कर्त्तव्यं मंगलं स्वस्त्रोर्भ्रात्रोर्यमलजातयोः॥ इति॥
अथ कन्यागृहे भोजननिषेधः॥ मदनरत्ने भविष्ये॥ अप्रजायां
तु कन्यायां न भुंजीत कदाचन॥ दौहित्रस्य मुखं दृष्ट्वा किमर्थमनु
शोचति॥१॥ अपरार्के आदित्यपुराणे॥ विहं जामातरं मन्येत्त
१३२ स्यकोपं न कारयेत्॥ अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै
गृहे॥ यदि भुंजीत मोहाद्वा पूयाशी नरकं व्रजेत्॥ ॥ इति १३२
नांदीश्राद्धानंतरं धर्माः॥ निर्णयदीपे गार्ग्यः॥ नांदीश्राद्धे कृते प
श्याद्यावन्मातृविसर्जनं॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोद
केन च॥ अपसव्यं स्वधा १ कारं नित्यश्राद्धं तथैव च॥ ब्रह्म
यज्ञं चाध्ययनं नदीसीमातिलंघनं॥ उपवासव्रतं चैव श्राद्धभो
जनमेव च॥ नैव कुर्युः सपिंडाश्च मंडपोद्वासनाद्विधिः॥ ज्यौ
तिषे॥ स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानं॥

अपूर्वतीर्थामरदर्शनं विचैव वर्जयेन्मंगलतोब्दमेकं॥ पितृणा
मुद्देशेन कलशदानमित्यर्थः॥ मासषट्कं विवाहादौ व्रतप्रारंभणेन
च॥ जीर्णभांडादिनसाज्यं गृहसंमार्जनं तथा॥ ऊर्ध्वं विवाहा
त्पुत्रस्य तथा च व्रतबंधनात्॥ आत्मनो मुंडनं नैव वर्षं वर्षार्धमेव
वा॥ अभ्यंगस्नानकं चैव विवाहेषु व्रजेन्मतिः॥ मांगल्येषु सर्वेषु न धा व
र्यं गोपिचंदनं॥ बृहस्पतिः॥ तीर्थे विवाहे यात्रायां संग्रामे देश च
विप्लवे॥ नगरग्रामदाहे च स्पृष्टास्पृष्टं न दुष्यति॥ योगयात्र
वत्स्यः॥ न स्नायाद् उत्सवे तीते मंगलं विनिवर्त्य च॥ अनुव्रज्य
सुहृद्बंधूनर्चयित्वेष्टदेवतां॥ ज्योतिर्निबंधे॥ उद्वाहात्प्र
थमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका कुर्यात्तज्जननीक्षयं
निजतनुं ज्येष्ठे पतिज्येष्ठकं॥ पौषे च श्वसुरं पतिं च मलिने चै
त्रे च पित्रालये निष्टुतीपितरं निहंति न भयं तेषामभावो भवेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निबंधे॥ विवाहात्प्रथमे पौषे आषाढे चाधिमासके॥ न सा भर्तुर्गृ
हे तिष्ठेच्चैत्रे पितृगृहे तथा॥ हेमाद्रौ स्मृत्यंतरे॥ विवाहव्रतचूडा
सु वर्षमर्द्धं तदर्द्धकं॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं॥ स्मृ
तौ॥ महालये गयाश्राद्धे मातापित्रोः क्षयेहनि॥ कृतोद्वाहोपि कु
र्वीत पिंडनिर्वपनं सुतः॥ ॥ इति श्री त्रिरग्निचित्सम्राट्स्थपति श्री
६८ महायाज्ञिक वामनात्मज दीक्षित गंधारे विरचित विवाहप्रयोगः॥
१३३ ॥ ॥ आवसथ्येग्नौ होमम आह॥ ॥ उपयमनप्रभृत्यौपासन १३३
स्य परिचरणं॥ उपयमन कुशानादाय समिधोभ्याधायपर्युक्ष्य
जुहुयात् लभ्यते॥ होमश्चात्रोपदिष्टः॥ होमेपि च सति परिचरणा
ग्रहणादिति कर्तव्यता न भवति॥ एतेन वात्र होमः॥ इति कर्त
व्यताव्युदासात्॥ कथमिति कर्तव्यताव्युदास इति चेत्॥ उप
यमनप्रभृतीत्यस्य कृत्वात्॥ पर्युक्षणं च मणिकोदकेन॥ हो

मकालनियममाह॥ अस्तमितानुदितयोः॥ अस्तमितश्च अनु
दितश्च अस्तमितानुदितौ तयोः अस्तमितानुदितयोः॥ तत्कर्मक
र्तव्यमिति शेषः॥ आवसथ्याधानानंतरं अस्तमिते च सूर्येनुदि
ते च सर्वदा होमः कार्यः न सहरत्॥ येनैवं सूत्रकार आह॥ ततोस्तमि
तेग्निं परिचर्यादर्व्योपघातं स तत्सूर्याय बलिं हरेदिति बलिह
रणविधिपरे वाक्ये होमस्य नित्यत्वं ज्ञापयति॥ अस्तमितलक्षणं
कात्यायनेनोक्तं॥ यावत्सम्यग्भाव्यंते नाभसि ऋक्षाणि सर्वतः॥
लोहितत्वं च नापैति तावत्सायं तु हूयते॥ अनुदितस्तु तद्विधः॥ नु
दितश्च समयाध्युषितश्च॥ तथा च मनुः॥ उदितेनुदिते चैव सम
याध्युषिते तथेति॥ तत्रानुदितस्पष्टतारतोपलक्षितः॥ ततः
परं उदयात् प्राक् समयाध्युषितः॥ संपूर्णोदितमंडलदर्शनोप
लक्षित उदितः॥ तत्रास्माकं सूत्रे अनुदित एव चरणमुक्तं॥ मुनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वचनेऽदितस्य हरणं त्वाख्यांतरग्रहाभिप्रायेण ॥ मुख्यकाले यदा होमो न
भवति तदा गौणकालेपि कार्यः ॥ तथा चंद्रोदयेन ॥ मुख्यकाले यदावश्यं
कर्म कर्तुं न शक्यते ॥ गौणकालेपि कर्तव्यं गौणेप्यत्र दृशो भवेत् ॥ गौ
ल ४ णकालपरिमाणमपि तेनैवोक्तं ॥ आसायमाहुतेः कालः कालो स्ति
प्रातराहुतेः ॥ प्रातराहुतिकालः स्यादाकालः स्यात्सायमाहुतेरिति ॥
मुख्यकालातिक्रमे प्रायश्चित्तपूर्वकं गौणकालेऽनुष्ठानं ॥ गौण
१३४ कालातिक्रमे तु लोप एव ॥ प्रायश्चित्तं तु पमात्रं ॥ एकमविज्ञानं ॥ सं १३४
ध्योपासनहानौ च नित्यस्नाने विलोप्य च ॥ होमं च नैत्यकं मुख्ये स्ना
वित्र्यष्टसहस्रद्दरदित्यक्तं प्रजापत्यकं द्वितीयं ॥ होमेकर्तारः ॥ स्व
स्व ३ यं स्यासंभवे पत्न्यादयः ॥ प्रयोगरत्ने स्मृतौ ॥ पत्नी कुमारी पुत्रो वा
शिष्यो वापि यथाक्रमं ॥ पूर्वपूर्वस्य चाभावे विदध्यादुत्तरो
त्तरे ॥ स्मृत्यर्थसारेपि ॥ यजमानः प्रधानं स्यात्पत्नी पुत्रश्च

कन्यका ॥ ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव
हुतं यच्च तद्धुतं स्वयमेव तु ॥ पत्नी कन्या च जुहुयात् विनापर्युक्षणक्रि
यामिति ॥ अत्र च वचनात्पत्न्यादीनां मंत्रपाठेऽधिकारः ॥ केवलं
पर्युक्षणे नाधिकारः ॥ अग्निहोत्रे तु ॥ न वा कन्या न युवती नाल्प
विद्यो न बालिशः ॥ होता स्यादग्निहोत्रस्य नार्ता नासंस्कृतस्तथेति
वचनात्पत्न्यादीनां अनधिकारः ॥ त्यागे विशेषः ॥ सन्निधौ यज
मानः स्यादुद्देशत्यागकारकः ॥ असन्निधौ तु पत्नी स्यादुद्दे
शत्यागकारिका ॥ असन्निधौ तु पत्नी स्यादध्वर्युस्तदनुज्ञया ॥
उन्मादे प्रसवे चार्तौ कुर्वीतानुज्ञया विना ॥ मंडनः ॥ त्यागं तु सर्वथा
कुर्यात्तत्राप्यन्यतरस्तयोः उभावथ समर्थौ चेन्नियुक्तः कश्च
न सज्जेत् ॥ दध्ना तंदुलैरक्षतैर्वा ॥ गव्येन दध्ना वा व्रीहितंदुलै
र्वा अक्षतैर्यवैर्वा जुहुयादित्यर्थः ॥ तेषामभावे त्वाख्यांतरग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा धरु

घपरिशिष्टोक्तानि द्रव्याणि ग्राह्याणि ॥ तत्र प्रयोगरत्ने ॥ पयोद
धिसर्पिर्यवागूरोदनं तंदुलाः सोमस्तैलमाणे व्रीहयो यवास्तिला
इति होम्यानि ॥ तंदुला नीवारश्यामाकयावनालानां वा ॥ व्रीहीशाल
यगोधूमप्रियंगवः ॥ स्वरूपेणापि होम्यास्तिलाः स्वरूपेणैव ॥
रानंचतुःषष्टिर्वा हुतिश्शिरितुल्यानां ॥ तदर्धं तिलानां ॥ तदर्धंस
१३५ र्पिस्तिलयोस्तैलं च तिलजं [illegible] लातसीकुसुमानां ॥ येन प्रथमां १३५
देवतां जुहुयात्तेनैव द्वितीयां जुहुयात् पार्वणसाध्यं जुहुयात्तेन प्रातरिति ॥
अत्र तेनैव प्रातरिति प्रतिनिधिर्वर्ज्यः ॥ [illegible] स्यैति स्वाहुति परिमा
णमाह ॥ प्रस्थधान्यं चतुःषष्ठेराहुतेः परिकीर्तितं ॥ तिलानां च तद नां ४
र्धं तु तंदुलाव्रीहिभिः समाः ॥ प्रस्थश्च ॥ प्रसृतिद्वितीयं मानं प्र
स्थं मानेच तुष्टयमिति ॥ बोधायनस्तु ॥ व्रीहीणां यवानां वा शतं हु वा २
तिरिष्यते ॥ अगस्त्यः ॥ द्रवद्रव्यस्य मानं स्याद्धारागोकर्णदीर्घिका ॥

सिद्धांतशेखरे ॥ अन्नं ग्रासप्रमं प्रोक्तं लाजा मुष्टिमिता मताइति ॥ द
धिपक्षे तंदुलपक्षे च रोषप्राशनं ॥ अक्षतपक्षे त्वभाव अनदनीयत्वा
दिति भर्तृयज्ञः ॥ अग्नये स्वाहा प्रजापतये स्वाहेति सायं सूर्याय स्वाहा
प्रजापतये स्वाहेति प्रातः ॥ तत्र सायंकालेऽग्नये स्वाहेति पूर्वामाहुतिं
जुहोति ॥ प्रजापतये स्वाहेत्युत्तरां च जुहोति ॥ प्रातःकाले सूर्याय
स्वाहेति मंत्रेण पूर्वामाहुतिं हुत्वा प्रजापतये स्वाहेत्युत्तरां जुहुयात् ॥
पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ॥ पुमानिंद्रश्च सूर्यश्च
पुमांसं वर्त्ततां मयि पुनः स्वाहेति पूर्वां गर्भकामा ॥ १ ॥ यदि गर्भकामा
भवति तदा सायं प्रातः पूर्वामाहुतिं पत्न्यैव पुमांसौ मित्रावरुणावि
त्यनेन मंत्रेण जुहोति उत्तरामाहुतिं तु यजमान एव जुहोति ॥ सर्वत्र हो
मे प्रतिमंत्रेनोंकारः ॥ नोंकुर्याद्धोममंत्राणां पृथगादिषु कुत्रचित् ॥ अ
न्येषां च विहरष्टानां कालेनाचमनादिना ॥ इति वचनात् ॥ विहरष्टा
नां अनंतरितानां कालेन आचमनादिना वेति हरिहरः ॥ मंत्रार्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतेषां देवानामेतौ युग्मौ मम आहुः सा मद्दत्त पापरितुष्टौ संतौ मयि वि
षये पुमांसं पुंलक्षणं गर्भं विर्त्तं तं उ सा दधे तां॥ इति श्रीत्रिरग्निचिह्
स्त्राद् स्थपति श्रीमहायाज्ञिक वामनात्मज दीक्षित गदाधर हस्ते
गृह्यसूत्रभाष्ये प्रथमकांडे नवमी कण्डिका॥९॥ अथ पदार्थक्रमः॥
२५ तत्रौवसथ्याधानोत्तकाले तस्मिन्नेवाहनि भोजनात् प्राग्यजमानो
१३६ होमारंभनिमित्तं मातृपूजनपूर्वकं नांदीश्राद्धं कुर्यात्॥ ततः स्नान १३६
नेद संध्यावंदनोऽग्नेरुत्तरतः उपविश्य प्राणानायम्य देशकालौ निर्दिश्य
अग्निरूप परमेश्वर प्रीत्यर्थं औपासन होमम् अहं करिष्ये इति संकल्प्य॥
वैकल्पिकं द्रव्यमादाय उपयमनान् कुशानादाय सव्ये धृत्वा दक्षिणे
न हस्तेन त्रिः समिधो ध्याधाय मणिकोदकेन पर्युक्ष्य प्रदीप्तेऽग्नौ
रात संख्या प्रसृतस्य चतुः षष्टितम भाग मितान् व्रीहितंडुलानादायाग्नु
त्तरपार्श्वेन समिन्मूलतो ध्यं गुलप्रदेशोऽग्नये स्वाहेति जुहो
ति॥ इदमग्नये न ममेति त्यागं विधाय प्रक्षिपेत्॥ संस्त्रव भक्षणं॥

पुनस्तं दुलानादाय प्रक्षिपेत्॥ संस्त्रव रक्षणं॥ पत्नी पुमांऽसा वि
सनेन मंत्रेण गर्भकामा चेत्सूर्यमाहुतिं जुहोति॥ इदमिंद्रावरुणाभ्या
मश्विभ्यामिंद्राय सूर्याय न ममेति त्यागो यजमानस्य संस्त्रव प्राश॥
नं॥ पत्नीकर्तृक होमशेषस्य पत्न्येव प्राशनं करोति॥ अत्र समास्ते सु
पस्थानमिति जयरामभाष्ये॥ इति प्रातर्होम विशेषः॥ उदयास्तपूर्व
सायं द्रव्येणेव सूर्याय स्वाहेति पूर्वाहुतिः॥ प्रजापतये स्वाहेत्युत्त
राहुतिः॥ यथादैवतं त्यागौ॥ गर्भकामाचेदत्रापि पुमांऽसाविति
होमः॥ अत्र विश्वादि सूक्तनुवाकेनोपस्थानमिति जयरामभाष्ये॥
॥ ॥ इति प्रातर्होमे विशेषः॥ अन्यत्सर्वं सायंहोमवत्॥ एवमु
पयमन कुशादानादि॥ प्रसहमौपासनस्य परिचरणं॥ अथाप
त्कालेकर्तव्यो होमद्वय समास प्रयोगः॥ तत्र पूर्ववत्सायंकाली
नाहुतिद्वयं हुत्वा किंचित्कालं निमाल्य पुनः कुशानोदो दिपर्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणांतं दत्त्वाघ्वः कृत्वा आज्यभागांतराहुतिद्वयमादाय जुहुयादिति प्रयो
गरत्ने ॥ हरीहरमिश्रैस्तु तंत्रेण होमो लिखितः ॥ सच्चैवं ॥ पर्युक्षणां
तं दत्त्वा अग्नये स्वाहेति सकृदेव जुहुयात् ॥ अथ गुर्वीपदि पक्षहोमः ॥
तत्र प्रतिपदि सायंकाले उपयमनादानादि पर्युक्षणांतं दत्त्वा आहु
तिप्रमाणेन तंडुलान् पात्रद्वये प्रतिपात्रं चतुर्दशवारं गृहीत्वा हो
१३८ मकाले प्रथमपात्रस्थानग्नये स्वाहेति जुहुयात् ॥ ततो द्वितीयपा १३८
त्रस्थान् प्रजापतये स्वाहेति जुहोति ॥ एवं द्वितीयायां प्रातः पर्युक्ष
णांतं दत्त्वा पूर्ववत्पात्रद्वये तंडुलान् दत्त्वा सूर्याय स्वाहेति प्रथमपात्र ति ८
स्थान् हुत्वा प्रजापतये स्वाहेति द्वितीयपात्रस्थान् तंडुलान् जुहुया
त् ॥ पक्षमध्ये वा अयत्नावाप्तौ चतुर्दशी सायंकालीनहोमात्ता
नु शेषं होमान् सायं समये नु ॥ पर्व प्रातर्होमांतांश्च प्रातः शेषहोमा
नु समस्येनु ॥ सर्वथा पर्वसायंहोमः ॥ प्रतिपत्प्रातर्होमश्च पृथ
ग् वक्तव्यौ ॥ तत्र पूर्ववदाग्निमपि रक्षेत् ॥ अंतरा पत्नीव्रतो

तु तदारभ्य पूर्ववत्सायंप्रातर्होमान् यथाकालं कुर्यात् ॥ इति प्रयोगर
त्ने ॥ अनापदि पक्षहोमे प्रायश्चित्तमुक्तं देवयाज्ञिकपद्धतौ ॥ आना
तुरो प्रवासी च निश्चिंतो निरुपद्रवः ॥ पक्षहोमं तु यः कुर्यात्स चरेत्स
प्तिलव्रतं ॥ ॥ इति सम्राट्स्थवामनात्मजदीक्षितगदाधरविरचि
ते होमविधिः ॥ दाहनेक्षभेदेन हविमोक्षे यानविपर्यासेन्यस्यां वा
व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाऽय ऽसंस्हरस्रु
हरतिरिति जुहोति नानासंज्ञाभ्यां ॥ राज्ञः प्रजापालनकर्तुः देशांतरे
प्रस्थितस्य पुत्रस्य वा अक्षस्य रथावयवस्य भेदे भंगे वह्नस्य रथस्य विमो
क्षे आकस्मिकबंधविच्छेदे वा यानविपर्यासे हयरथादिकेवा अधो
भावापत्तौ ॥ अन्यस्यां वा कस्यां विघापत्सौ अश्रुभस्तूच कोसा
ति स्त्रियाश्चोद्वहने स्त्रियाः वध्वाः पित्रागृहसमाधायेत्तिराज्ञश्चेन्नि
मित्तं तदा सेनाग्निं स्त्रियाश्चेन्निमित्तं तदा सेनाग्निं स्त्रियाश्चेत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दावैवाहिकमग्निमुपसमाधायस्थापयित्वाऽज्यं संस्कृत्य आज्यसं
स्कारं॥ निरूप्याज्यमित्यादिनाहरत्वा इहरतिरिति नाम मंत्राभ्यां जुहो
ति॥ एष एव विधिरिसनेनेनैवाज्यसंस्कारस्य प्राप्तत्वादत्राज्यसंस्कार
स्येति ग्रहणं इहरतीसाहुसोमाघारादिभ्योपि पूर्वकालज्ञापनार्थं॥
नानाग्रहणाच्च द्वे आहुती॥ इहरतिरित्येका॥ उपसृजमिति द्वितीया ततः
१३८ आघारादि॥ अन्यद्यानमुपकल्प्य॥ तत्रोपवेशयेद्राजानं स्त्रियं वा १३८
प्रतिक्षत्र इतिमंत्रेणात्राहार्यमिति चैतया॥ ततस्तद्यानं स्वलंकृत्य
घनं वाहनं रथादिकं मुपकल्प्य तत्र तस्मिन्यानेन वाहने राजानं
स्त्रियं वा वध्वं उपवेशयेत्॥ प्रतिक्षत्र इति मंत्रेण यजुरित्युक्तेन॥ आ
त्वाहार्षमिति चैतया ऋचा उपवेशयेत्॥ एवं च मंत्राभ्यामुपवेशनं॥
अत्रोपवेशयेदिति॥ येयंतस्मादध्येत्रानं॥ मानेउपविशति सति॥ त
थ राज्ञो ब्रह्मकर्तृकं॥ वध्वा वरकर्तृकं॥ अत्र परादीनां पूर्वोत्तर

त्यायाभावात्तेषां वाक्ये न च प्रतिष्ठामीत्येतदंतमंत्रप्राप्तौ यज्ञांतग्र
हणं वाक्यसमुच्चयविधानार्थं॥ आत्वाहार्षमिति ऋक् तु त्वासंपूर्णपा
पाठः॥ तेषां वाक्यमित्यत्र तच्छब्देन यजुषां परामर्शो नु॥ ते तु अयं मंत्रे
ति कुग्रहणं तत्र संपूर्णपाठ स्त्र्यो अग्न इत्यादौ॥ धूर्यो दक्षिणाग्नौ
पश्चिमे ति॥ अत्र धूर्यो योन ग्राह्यो दक्षिणा भवतीति शेषः॥ दक्षिणानर
स्य निवृत्तिः॥ दृष्टार्थत्वात्॥ प्रायश्चित्तिरिति चास्य कर्मणः संज्ञा॥
ततो ब्राह्मणभोजनं॥ ततः कर्मांते ब्राह्मणस्य एकस्य भोजनं कार्यं॥ ॥
इति श्री त्रिरग्निचित्सम्राट्स्थपतिवामनात्मजदीक्षितगदाधरकृते गृ
ह्यसूत्रभाष्ये प्रथमकांडे दशमी कंडिका॥ १०॥ अथ पदार्थक्र
मः॥ तत्र निमित्ते जाते पंचसंस्कारपूर्वकमग्नेः स्थापनं॥ राजा सेना
ग्नेः स्थापनं कुर्यात्॥ वरश्च वैवाहिकाग्नेः स्थापनं कुर्यात्॥ ततो
ब्रह्मोपवेशनादि पर्युक्षणांतं कृत्वा इहरतिरिति प्रथमाहुतिं जुहो
ति॥ उपसृजं धरुणमित्यादि धरत्वाहे संतेनमंत्रेण द्वितीयामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हुतीर्जुहोति ॥ इदमग्नये न मम इति द्वितीयो भागो ॥ ततः आघारादि प्रणी-
ता विमोकान्तं हुत्वा धुर्यो वनडुहौ दत्वा अन्यस्थानमानाय ततश्च रा-
ज्ञानं प्रतिक्षत्रे प्रतितिष्ठामि । आघ्राहार्षं इति मंत्राभ्यामुपवेशनं पृच्छेत्सर्वे २
ध्येषणापूर्वकमुपवेशयेत् ॥ ततो ब्राह्मणभोजनं ॥ इति पदार्थक्र-
मः ॥ चतुर्थीमपररात्रेऽभ्यंतरतोऽग्निमुपसमाधाय दक्षिणतो ब्राह्मण-
मुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाज्यभागा-
१३१ विष्णावाज्याहुती र्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्रा- १३१
ह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वा-
हा ॥ वायोः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ-
काम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ सूर्य
प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधा-
वामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ चंद्र प्रायश्चित्ते
त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि या-

स्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ गंधर्व प्रायश्चित्ते त्वं देवानां प्रा-
यश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्ता-
मस्यै नाशय स्वाहेति ॥ विवाहाद्या चतुर्थी तिथिस्तस्यामपररात्रे अंति-
म प्रहरे ॥ अभ्यंतरतः । गृहस्य मध्ये अग्निमुपसमाधाय वैवाहिक-
मुपसमाधाय । वैवाहिकमग्निं स्थापयित्वा ॥ दक्षिणतो ब्राह्मणमुपवेश्य ॥
ण अग्नेर्दक्षिणतो ब्राह्मणः उपवेशनार्थं कुशानास्तीर्य तत्र ब्राह्मणमुपवेश्य ॥
उत्तरत उदपात्रं प्रतिष्ठाप्य ॥ अग्नेरुत्तरतः प्रणीतास्थले सजलमुद-
कयुक्तं पात्रं स्थापयित्वा ॥ स्थालीपाकं श्रपयित्वा स्थालीपाकं चरुं श्र-
पयित्वा ॥ आज्यभागौ विष्णावाज्याहुती र्जुहोत्याज्येन अग्नेः प्रायश्चि-
त्ते त्वं पंचभिर्मंत्रैः पंचाहुतीर्जुहोति ॥ अत्रापररात्रग्रहणं पूर्वाह्णा-
सदासार्थं ॥ चतुर्थीकर्मणो विवाहांगत्वाद्बहिः शालायामाभूदि-
त्यभ्यंतरग्रहणं ॥ अग्निमुपसमाधाय ग्रहणमभ्यंतरग्रहणगु-
णविधानार्थं ॥ ब्राह्मणमुपवेश्येत्युदपात्रस्थापनावसरविधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायोक्तं॥ चरोर्भुतोपदानं माभूदिति भ्रपयित्वेत्युच्यते॥ आज्यभागा
विष्टकृतिग्रहणं॥ आहुतिकाले विधानार्थं॥ मंत्रार्थः॥ हे अग्ने। हे प्राय
श्चित्ते॥ सर्वदोषापाकर॥ यतस्त्वं देवानामीशादीनां मध्ये प्रायश्चित्तिः॥
दोषापाकर्त्तासि॥ अहं च ब्राह्मणः ब्राह्मण्यः। वेदीको वा भूत्वा उपधा
वामि आराधयामि॥ किंभूतोहं॥ नाथकाम्या॥ आत्मीकामः॥ ऐश्व
१४० र्यकामो वा॥ उपधावनप्रयोजनमाह॥ या अस्यै षष्ठ्यर्थे चतुर्थी॥ १४०
या अस्याः वध्वाः पतिघ्नी तनूः तन्वा अवयवस्तां॥ अस्या इमामुपक
र्त्तुं नाशय। अपनय। तुभ्यं स्वाहा सुहुतमस्तु॥ समुदायवाचकोपि
तनूशब्दोत्रावयववाचको ज्ञेयः। तेन यदस्याः पतिनाशकं अंगल
क्षणं हस्तरेखादि सामुद्रिकोक्तं तदपाकरं शोभनं मंगलं विधेहीति वा
क्यार्थः॥ एवमुपर्यपि व्याख्येयं॥ तनु वित्रोषणं देवताभिघाते॥
न घ्यथा॥ हे वायो पवन प्रजाघ्नी अपसेनाशिशि॥ एवमुत्तरत्रापि यो
ज्यं॥ स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति। आज्याहुत्यनं

तरं स्थालीपाकस्य चरोः प्रजापतये स्वाहेति मंत्रेणोपांशु पाठ तेनैका
माहुतिं जुहोति॥ स्थालीपाकस्यैस्वयवत्क्षणाषष्ठी। हुत्वा हुत्वे नासां
माहुतीनामुदपात्रे संस्त्रवां समवनीयतत एनां मूर्द्धन्यभिषिंचति निषा
ने पतिघ्नी प्राजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदितां तनूं जारघ्नीं त
न एनां करोमि सा जीर्यत्वं मया सहासाविति॥ एतासां षण्णामाहुतीनां
एकैकामाहुतिं हुत्वा उत्तरतः प्रतिष्ठापित तस्मात्संस्त्रवमिश्रमुदकं
गृहीत्वा एनां वधूं मूर्ध्नि मस्तके अभिषिंचति॥ मानेपतिघ्नीति मंत्रे
ण षण्णामाहुतीनां मंत्रसंस्त्रवभक्षत्लोपः। सांस्त्रवसेव। हुत्वाहुत्वेति
ग्रहणं सर्वाहुत्यंते संस्त्रवविनयनं माभूदित्यर्थः। मंत्रार्थः। हे असौ क
न्ये। याते। तव पस्तादिघातिनी पंचधा दुष्टा तनूः। अत एव निंदिता॥
तनुं तेनाभिषेचनेन एनां तनुं जारघ्नीं उपपस्तादिदोषघातिनीं करोमि।
सा त्वं मया पत्या भर्त्रा सह जीर्य निर्दुष्टत्वं गच्छत॥ अथैनां स्था
लीपाकं प्राशयति॥ अथाभिषेकानंतरं एनां वधूं स्थालीपाकं चरुं व
रः प्राशयेत्॥ प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनीति मंत्रेण व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मसंस्कारोयं॥ नतु द्रव्यप्रतिपत्तिः। अतो द्रव्यविनाशादौ द्रव्येणान्येन
तद्भवेत्॥ शेषद्रव्यविनाशादौ तु पुनस्तत्प्रतिपत्तयः। अत्र स्त्रिया सह वरोपि
समाचारोऽज्ञो जनं करोति। स्त्रिया सह भोजनेपि न दोषइत्याह॥ हेमाद्रौ प्रा
यश्चित्तकांडे गालवः॥ एकयाने समारोहं एकपात्रे च भोजनं॥ विवाहे
पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥ अन्यथा दोषमाप्नोति पश्चा
त्चांद्रायणं चरेत्॥ मिताक्षरायामप्येवं॥ मंत्रार्थः। हे कन्ये मम प्राणादि
१५१ भिस्तेन च प्राणादीन्संदधामि संयोजयामि॥ तस्मादेवंविच्छ्रोत्रियस्य १५२
दारेणोपहासमिच्छेदुत ह्येवंवित्परो भवति॥ हि यस्मादस्या एतेन
प्राशनाद्यसंस्कारेण भर्त्रा सहैक्यं वृत्तं तस्माच्छ्रोत्रियस्य दारेण
उपहासं अभिगमनं नेच्छेत्॥ स चेदेवंवित् एवं कुर्वन् परो भवति परा
भवं गच्छति॥ यद्वा एवंवित् श्रोत्रियः परः शत्रुर्भवति॥ इत्यर्थः॥
निंदार्थवादोयं। परदाराभिगमनं मनसापि न कार्यं॥ समाप्तं चतुर्थीकर्म॥
स्वभार्याभिगमनमाह। तामुद्वह्य यथर्तु प्रवेशनं॥ बौधायनपूर्वोक्त

विधिनोद्वह्य विवाहयित्वा यथर्तु ऋतौ ऋतौ प्रवेशनमभि
गमनं कुर्यादित्यर्थः॥ याज्ञवल्क्यः॥ षोडशर्तु निशा स्त्रीणां त
स्मिन्युग्मासु संविशेत्॥ ब्रह्मचर्यैव पर्वाण्याद्याश्चतस्रश्च वर्ज
येत्॥ स्त्रीणां षोडशनिशा ऋतुः॥ गर्भाधानयोग्यः कालः तत्रो
क्तविधिना गच्छेत्॥ ब्रह्मचार्येव॥ चतुर्दश्यष्टमी चैव अमावा
स्या च पौर्णिमा॥ पर्वाण्येतानि पर्वाणि रविसंक्रांतिरेव च॥ म
नुः॥ अमावास्याष्टमीं चैव पौर्णमासीं चतुर्दशीं॥ ब्रह्मचारी भवे
न्नित्यमप्यृतौ स्नातको द्विजः॥ तथा। तासामाद्याश्चतस्रस्त
निंदितैकादशी तथा॥ त्रयोदशी च शेषाः स्युः प्रशस्ता दशरा
त्रयः॥ अतो एकादशी त्रयोदश्यो न पक्षस्य॥ [illegible]दिनस्य॥ शुद्धा
भर्त्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला॥ दैवे कर्मणि पित्र्ये च पं
चमे हनि शुध्यतीति। ततश्चतुर्थ्यां स्त्रीगमनस्य विहितत्वप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिसत्याद्धिकृत्यः॥ स चान्यस्थितस्मा। रजोनिवृत्तौ चतुर्थ्यां विधिः।
तदनिवृत्तौ प्रतिषेधः॥ मनुः। रजस्युपरते साध्वी स्नानेन स्त्री र
जस्वलेति॥ साध्वी गर्भाधानादिविहितकर्मयोग्य इत्यर्थः॥ ज्योतिः
शास्त्रे। विश्वर्यपौष्णनैर्ऋतं चाप्यधिष्ण्यं स्यात्केचिदिति॥ विश्वं मघा पौ
१४२ ष्णं रेवती। नैर्ऋतं मूलं। अथ स्नानमासु पुत्रो विषमासु कन्येति॥ इ १४२
यं हेमाद्रौ चौक्तः। युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु॥
तत्राप्युत्तरोत्तरः प्रशस्ताः। तदाहापस्तंबः। तत्राप्युत्तरोत्तरा
प्रशस्तेति॥ व्यासः। रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जि
तः॥ पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः। सप्तम्यामप्र
जा योषिदष्टम्यामीश्वरः पुमान्॥ नवम्यां सुभगा नारी दश
म्यां प्रवरः सुतः॥ एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः॥
त्रयोदश्यां सुता पापा वर्णसंकरकारिणी॥ धर्मज्ञश्च दरत

ज्ञश्च आत्मवेदी दृढव्रतः। प्रजायते चतुर्दश्यां पंचदश्यां पति
व्रता॥ आश्रयः सर्वभूतानां षोडश्यां जायते पुमान्॥ तत्रैकस्यां
रात्रौ सकृदेव कार्यं॥ सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमा
निति याज्ञवल्क्योक्तेः॥ इदं च ऋतौ गमनमन्यकाले प्रतिबंधादि
नासंभवे पर्वाहे कादश्यादावपि कार्यं॥ ब्रह्मचार्येव पर्वण्याद्या
श्चतस्रश्च वर्जयेदिति याज्ञवल्क्योक्तेः॥ व्याख्यातं चेदं मिता
क्षरायां॥ यत्तु श्राद्धादौ ब्रह्मचर्यं विहितं तदृतौ गच्छतो न ब्र पि७
ह्मचर्यस्खलनदोष इति॥ स्त्रीणां बहुत्वे ऋतौ यौगपद्ये च गम
नक्रममाह। देवलः। यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्॥
रक्षणार्थमपुत्राणां ग्रहणक्रमशोऽपि वेति तीर्थमृतुः॥ विप्रा
दिक्रमे वर्णक्रमः। ग्रहणक्रमो विवाहक्रमः। अगमने दोषमा
ह पराशरः॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चोरायां ब्रह्महत्यायां पुत्र्यन्नेनात्र संशयः इति ॥ अस्यापवादमा
ह मदनरत्ने ॥ व्याधितो बंधनस्थो वा प्रवासेष्वथ पर्वसु ॥ ऋतु
कालेपि नारीणां भ्रूणहत्या प्रमुच्यते ॥ वृद्धां वंध्यामसद्वृत्तां
मृतापत्यामपुष्पिणीं ॥ कन्यां च बहुपुत्रां च वर्ज्जयन्मुच्यते भ
यात् ॥ ऋतौ स्नानमाहापस्तंबः ॥ ऋतौ तु गर्भशंकित्वात्स्नानं
१४३ मैथुनिनः स्मृतं ॥ अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषव १४३
त् ॥ स्त्रीणां तु न स्नानं ॥ उभावप्यशुची स्यातां दंपती शयनं ग
तौ ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमानिति शाता
तपवचनात् ॥ अत्र प्रसंगाद्रजस्वलोपयोगि किंचिन्निरूप्य
ते ॥ तत्र स्मृत्यर्थसारे ॥ दिवा रजस्रावे तद्दिनमशुचित्वं स्या
त् ॥ रात्रौ रजस्रावे सति अर्धरात्रादर्वाक् चेत्पूर्वदिनमित्ये
कः पक्षः ॥ उदयात्पूर्वं चेत्पूर्वदिनमित्यपरः पक्षः ॥ एषां पक्षा

णां देशाचारतो व्यवस्था । अज्ञाते रजस्रावे तु दिनेषु ज्ञातेषु रज
स्रावादिकमशुचित्वं स्यात् ॥ ज्ञानात्पूर्वं रजस्वलास्पृष्टं दुष्टमेव च ॥
रजस्वला त्रिरात्रमशुचिः स्यात् ॥ चतुर्थेह्नि स्नाता शुद्धा भवति ।
भर्तुः स्पृश्या दैवे पित्र्ये च कार्ये रजोनिवृत्तौ शुचिः । रजस्वला च
तुर्थेह्नि मृत्तिकाभिः शौचं दत्वाक्षात्रादि स्त्री च पादपादन्यून
मृत्तिकाभिर्विधवा द्विगुणमृत्तिकाभिः शौचं दत्वा दंतधाव
नपूर्वकं संगमे सचैलं स्नायात् ॥ रजस्वलायाः स्नातायाः [redacted]
[redacted] पुरेपि रजो दृष्टं अष्टादशादिनादर्वागशुचित्वं नास्ति । अष्टा
दशादिने रजो दृष्टा चेदेकरात्रमशुचित्वं ॥ नवदशादिने द्विरात्रं । विं
शतिदिने त्रिरात्रमेव । त्रयोविंशतिदिनादूर्ध्वं रजस्राविणीनामे
वं भवति ॥ विंशतिदिनादर्वाक् द्विरात्रमेव । त्रयोप्रामशौरजो
दर्शनवतीनां अष्टादशादिनेपि त्रिरात्रमशुचित्वं । किंच ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयोदशादिनादूर्ध्वं प्रायो रजस्वाविणी नामैकादशादिनादर्वागशु
चित्वं नास्ति॥ एकादशादिने रजो दृष्टे एकदिनमशुचित्वं॥ द्वादशा
दिने द्विरात्रं॥ त्रयोदशादिने त्रिरात्रमेव। प्रयोगपारिजाते प्येवं॥ रो
गजे तु स्तत्रैवोक्तं। रोगेण यद्रजः स्त्रीणामन्वहं हि प्रवर्त्तते॥ नाशु
चिस्तु भवेत्तेन तस्माद्वैकारिकं मतामिति॥ तत्रापि स्वकाले
१४४ शुचिरेव। तदुक्तं॥ रोगजे वर्त्तमाने पि कालेनियमिति कालजं॥ त १४४
स्मादप्रमत्ता स्यादन्यथा संकिरो भवेत्॥ रजस्वला या रजः स्पर्शो
अकामतः स्नानं॥ कामतउपवासः। पंचगव्याशनं च॥ असवर्णा
सु तु ब्राह्मण्याः क्षत्रियादिस्पर्शे क्रमेण दशाहपादोनदशाः॥
क्षत्रियादीनां तु दशपादएव। क्षत्रियादीनां हीनवर्णस्पर्शे त्रि
रात्रमुपवासः॥ एतच्च कामतः। अकामतस्तु प्राकृशुद्धेरशनं॥
ला २ अकामतश्चांडालादिस्पर्शे पुनः स्नानमेव प्राक्शुद्धेः॥ कामतस्तु
प्रथमे ह्न्यहः द्वितीये त्र्यहः तृतीये एकाहः॥ श्वः स्पर्शे तु

त्र्यहएकाहो वा॥ भुंजानाया श्चांडालादिस्पर्शादिना त्रांउच्छिष्टस्पर्शे
तु दशधृद्दृस्पादि मिता क्षरायां ज्ञेयं॥ स्मृत्यर्थसारे तु॥ बाला पस्मा
स्पर्शे स्नायेनेदस्ते भुक्तिः पश्चादनशनप्रसाम्न्यापद्वति॥
स्नानविधिमाह पराशरः। स्नाने नैमित्तिके प्राप्ते नारी यदि र
जस्वला॥ पात्रांतरितलोयेन स्नानं दत्वा व्रतं चरेत्॥ सिक्तगा
त्रा भवेदद्भिः सांगोपांगा कथंचन॥ न वस्त्रपीडनं कुर्यान्नान्य
द्वासश्च धारयेत्॥ व्रताल्याहमदनपारिजाते वासिष्ठः॥ स्नाना
न्याभाव्यं जान्मसुस्नायाद् च शयीत॥ न दिवा सुप्या नरजं
स्टजेत्॥ न मांसमश्नीयन्नग्रहान्निरिक्षेतन न हस्तेनाकं चिदाच
रेत्॥ अखर्वेण पात्रेण पिबेदं जलिना वा पात्रेण लोहिता
यसेन वेति॥ खर्वो वा महस्तः॥ यथाकामी वा कामममाविजनी
तः॥ संभवामेति वचनात्॥ स्त्रियः काममनति क्रम्य यथाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा धन

मंत्रदस्यास्तीति यथा कामी वा भवेत्॥ न नियमश्चेत्तावेति॥ कुलप
तत्॥ काममेवं विमा विजनीतोः संभवामेति वचनात्॥ काममेवेच्छया
आ विजनीतोः अप्रसवात् संभवाम भर्त्तासह संगता भवामेसु
र्थः॥ तथा तैत्तिरीयश्रुतौ॥ स इन्द्रः स्त्रीषंसादमुपासीदत्॥ अस्यै
बलहत्यायै तृतीयं प्रतिगृह्णीतेति ता अब्रुवन्वरं वृणामहै ऋ
त्वियात्प्रजां विंदामहै काममाविजनीतोः संभवामेति तस्मादृत्वियाः
१४५ स्त्रियः प्रजां विंदत इति॥ अस्यार्थः॥ स इन्द्रः स्त्रीणां षंसादं समृ १४५
हं उपासीदत् उपसाद्य त्वाचेच्छां दर्से अस्यै अस्याः ब्रह्महत्यायाः
तृतीयांशं प्रतिगृह्णीतेति ता अब्रुवन् वरं वृणामहै ऋतुसंबंधि
गमनं ऋत्वियं तस्मात् आ विजननं नमो विजनितु तस्मात् आवि
जनितोः आगर्भकालात् संभवाम पुरुषैः संयुक्ता भवेम॥ एवं गा २
च सति विकल्पोयं॥ तथा च स्मृतिः॥ ऋतावुपेयात्सर्वत्र वा प्रति

त्रीषिध्र वर्ज्यमिति॥ अथास्य दक्षिणां समधि हृदयमालभते॥
यत्ते सुशीमे हृदयं दिवि चंद्रमसि श्रितं॥ वेदाहं तन्मां तद्विद्यात्प
श्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमि
ति॥ अथ मैथुनोत्तरं अस्याः भार्यायाः दक्षिणांसं दक्षिणस्कंधं
अधि उपरि स्वहस्तं नीत्वा तेनैव हस्तेन हृदयमालभते॥ स्पृशा
ति यत्ते सुशीमे इति मंत्रेण॥ अत्र कर्कभाष्यं। हृदयालंभ अभि
गमनोत्तरकालिनः॥ प्राक्कालीन इत्यपरे॥ अप्रयत्नत्वादिति ते
न दिति जयरामः। यतो गर्भसंभावनायां न दुपयुज्यते॥ अप्रयतत्वं
च शौचादिना पि स्यादेव॥ यथाहयाज्ञवल्क्यः॥ ऋतौ गर्भशंकि
त्वात्स्नानं मैथुनिनः स्मृतं॥ अनृतौ तु सदा गच्छेच्छौचं मूत्रपु
नं २ रीषवत्॥ इति॥ अभिगमनोत्तरं मनाचांत एव दक्षिणां समधि
धि हृदयमालभते ति भर्तृयज्ञः॥ मंत्रार्थः॥ सुशोभना सि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माधमूर्ध्नि केश मध्ये प्रहरित्रयस्याः सानस्याः संबोधनं हे सुशीमे शो
भनसीमे जिनिपत्तेन व हृदयं मनः दिवि स्वर्गे वर्त्तमानेन चंद्रमसि श्रि
तं ॥ तदधीनतया स्थितं ॥ तदहं वेद जानीयां ॥ तच्च मां विद्यान् मा
जानीतु ॥ एवं परस्परानुगुणितहृदया अपुत्सादिसहिताव यं श
रदः शतं सा प्रत्नकत्वर्थं ॥ एवमतत्कुर्थं ॥ प्रथमतौ पृथा हृदयालंभः ॥ १४६
१४६ हरिहरव्याख्या चैवं ॥ एवमनेन प्रकारेण अतो नंतरं कृताकृतौ
प्रवेशनं यथाकाममेवेति ॥ ॥ इति श्री त्रिरग्निचित्सम्राट्स्थप
तिवाममत्वात्मज दीक्षितगदाधर कृते गृह्यसूत्र भाष्ये प्रथमकां ध्ये
डे एकादशी कंडिका ॥ ११ ॥ ॥ अथ पदार्थक्रमः ॥ चतुर्थ्यामि
पररात्रे स्नानपूर्वं गृहाभ्यंतरतः कर्म कार्यं ॥ ततो देशका
लौ [illegible] स्य त्री विवाहांगभूतं चतुर्थीकर्माहं करिष्ये इति
संकल्प्य ततो वैवाहिकमग्निं स्थापयेत् ॥ ब्रह्मोपवेशनं ॥

अग्न्युत्तरतः उदपात्रनिधानं ॥ ततः प्रणीताप्रणयनादि आ
ज्यभागांतमाधानवत् ॥ आज्यभागानंतरं स्थालीपाकेन पंचा
हुतयो होतव्याः ॥ अग्ने प्रायश्चित्ते इति प्रथमा ॥ इदमग्नये न मम ॥
वायो प्रायश्चित्ते इति द्वितीया ॥ इदं वायवे ॥ सूर्य प्रायश्चित्ते
इति तृतीया ॥ इदं सूर्याय न मम ॥ चंद्र प्रायश्चित्ते इति चतुर्थी ॥
इदं चंद्रमसे ॥ गंधर्व प्रायश्चित्ते इति पंचमी ॥ इदं गंधर्वाय ॥
ततश्चरुः स्रुवेणादाय प्रजापतये स्वाहेति होमः ॥ इदं प्रजाप
तये न मम ॥ अग्न्यादि षण्णामाहुतीनां संस्रवाणामुदपा
त्रे प्रक्षेपो हुत्वा हुत्वैव ॥ अन्यत्सामान्यं त्रैव ॥ ततः स्विष्टकृदादि
दक्षिणादानांतं ॥ तत उदपात्रजलेन वध्वाः मूर्ध्नि यातेपतिघ्नी
अभिषेकः ॥ असौ स्थाने नामग्रहणं ॥ हे तिप्रिये इति ॥ ततो
वरः प्राणैस्ते इति चरुशेषं वध्वै प्राशयति सदरतु ॥ अत्र समा
चाराद्वरोऽपि कन्याहस्तेन भोजनं करोति ॥ ॥ इति पदार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा धर

क्रमः॥ अथ गर्भमिते विशेषः॥ ब्रह्मोपवेशनाद्याज्यभागांतं पूर्ववत्॥
प्रत्यक्षब्रह्मणउपवेशनं॥ ब्रीहीणप्रजापतये जुष्टं गृह्णामि॥
आज्यभागांते पंचाहुतयः॥ ततः स्थालीपाकेन प्रजापतये स्वा
हेति॥ मूर्धन्यभिघारकः॥ ततः स्थालीपाकं प्राशयति॥ प्राशे
स्ते चतुर्भिः प्रतिमंत्रं॥ महाव्याहृत्यादि स्विष्टकृदंतं॥ आ
ज्येन स्विष्टकृदिति॥ गर्भमतमितिपद्धतौ॥ प्राशनादि पूर्णपा
१४८ त्रदानांतं॥ इति गर्भमते क्रमः॥ अथ गर्भाधाने पदार्थक्रमः॥ १४८
प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं संकल्पः॥
देशकालौ संकीर्त्य अस्याः मम भार्यायाः प्रतिगर्भसंस्कारातिश
नां ३ य द्वारास्यां जनिष्यमाणौ सर्वगर्भाणां बीजगर्भसमुद्भवैनो
निबर्हणेन द्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म
हं करिष्य इति॥ ततो रात्रावभिगमनं॥ ब्रह्मसूत्रं मूत्रपुरीष

त्यागेन॥ स्नानं॥ ततो दक्षिणांसमधिहृदयमालभते॥ यत्ते सुसीमे मूर्ति॥
नक्षत्रादि विशेषो गर्भमते॥ प्रतिगर्भाधाने क्रमः॥ अथ प्रथमरजो
दर्शने विशेषः॥ तत्र प्रथमरजोदर्शने मासेषु प्रतिगर्भाधानस्य शां
तिपूर्वकं कर्तव्यत्वात् तत्र तु शुभमासा उच्यते॥ प्रथमे रजसि
चैत्रज्येष्ठआषाढभाद्रपदकार्तिकपौषा अशुभाः॥ आश्विनो मध्य
मः॥ शेषाः शुभाः॥ कश्चित् वैशाखफाल्गुणपूर्वार्धयोरधमत्वमुक्तं॥
तिथिषु प्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशीपौर्णिमास्यमा
वास्या अशुभाः॥ केचित्सप्तम्येकादश्यावशुभे॥ अष्टमीद्वादश्यो
शुभे॥ इत्युक्तं॥ वारेषु रविभौममंदवारा अशुभाः॥ केचित्सोमोप्यशु
भ इत्यूचुः॥ नक्षत्रेषु भरण्यार्द्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढापू
र्वाभाद्रपदा अशुभाः॥ चित्राविशाखाश्रवणाश्विनीमघास्वात
योमध्यमाः॥ अन्यानि शुभानि॥ केचित्तु हस्तिकापुनर्वस्वनुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारेवस्रो प्यशुभाऊ कृताः॥ एवं तासांमध्यमत्वं॥ एवमन्यत्रापि
योगेषुव्याघातस्याघानवमा श्यो गंडां तिगंडयोः॥ षट्षष्टशु
लस्यपंचदशापरिघेपूर्वोर्ध्वं वैधृतिव्यतिपातश्चे सशुभाः॥
करणानिविष्टिं विनामर्वाणिशुभानि॥ अहित्रित्रेधा विभक्ते
१४९ अन्धो भागंशुभः॥ द्वितीयो मध्यमः॥ तृतीयो दुष्टः॥ एवं १४९
रात्रौ॥ सूर्योदयास्तमयावप्यशुभौ रविसंक्रमादर्धो नाडी
चतुष्टयमूर्ध्वं चांसशुभं॥ सक्रांत्यादिदग्धदिने षशुभं॥ रु
विचंद्रपरागयोरप्यशुभं॥ संध्योल्कावज्रावाशौचसुभतु
रास्नानश्चतुर्थीष्टमद्वादशच्छेशोचंद्रेजीर्णेरक्तनीलमलिनवस्त्र
धरवस्त्रेषु परहितेषु न शुभं॥ संमार्ज्जनीकाष्ठमन्त्रणाग्नि
शूर्पशुनश्च्यादि पितृमातृश्रादेघशुभं॥ उर्ध्वं स्थितानामा
निद्राचैतानोश्चाशुभं॥ शय्यादौ शुभं। पित्रादि सखिवस्थप

स्थितौदृष्टमशुभं॥ शय्यादौ शुभमित्यादिज्ञेयं॥ दुष्टमासा
दौ प्रथमरजोदर्शने तां धृत्वा दौभक्षणादिमंगलोरं कुर्यात्तु॥ च्यौः
द्वितीयेतु शुभेन त्र कुर्यादिति॥ प्रथमरजोदर्शने द्वितीयं प्रति
ध्यनतस्मिन्नथ शुभवक्ष्यमाणा शांतिः कार्या॥ द्विवाघशुभ
सन्निपातेतु तस्मूचितवकृत्य शुभेनिरासार्थं वक्ष्यमाणाहुति
संख्यादिविवृध्या कार्या कृत्वा शांतीत्यादिज्ञेयं॥ ॥इति
शुभाशुभविचारः॥ ॥अथ शांतिरूच्यते प्रयोगपादिजा
तेशौनकः॥ पंचमेह्रि चतुर्थे वागमहात्तिथ्यपुरःसरं॥ द्रोणप्र
माणधान्येन व्रीहिरात्रित्रयं भवेत्तु॥ कुंभत्रयंचन्यसेद्गौतं
तु वस्त्राद्विवेष्टितं॥ स्तलेनाथनवचैनप्रसुव आपइसथा॥
आचार्यं प्रवरस्तद्वन्नायश्याचततः क्रमात्तु॥ मध्येकुंभेक्षि
पद्रोण्येमोषधानिचहेमच॥ औदुंबरः कुशादूर्वा राजीवं च

गदा

धर

पत्रिल्पका॥ विष्णु क्रांताथ तुलसी बर्हिषः शंखपुष्पिका॥ शता
वर्यश्च गंधा च निर्गुंडी सर्षपद्वयं॥ अपामार्गः पलाशश्च पन
सो जीवकस्तथा॥ प्रियंगवश्च गोधूमा व्रीहयो श्व स्यएव च॥
क्षीरं दधि सर्पिश्च पद्मपत्रं तथोत्पलं॥ कुरंटश्च पगुंजा चैव
चभाडकमुस्तकः॥ द्वात्रिंशदोषधीनां हि यथासंभवमा
१४९ हरेत्॥ मृत्तिकाश्चौषध्यादिनि तन्मंत्रेण क्षिपेत्क्रमात्॥ १४९
कुंभोपरि न्यसेत्सात्रं कांस्यं स्वदेणु ताम्रजं॥ भुवनेश्वरीम्न्य
सेत्तत्र इंद्राणी च पुरंदरं॥ जपेद्गायत्रीमध्यमेश्रीसू
क्तं च जपेत्ततः॥ स्पृशन्वो दक्षिणं कुंभं त्वेगौ कोज श्री
पेत्तथा॥ चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि च॥
संस्पृश्य तत्र कुंभं श्री रुद्रं रुद्रसंख्यया॥ वामे इंद्राग्नी सूक्तं
चैव संस्पृश्य जपेत्॥ कुंभस्य पश्चिमे देशे शांति होमं

समाचरेत्॥ दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च॥ ति
वा लैर्भिश्चैव दूर्वाभिरेकैकाह्याहुतिर्भवेत्॥ अष्टोत्तरसहस्रं वा
शतमष्टोत्तरं तु वा॥ गायत्र्यैव तु होतव्यो हविरत्र चतुष्टयं॥ ततः
स्विष्टकृतं हुत्वा समुद्रादूर्मिसूक्ततः॥ संततामाज्यधारां च
पूर्णाहुतिमथाचरेत्॥ अथाभिषेकं कुर्वीत प्रतिकुंभस्थि
तोदकैः॥ आपो हि ष्ठेति नवभिः सूक्तेन च ततः परं॥ इंद्रोऽग्नि
गत्यं चैव पावमानैः क्रमेण तु॥ उभयं स्पृणवच्च नस्यक्ति
दाविंश एकया॥ अंबकेनेति मंत्रेण जातवेदस एकया॥ समु
द्रज्येष्ठा इत्यादि त्रयं तां च त्रिभिः क्रमात्॥ इमा आपस्त्वेवैन
वदेवस्य त्वेति मंत्रतः॥ मंत्रेणाथ तमीशानं त्वमग्ने रुद्र इत्यथ॥
तमुष्टुहीति मंत्रेण भुवनस्य पितरं यथा॥ या ते रुद्रेति मंत्रेण
शिवसंकल्पमंत्रतः॥ इंद्रस्तोत्रमपं च मंत्रैश्चैवाभिषेचयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनुं पयस्विनीं दद्याद्वाचा यथा च भाषणे ।। सदक्षिणमनड्वाहं प्र
दद्याद्दुर्ज्ञापिने ।। महाशांतिं प्रदाप्याथ ब्राह्मणान्भोजयेत्ततः ।।
नारदः । तत्र शांतिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः ।। प्रत्येकाष्टश
तं चैव गायत्र्या जुहुयात्ततः ।। स्वर्णं गोभूतिलान्दद्यात्सर्वदो
षापनुत्तये ।। अथ प्रयोगः ।। तत्र ।। एकं विनायकं पूज्य गुरोश्चैवं
१५० विधानतः ।। कर्मणां फलमाप्नोति यद्वत्स्वयं न कर्मफलसिद्धा १५०
र्थं पवविघ्नार्थं त्येनग्रहयज्ञस्य वस्यकोत्तेदिहचशौनकेन
अर्त्तवनां तु नारीणां शांतिं वक्ष्यामि शौनक ।। इत्युपक्रम्य ग्रहा
लिखित्पुरः सरमिति प्रकरणोक्तेरावश्यकत्वाद्देशकालक
र्तृकाणां च विशेषवचनाभावतंत्रेण कर्त्तव्यत्वाद्ग्रहमखपू
र्वकतंत्रेण शांतिकप्रयोगउच्यते ।। रजोदर्शनेनानंत
रं पंचमदिने चंद्रताराद्यनुकूल्ये शुचिदेशे सुस्नातया पत्न्या
युतः पतिः प्राङ्मुखउपविश्य प्राणानायम्य देशकालौ संकीर्त्य

मम पत्न्याः प्रथमरजोदर्शने ऽकृष्टदुष्टमासादि सूचितसकु
लारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौन
कोक्तां शांतिं हेमेकरिष्ये इति संकल्प्य गणेशपूजनपुण्याहवा
चननांदीश्राद्धानि कृत्वा शांतिदानंकु[illegible]बिनेयंत्रं तंत्रसमाचा
र्यं ब्राह्मणं जपहोमार्थमष्टौ षट् चतुरो वा ऋत्विजोऽपि वृ
त्वा गंधादिना पूजयेत् ।। ततः आचार्योऽग्निहेशानदेशे शुचौ
मही द्यौरिति भूमीं स्पृष्ट्वा तद्दक्षिणोत्तरतश्च तथैव मंत्रा
वृत्त्या भूमीं स्पृष्ट्वा ॐ ओषधयः समवदंत इति द्रोणप्रमा
णव्रीहिभिर्मध्ये तद्दक्षिणोत्तरतश्च तथैव मंत्रावृत्त्याय
त्रित्रयं दत्वा तेनैव क्रमेण शालित्रयेणैवमकालकमभ
त्रं कुंभत्रयं आजिघ्रकलशमिति मंत्रावृत्त्या स्थाप
येत् ।। एवं सर्वत्र मंत्रावृत्तिः ।। ततः प्रसव आप इति नव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्चैनकलशेषूदकपूरणं॥ गंधद्वारामिति त्रिषु गंधं प्रक्षि
प्य या ओषधिरिति सर्वौषधीः॥ ओषधयः समिति यवान् प्र
क्षिपेत्॥ ततो मध्यमकुंभे यवव्रीहितिलमाषमुद्गान्॥ ततो
मध्यकुंभे यवव्रीहितिलमाषप्रियंगुश्यामाकमुद्गान्॥ क्षि
प्त्वा गायत्र्या औदुंबरकुशदूर्वारक्तोत्पलचंपकबिल्ववि
१५१ ष्णुक्रांतातुलसीबर्हिशंखपुष्पीशतावर्यगंधभृंगुंडीरकूपी १५१
लसर्षपापामार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीहि
अश्वच्छदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्त
पीतकुरंटकगुंजौवचामद्रकाख्यानि द्वात्रिंशदोषधा
नि सर्वाणि यथासंभवं वा क्षिपेत्॥ ततः त्रिषु कलशेषु
कांडात्कांडादिति दूर्वा॥ अश्वत्थे व इति पंचपल्लवान्॥

गजाश्वस्थानरथ्यावल्मीकसंगमह्रदगोष्ठस्थानमृदः स्यो
नापृथिवीति क्षिप्त्वा॥ याः फलिनीरिति पूगीफलानि सहि
रण्यरत्नानीति कनककुलिशनीलपद्मरागमौक्तिकानि पं
चरत्नानि। हिरण्यरूप इति हिरण्यं च क्षिपेत्॥ युवा सुवासा
सा इति सूत्रेण वाससा च कलशाकंठानुवेष्टयित्वा॥ गंधा
क्षतपुष्पमालादिभिः कलशान् भूषयेत्॥ ततः कलश
त्रयोपरि तेनैव क्रमेण सौवर्णं रजतं कांस्यमयं ताम्रम
यं वैवणवं मृण्मयं वा यवादिपूरितं पात्रत्रयं पूर्णा दर्वी
ति निधाय तदुपरि श्वेतवस्त्रत्रयं न्यस्य तत्र चंदनादि
नाऽष्टदलानि कुर्यात्॥ तत्र मध्ये गायत्र्या भुवनेश्व
रीमावाहयामीति यथाशक्ति सुवर्णनिर्मितां भुवनेश्व
रीप्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत्॥ तद्दक्षिणकुंभे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवृस्त्रे॥ इंद्राणीमासु इति इंद्राणीमावाहयामीति तथैव सौ
वर्णामींद्राणीप्रतिमां स्थाप्योत्तरकलशोपरि इंद्रंद्रत्वा इंद्रमावा
हयामीति सौवर्णामिंद्रप्रतिमां स्थापयेत्॥ ततउक्त
मंत्रैरुक्तक्रमेण देवतात्रयस्यकोऽनुसमयेनषोडशो
पचारपूजां कुर्यात्॥ ततो मध्यकुंभे आचार्योऽष्टस
हस्रमष्टशतंवागायत्रीजप्त्वा श्रीसूक्तं चजपेत्॥ हिर १५२
१५२ ण्यवर्णामितिपंचदशर्चं श्रीसूक्तं॥ ततएवऋत्वि क०
ग्दक्षिणकुंभेरुद्रसूक्तानिजपेत्॥ कद्रुद्रायेतिनवर्चं॥
इमारुद्रायतवसइत्येकादशर्चं॥ आतेपितरितिपंचद
शर्चं॥ इमारुद्रायस्थिरधन्वनइतिचतस्रः॥ आवो
राजानं१ तमुष्टुहि२ भुवनस्यपितरं३ त्र्यंबकं४ अथा
न्योऋत्विगुत्तरेकुंभे एकादशावृत्तिभिरुद्रंजपेत्॥

त्रामइंद्राग्नीतिसूक्तं दशर्चंजपेत्॥ ततः कुंभेपश्चिमेदेशेस्थं
डिलेऽग्निंप्रणीयतदीशान्यां चैवादौनवग्रहादीस्तत्तन्मंत्रै
रावाह्यषोडशोपचारैः संपूज्यतदीशान्यां प्राग्वत्कुंभंसंस्था
प्यतत्रैवरुणमावाह्याग्निसमीपमेसब्रह्मोपवेशनाद्याज्य
भागांतं विशेषः॥ प्रणीताप्रणयनेपयसः प्रणयनं॥ आ
ज्यानंतरं ग्रहसमिधः॥ तिलाः दूर्वाः तिलमिश्रगोधूमाः।
तंदुलाः चरोः पयसिश्रपणं॥ आज्यभागांते यजमानोद
क्षिणतउपविश्य॥ होमार्थं चजपार्थं च वरयेदृत्विजोब
हून्॥ आचार्यो द्विजैः सहेतिचोक्तेः आचार्यऋत्विजां होमाव
गमात्तेषां चास्यसेन सांगायोगात्तैश्च क्रियमाणे होमेयज
मानेनप्रत्याहुतिस्त्यागः यजमानस्य शताष्टविंशसंख्याकम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या स्तंवादीनामेवां गणप्रधानदेवतामुद्दिश्य एताभ्य इदं न ममेति
त्यजेत्‌॥ तत आचार्यः समस्त्विक्‌ नवग्रहेभ्योऽष्टशतमष्टविं
शत्संख्याम्यतमसंख्याकाष्टोत्तरी अर्कादिसमिधाज्य
तिलाज्याहुतीश्च हुत्वाऽधिदेवताप्रत्यधिदेवताविनायकादि
पंचलोकपालेभ्यन्यूनसंख्यया जुहुयात्‌॥ एवमिंद्राणींद्रयोः
प्राग्युक्तमंत्राभ्यां क्रमेण विश्वतुष्टयं यत्येकमष्टशतसंख्य
१५२ याभुवनेश्वर्या अष्टसहस्रपक्षं जुहुयात्‌॥ तस्यादुष्टशतु १५२
पक्षे तु तयोरष्टाविंशतिरितिसंप्रदायः॥ अन्ये तु गायत्र्येव तु
त्र्यं हविरत्र चतुष्टयं॥ ततः स्विष्टकृदादिप्रणीताविमोकांतं
कृत्वा॥ इंद्रादिदिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वरीन्द्राणींद्रे
भ्यः॥ क्षेत्रपालाय च सदीपान्माषभक्तबलीन्‌ तत्तन्मंत्रैर्दत्वा पू
र्णाहुतिं समुद्रादूर्मिरिति त्र्यृचेन जुहुयात्‌॥ ततो भुवनेश्व

र्यादिकलशोदकं ग्रहकलशोदके च पात्रांतरे गृहीत्वा तेन त
त्स्थं पंचपल्लवैः सकुशदूर्वैर्धृतनववस्त्रं यजमानं धृतनव
वस्त्रां [illegible] यजमानपत्नीं [illegible] वामस्थां ऋतुमतीं स
त्वीं उदङ्मुख आचार्योऽभिषिंचेदेतैर्मंत्रैः॥ ते च॥ आपो
हिष्ठेति नवभिः॥ एकद्विदयत इत्येकया॥ त्रिभिष्ट्वं देव
ति सहर्चेन॥ उभयं शृणुवच्च न इत्येकया॥ स्वस्ति दुर्विर्शो इति
च॥ त्र्यंबकमिति॥ जातवेदस इत्येकया॥ समुद्रज्येष्ठा इति च
तसृभिः॥ आयं तामिति तिसृभिः॥ देवस्य चेति तिसृभिः॥ तमी
शानं जगतस्येकया॥ त्वमग्ने रुद्र सोपसत्तं आखावागते नेकेन
तमुष्टहीति मंत्रेण भुवनस्य पितामिति च॥ या ते रुद्रेति
पञ्चाग्नत इति षण्मंत्रैः॥ इंद्र त्वा वृषभ इति पंचमंत्रैः॥
ततः सुरास्त्वामभिषिंचंत्विति नवभिः पौराणमंत्रैरभिषिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेत्॥ ततः कलशोदकेन्यौनेन चोदकेन सुस्नातौ दंपती शुक्ल
वाससौ गंधमाल्यादि ध्वज्योपविष्टौ तां नत्र पत्नी दक्षिणतः॥ त
तो यजमानो ग्निं संपूज्य विभूतिं धृत्वा चार्यादीन् गंधपु
ष्पवस्त्रालंकारादिभिर्यथाशक्तिपूजयित्वा आचार्याय
धेनुं दक्षिणां दद्यात्॥ दक्षिणात्वेन चास्मान दक्षिणां त
१५४ रं अनवस्थाप्रसंगात्॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां द १५४
द्यात् रुद्रजापिने सदक्षिणमनड्वाहं दक्षिणां दद्यात्॥ अत्र
धेनुं न्यायेन दक्षिणां दद्यात् रुद्रजापिने सदक्षिणमनड्वाहं
प्रदद्यात् रुद्रजापिने इति प्रतिवचन कारणात् सदक्षिणात्वं॥
ततोन्येभ्यो ब्राह्मणेभ्यश्च भूयसीं दक्षिणां दद्यात्॥ त
तो ग्रहपीठदेवतानां चोत्तरपूजां पंचोपचारैः क्षमाप्य॥

यांतु देवगणा इति विसृज्याचार्यहस्ते प्रतिपाद्याग्निं संपूज्य
गच्छ गच्छ सुरश्रेष्ठ इति विसर्जयेत्॥ ततो ब्राह्मणा महाशां
तिं पठेयुः॥ तद्यथा॥ आनो भद्रा इति दश॥ स्वस्ति नो मिमीता
मिति पंच ऋचो भद्रं कर्णेभिरिति पंच दश॥ स्यमू षु इति तिस्रः॥
तच्छंयोरित्येका ततो यजमानो नवभिर्ग्रहप्रीत्यर्थं भुवने
श्वरी रुद्राणी इ प्रीतये च प्रत्येकं त्रीन् ब्राह्मणान् भोजयित्वा
संकल्प विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीतेति॥ एवं कृ
ते सर्वारिष्टशांतिर्भवतीति॥ ततः शुभे काले गर्भाधा
नं कुर्यात्॥ ॥ इति दुष्टरजोदर्शने शांतिर्भवति॥ ॥
अथ चंद्रस्त्र्यपि रागकाले प्रथम रजोदर्शने शांतिवि
शेष उच्यते॥ शौनकः॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जायते॥ व्याधिपीडा तदा स्त्रीणां मादो तु नतु दर्शनात्॥
हृष्टे संजायते पुत्रस्तस्य मृत्युर्न संशयः॥ शांतिरुक्ता॥ तेन
न४ क्षायते रूपं सुवर्णेन विकल्पयेत्॥ सूर्यं मतु सूर्यरूपं हेमं
चंद्रं तु राजतं॥ राहुरूपं च कुर्वीत नागेनैव विचक्षणः॥ ना
गः सीसं॥ त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत्॥ आ
१५५ कृष्णेनाप्यायस्वेत्यस्य भानोरिति पूजामंत्राः उक्ताः॥ नक्षत्रदे १५५
वतास्तन्मंत्रेण वा। संपूज्यात्तु पञ्चैतद्रूपं समिद्भिश्चार्कसं
भवैः। चंद्रं तु हेतुपालाशैर्दूर्वाभिः सह राहुमेव च॥ समिद्भिर्जु
हु...क्षस्य जेबायज्जुहुयाद्बुधः। आज्येन चरुणा चैं
व तिलैश्च जुहुयात्ततः॥ पंचगव्यैः पंचरत्नैः पंचत्वक्पंच
पल्लवैः। जलैर्नौषधिकल्कैश्च अभिषेकं समाचरेत्॥
मंत्रैर्वीरुणसंभूतैरापो हिष्ठादिभिस्त्रिभिः॥ इममें

गंगे परतत्त्वायामीति मंत्रकैः॥ यजमानस्ततो दद्याद्
त्त्या प्रतिहर्ति त्रयां॥ ६८॥ अथ प्रयोगः॥ उपरागस्य पौर्णि
मास्यमावास्यान्यामविनाभावात्तदन्तिरिक्तवारादौ दुष्ट
प्रारुक्तशांत्यासमुच्चीयंते निमित्तभेदात्॥ अदृष्टार्थस्ना
नं प्रसक्तविध्यभावे तत्कार्यं कारित्वान वगमेनामनहोमे
नादिष्ट होमानाभिवानपातं भिन्नस्य योगात्॥ स्नानमात्रे
सियमेव॥ अत्र च पुनः श्रवणाभावात् नवग्रहमखः कर्तव्यः कर्ता
कर्त इति विवेकः॥ तत्रकैवल्यायाः प्रयोगः। पूर्वोक्तकाले स
स्त्रीकः शुचिः प्राङ्मुख उपविश्य प्राणानायम्य देशका
लौ स्मृत्वा मम पत्न्याश्च उपरागे प्रथम रजो दर्शननिमि
त्तारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करि
ष्ये इति संकल्प्य प्राग्वत् ऋत्विजपूजां नवग्रहपक्षे स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवग्रहास्मिति तत्सर्वोपरागे प्रथमे ह्यादिपूर्वं व्रतं॥ तत आचा
र्यः शुचिदेशे गोमयेनोपलिप्य तत्र पंचवर्णैरंजोभिरष्टदल
पद्मं कृत्वा तदुपरि नवं श्वेतं वस्त्रं उदुंबरं तत्र संस्थापयेत् यथाश
क्तिरजतप्रतिमां आप्यायस्वेति मंत्रेण चंद्रप्रतिमामावाह
माभिस्थापयेत्॥ ततो यथाशक्तिसीसनिर्मितां राहुप्रतिमां
१५६ स्वर्भानोरिति राहुमंत्रेणावाह्य तदुत्तरतः स्थापयेत्॥ ततो १५६
यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां यथाशक्तिसुव
र्णनिर्मितां तत्तन्मंत्रैर्नाममंत्रैर्वा ॐ आश्विनावाहयामि प्र
णवादिनामंत्रैः स्थापयेत्॥ मंत्रास्त्वापस्तंबानामष्टौ वाक्या
नीति प्रसिद्धाः। नामानीतु॥ अश्विनौ॥ यमः। अग्निः। प्र
जापतिः। सोमः। रुद्रः। अदितिः। बृहस्पतिः। सर्पाः। पि
तरः। भगः। अर्यमा॥ सविता। त्वाष्ट्रं। वायुः। इंद्राग्नी।

मित्रः। इंद्रः। निर्ऋतिः। आपः। विश्वेदेवाः। विष्णुः। वसवः। वरुणः।
अजैकपात्। अहिर्बुध्न्यः। पूषेति॥ एवं देवतामावाह्य एभिरेव
मंत्रैः। कांडानुसमयेन षोडशोपचारैः पूजयेत्॥ तत्र चंद्रग्र
हे चंद्राय श्वेतवस्त्राक्षतमाल्यानि देयानि॥ सूर्यग्रहे तु सूर्याय
रक्तवस्त्ररक्तचंदनरक्ताक्षताकरवीरपुष्पाणि देयानि। राहवे
कृष्णानि॥ नक्षत्रदेवताभ्यः श्वेतानि॥ ततः पश्चिमतोऽग्निं प्र
तिष्ठाप्य पक्षेन वग्रहाणामप्यावाहनपूर्वं संपूज्य ब्रह्मोपवेश
नादि चरुं श्रपयित्वाज्यभागांतं॥ ततः पक्षे नवग्रहहोमः।
ततश्चंद्रमुद्दिश्योक्तसंख्यया पालाशसमिधाज्यचरुति
लैर्होमः॥ राहुमुद्दिश्योक्तसंख्यया दूर्वाज्यचरुतिलैर्होमः।
सूर्यग्रहे तु चंद्रस्थाने सूर्यमुद्दिश्योक्तसंख्ययाऽर्कसमि
दाज्यचरुतिलैर्होमः। तिसृणां दूर्वाणामेकैकाहुतिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समिधश्च त्रिमध्वाक्ताः। कार्याः॥ ततस्विष्टकृदादि पूर्णाहुत्य-
न्तं प्राग्वत्॥ ततः आचार्यः एकस्मिन्कलशे जलपूर्णे पंचगव्या-
नि पंचरत्नानि वराश्वत्थोदुंबरामूलं बिल्वानां च चःपंचपल्लवान्
सर्वौषधिकल्कं दूर्वाः कुशांश्च निक्षिप्य संकल्पितं कुदंपतीपू-
र्ववदभिषिंचेदेतैर्मंत्रैः॥ आपो हिष्ठेति। इमम्मे गंगेति। तत्वा-
यामीति॥ अन्येपि समुद्रज्येष्ठा इत्यादयः। सुरास्त्वाभिषिंचंतु इत्याद-
१५८॥ यः पौराणाश्च॥ ततः स्नानदक्षिणादानप्रतिमाप्रतिपादना- ॥१५८॥
दि पूर्ववत्॥ यदा पूर्वेशांतिसमुच्चयस्तदा कालेकयाल्कप्रेक्ष्य
दानयादिवत्वप्रयोगः॥ तत्र यजमानो देशकालौ त्वा तु मम अ-
स्याः पत्न्याः प्रथमरजोदर्शनेऽकेमुदुष्टमासेतिथ्यादि अ-
मुकग्रहणसूचितेत्यादि संकल्प्य स्वस्तिकूपूजां तं विदध्या-
त्॥ ततः आचार्यो भुवनेश्वर्यादिपूजांतेः प्राक्प्रश्च्याद्य

देवेभ्योद

ततउदीच्यां चेंद्रादीन्संपूज्य यथोपक्रमं तौ मम भिषेकौ कुर्या-
दिति विशेषः॥ अ[illegible]यत्समानं॥ ॥इति ग्रहणे रजोदर्शन-
शांतिः॥ ॥इति श्रीसम्राड्वामनात्मजदीक्षितगदाधर-
कृते गृह्यभाष्ये प्रयोगानुक्रमे एकादशी कंडिका॥११॥ पक्षा-
दिषु स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा
जुहोति॥ ब्रह्मणे प्रजापतये विश्वेभ्यो द्यावापृथिवीभ्यामिति॥
६७ पक्षाणामादयः पक्षादयस्तासु पक्षादिषु प्रतिपत्सु बहुव-
चनोपदेशात्सर्वपक्षादिष्वेतत्कर्म भवति॥ उक्तेन विधिना
स्थालीपाकं श्रपयित्वा तेनैव स्थालीपाकेन दर्शपूर्णमा-
सपक्षादौ पौर्णमासदेवताभ्यो हुत्वा दर्शकालपक्षादौ द-
र्शदेवताभ्यो हुत्वा ब्रह्मण इत्येवमादितश्चतुर्भ्यो जुहो-
ति स्थालीपाके नैव दर्शपौर्णमासे च विधिः समान इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्याग्रंथगौरवभया[illegible]दाचार्येण समस्तोपदेशः कृतः॥
अतोयावद्दर्शास्त्राभ्यां होमविभागेन सिद्धस्तावद्दर्शोपवेशापीति॥
एवं च स्मृत्यंतरैः सहानुगतार्थो भवति। केचित्तु समस्तोपदे
शात् सर्वाभ्यां होममिच्छंति। सिद्धं च शेरूपादानमाभूदिति
श्रपयित्वैस्कन्द्यते॥ यच्च पूर्वपक्षादिषु तत्पक्षादिष्विंसा तिप
१५८ मान्यैनोक्तं तथापि स्मृत्यंतरोक्तो यागकालो ग्राह्यः॥ व्य १५८
हृश्शातातपः॥ पर्वणो यश्चतुर्थांशो आद्याः प्रतिपदस्त्रियः
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥ कारिकायां॥
आवर्तनेथवा प्राक् प्रतिपदि पर्वसमाप्यते॥ तत्र पूर्वाह्न एवस्या
त्संधेरूर्ध्वं दिजाशनं॥ आहिताग्नेर्नियमोऽयमेतदूर्ध्वं वि
धानतः॥ कुर्यादूर्ध्वमावर्तनाच्चेत्स्यात् प्राग्भूते प्रातरेव हि॥
प्रतिपदि वृद्धिगामिन्यां क्षीणायां वा संधिर्ज्ञानोपायमा

ह लौगाक्षिः। तिथेः परस्याघटिकाश्च यास्युर्न्यूनास्त
थैवाभ्यधिकाश्च तासां॥ अर्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिनेस्यादिति॥ प्रतिपद्वृद्धिनाडिका
द्विधा विभज्यार्धं पर्वणि संयोज्या संधिः कल्पनीयः॥ त
थैव प्रतिपत्क्षयनाडिकाश्च॥ द्वेधा विभज्यार्धं पर्वणि
वियोज्य संधिः कल्पनीयः॥ आधानानंतरं शुक्लाद्दर्शा
द्वा प्रतिपद्भवति तस्यामारंभः कार्यः तदुक्तं कारिकायां॥
आधानानंतरं शुक्लाद्दर्शाद्वा प्रतिपद्भवेत्॥ तस्यां पक्षादि
कमेत कार्यं पूर्वाह्न एव तारादिति॥ हरिहरभाष्ये तु सायमा
दिप्रातरंतमेके कर्म प्रचक्षते॥ पौर्णमासादिदर्शांतमेवं वि
दुर्बुधा इति वचनात्॥ दर्शपक्षे यदाधानं तदा दर्शमनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा ५२

ष्टैव पौर्णमास्यां पक्षादिकर्मारंभः॥ यत्तु छंदोगपरिशि
ष्ट वचनं॥ ऊर्ध्वं पौर्णमासो विच्छिन्नः॥ य आयाति स
होतव्यं सर्व एवाग्निरिति श्रुतेरेतत्पुनराधानविषयं तच्छाखी
य विषयमित्युक्तं॥ तन्नैके वदंति॥ आधानस्य शुक्लपक्षे
विहितत्वाच्च तदुत्तरं पौर्णमासस्थालीपाककालस्यैव विच्छ
१५१ मानत्वात्पौर्णमासस्थालीपाकारंभो युक्तः॥ नेच्छंति सं। १५१
अस्माकं सूत्रे दारकाले दायाद्यकाले वाऽऽवसथ्या
धानस्य काल उक्तः॥ तत्र दायाद्यकाल आधानं दर्श
तं यावस्त्विति पद्भवति तस्यामारंभो युक्तः॥ ननूदगय
न आपूर्यमाणपक्षे पुण्याहइत्यस्यो विभागो विशुक्ल रू२
पक्षेस्यात्... तदा दर्श्यायां प्रतिपद्यारंभः॥ इति

देव। सत्संविभागस्ताव भाग्यागतः प्राप्तस्तत्र कालापेक्षा
भावादापूर्यमाणादिति यमो न स्यादतो युदैव विभागस्तदैवा
ध्यानं ततः प्रतिपदि आरंभ इत्युक्तं॥ न नैतदुक्तं दर्शपक्षे सवि
भाग आधानं तु शुक्लपक्ष एव कार्यं॥ नैवं कालविलंबे पुमाण
भावाद्विभागोत्तरं कार्यमेव॥ ततोमावास्याप्रतिपदाद्यादिवस्यामा
रंभ इति॥ अत्रैव हेतुर्वक्तव्यमस्ति संभवे गौरवविप्रापायोच्यते॥
यथारंभे काले स्तूतकर्कमलमासपौषमासगुरुशुक्रास्तबाल्य
वार्धक्यग्रहणादि भवति तदापि प्रारंभः कार्यः॥ मानितु तन्त्रा
रंभनिषेधकानि उपरागो धिमासश्च प्रथमपर्वणि तथा
मलिम्लुचे पौषे नान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्ये
चंद्रसूर्यग्रहे तथैस्यादीनि संग्रहकारोदितवचनानि तानि॥ ओ
लेस्यादि नास्य कालोनुपक्रांतस्थाली पाकारंभ विषयाणीति
प्रयोगपारिजातकारः॥ प्रयोगरत्नाकरश्च॥ तथा चापरार्के स्थं

गार्ग्यवचनं उदाजहार ॥ नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् ॥
अतिपातेऽस्मिन्नयोः ॥ प्रशस्ते मासि पुण्यभ इति ॥ देवयाज्ञिकेना
दर्शपूर्णमासानिज्ञानाइति व्याख्याने स्मृतशुक्लास्तादावारंभइ
साक्षानि ॥ तथा च त्रिकांडमंडनः ॥ आधानानंतरं पौर्णमासी चे
न्मलमासगा ॥ तस्यामारंभणीयादीन् कुर्वीत ॥ नकदानेति ॥ आ
१६० चारोप्येवं ॥ विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशा १६०
य च ॥ इत्यांतरानुपदेशात् स्थालीपाकादेः विश्वेदेवताभ्यो बलि
त्रयमुद्देश्यात्र संस्थकुर्यात् ॥ बलिहरणवाक्ये च नमः शब्दो
न कार्यः ॥ उक्तं चैतत्कर्कोपाध्यायैः बलिहरणे च नमस्कार
इति ॥ पितृभ्यः स्वधा नम इति सूत्रव्याख्यानावसरे च न
मस्कारश्चात्र प्रदर्शित आचार्येण सर्वे बलिहरणे श्रु
प्रसेतव्य इत्युक्तं ॥ वैश्वदेवस्य हि वयबलक्षणो पक्षः ॥

विश्वे देवा देवता देवपितृमनुष्यादय अस्येति वैश्वदेवः सर्वा
र्थः ॥ अतएव क्रियमाणः पाकस्तस्य वैश्वदेवस्य अग्नये स्वा
हेति स्वादिभिर्मंत्रैर्जुहोति ॥ वैश्वदेवस्येति सिंहावदपदेशानुद्वि
तीयः स्थालीपाको वैश्वदेवः समानेतंत्रः पुष्टाद्विपुत्र वैनीतिभ
र्तृयज्ञभाष्ये ॥ कर्कोपाध्यायैस्तु वैश्वदेवकोऽन्वितुष्पथकुच
रुकुर्वीत यथापोहस्य जुहोतीति पोहर ॥ तस्यन्यस्युक्तं । वैश्व २६
देवशब्देन विश्वेदेवा देवता अस्येति सर्वार्थः पाको भिधीयते इति
ततो जुहोतीत्युक्तं भवति । यत्तु पोहस्वदितिनहि पोहस्व दिति ॥
नहि पोहस्त्राह्व वाच्योन्यः कश्चित्स्रुरूपं भवति ॥ तेनोस्यपृष्टधृक्रिया ॥
वैश्वदेवस्तु पुनः पाको विघन्नएवेति ॥ तथा च वक्ष्यति ॥ वैश्वदेवा
दन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयादित्युक्तं ॥ अग्नौ होमः । प्राक्
एव पुनरग्नौ जुहोतीति अग्निग्रहणं बलिकर्मणोऽग्नौ माभूदिति ॥

६ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नये स्विष्टकृते स्वाहेति ॥ प्रयोगोपदर्शनार्थं ॥ प्राजापत्यं स्वि
ष्टकृच्चेति ॥ प्रदेशांतरेडुक्तं ॥ इह प्रयोगउपदर्शिते ॥ अपि च स्था
लीपाकेन दर्शपौर्णमासदेवतादीनां होमविधानस्यावसरवि
धिलसयेतत् ॥ तत्कुर्यं ॥ प्राकूमहाव्याहृतिभ्यः स्विष्टकृदन्यच्चे
दाज्याहविरितिप्रदेशांतरेडुक्तं ॥ तेन प्राङ्महाव्याहृतिहोमदाज्य
१६१ भागोत्तरकालं चावसरो गम्यत इति ॥ स्विष्टकृद्धोमश्चैषा १६१
देव भवति ॥ स्विष्टकृद्ग्रहणं वक्ष्यमाणस्य बलिहरणस्य बाध्या
न्यूचोतनार्थमिति भर्तृयज्ञः ॥ परिभाषतः प्राप्तत्वात् ॥ स्वाहा
काराग्रहणं बलिनिवृत्त्यर्थं ॥ प्रदानार्थोपि स्वाहाकारो न ब
लिहरणेषु भवति ॥ बाह्यतः स्त्रीबलिं हरति नमः स्त्रि
यै नमः पुंसे वयसे नमः शुक्लाय कृष्णदंताय पापीनां
पतये नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यो नमोस्तु ब
लिमेभ्यो हराभि स्वस्ति मेस्तु प्रजां मे ददत्विति ॥ ततो बाह्यतः शालायाः ब
हिः प्रदेशे नमः स्त्रियै इत्यादिमंत्रैः प्रतिमंत्रं स्थालीपाकान्न स्त्रीबलिं
स्त्र्यादिभ्यो बलिः तं हरति स्त्रुवेण मंत्रांते भूमौ प्रक्षिपति ॥ एतद्भागं
तु कर्तास्वर्तीभवतीति ॥ मंत्रार्थः ॥ स्त्रियै सैतानस्तु स्वविघातिन्यै
नमः नमस्कारोस्तु ॥ अतः संतानस्य स्त्रेच्छ्या वात्र बाह्यबल्याधिका
रिणः प्रतिजयतामः ॥ तथा पुंसेडस्तु स्वरूपायेव ॥ किंभूतायवयसे ॥
अवसे चरच्छायें द्रायबलाय च ॥ शुक्लाय बहिः स्वच्छदंताय अति
तात रंगाववपायाय अतिमलिनमनसत्वस्य वः ॥ अत एव पापीनां प
तये श्रेष्ठाय दीर्घछंदसः ॥ अत्र पुमान् बलिश्च पे पुमावैवां तन्त्रिषष्ठे ॥
एवं ये मम प्रजां संतानमुपलोभयंति मोहयंति ॥ ग्रामे वसंतः उत अ
पि वा समुध्ययेः अरण्ये वा वने वापि तेभ्यो नमः नमस्कारोस्तु ॥ येभ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलिं पूजोपचारानि समर्पयामि ॥ मम नमस्कारबलिभ्यां यूयं संतुष्टाः भव
त ॥ ततो भवतां प्रसादात् मम स्वस्ति कल्याणमस्तु । भवंतु ब्रह्मणोऽ प्र
जाः पुत्रादिसुखजातं प्रयच्छंतु ॥ ब्राह्मणैः प्रत्युक्तः ततो ब्राह्मणभोज
नं ॥ बलिहरणानंतरं शेषं स्थालीस्थितं अवशिष्टं चरुं अग्नौ लौकिकौ
दकेन प्रप्लाव्य मत्स्येभ्यो ब्राह्मणभोजनं कुर्यात् ॥ प्रणीतोदकेन प्रक्षा
लनमिति वासुदेवादयः ॥ नैत्यिकादिकर्मप्रयोगः ॥ इति श्रीमहायाज्ञिक
सम्राट् [illegible] नामनाम जदीक्षितनामधारस्य तेन रचिते सूत्रे प्रथमकां
डे [illegible] कंडिका ॥१२॥ अथ पदार्थक्रमः ॥ आधानानंतरं प्रथमप्रतिप
दि जातः स्वाला दर्शतनिसंस्मिन् यो विशेषः अंनांतं वैश्वदेवं हुत्वा माहपु
[illegible] पूर्वकमाभ्युदयिकं कुर्यात् ॥ ततः संकल्पः ॥ देशकालौ संकीर्त्य मम
पात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्थालीपाककर्म करि
ष्ये इति ॥ अत्रान्वारब्धवणः प्रणीतानां चासनं चतुष्पयं कुर्वीत कुर्यादि
ति हरिहरः ॥ ततश्च प्रणीताधर्मः [illegible] ततो ब्रह्मोपवेशनादि आज्यभागांतं

चरुसहितं कुर्यात् ॥ तत्र विशेषः तंडुलानंतरं वैश्वदेवान्नस्या सादनं प्रो
क्षणे ततः आज्यभागांते स्थालीपाकमभिघार्य स्रुवेण चरोर्होमः ॥ अग्न
ये स्वाहा इदमग्नये न मम ॥ अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां ॥
पुनः अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां न मम ॥ ब्रह्मणे स्वाहा इद
ब्रह्मणे न मम ॥ प्रजापतये स्वाहा । इदं प्रजापतये ॥ विश्वेभ्यो देवेभ्यः स्वाहा ।
इदं विश्वेभ्यो देवेभ्यः ॥ द्यावापृथिवीभ्यां स्वाहा । इदं द्यावापृथिवीभ्यां ॥
ततस्तेनैव चरुणाग्नेरुत्तरतः प्राक्संस्थं बलित्रयं कुर्यात् । विश्वेभ्यो दे
वेभ्यो नमः । इदं विश्वेभ्यो देवेभ्यो न मम ॥ भूतेगृहेभ्यो नमः । इदं भूतगृहे
भ्यो न मम ॥ आकाशाय नमः । ॐ इदमाकाशाय न मम ॥ त्रयाणां बलीनां सं
स्रव भक्षणं न कार्यं मिति भंगाधरः ॥ ततो वैश्वदेवान्नमभिघार्य तेनैव
होमः ॥ अग्नये स्वाहा । इदमग्नये न मम ॥ प्रजापतये स्वाहा । ॐ इदं प्रजा
पतये न मम । विश्वेभ्यो देवेभ्यः स्वाहा । ॐ इदं विश्वेभ्यो देवेभ्यो न मम ॥ च
रोर्वैश्वदेवान्नस्य होमः ॥ अग्नये स्विष्टकृते स्वाहा । ॐ इदमग्नये स्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वद्दरसेनमम॥ ततः आज्येन भूराघानवाहुतयः॥ प्राशानं॥ मार्जनं॥ पवित्र
प्रतिपत्तिः॥ प्रणीताविमोकः॥ दक्षिणादानं॥ ततः स्थालीपाकेन स्तुद्धायां
भूमौ वेदिः स्त्रुवेण बलिहरणं॥ नमः स्त्रियै॥ ॐ इदं स्त्रियै॥ नमः पुंसे व
यसे॥ ॐ इदं पुंसे वयसे न मम॥ नमः शुक्लाय श्वधद्दंताय पापीनांपत
ये॥ ॐ इदं शुक्लाय नमः॥ नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत
वारण्ये तेभ्यः॥ ॐ इदं येभ्यो न मम॥ नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति
मेऽस्तु प्रजां मेऽद्ददातु॥ इदमेभ्यस्तु इति स्थागद्द लिनद्दिरः॥ इदं स्त्रियै पुंसे
सेवयसे शुक्लाय श्वधद्दंताय पापीनांपतये मे प्रजामुपलोभयंति ग्रामेव
संत उत वारण्ये तेभ्यश्च न ममेति मंगाधरकारिकायां॥ शेषमद्भिः प्र का५
प्लाव्य एकब्राह्मणभोजनं कुर्यात्॥ ॥ इति पौर्णमासस्थालीपाकः॥
अथ दर्शविनिर्णयः॥ तत्राधानानंतरं या अमावास्या आयाति तस्यां वै धा
विभक्तो दिन हतीयां शेष परमक्षये पिंडपितृयज्ञः कार्यः॥ तस्मिन्नवश्योपै
दपातीति श्रुतेः॥ चंद्रदर्शनप्रथमघ पितरः कल्पयन्ते प्रत्यहं भवति तथा पिंप

रमपत्ते पौर्णे विवक्षितः सा चांतेइति श्रीवास्त्रौ कृ इति दिन द्वये घपपश हुके दे
वीया यौसत्यां परदिने ध्रुघपि अमावास्या संमिता मलोत्पेपित त्रैव पिंडु
पितृयज्ञानुष्ठानमुचितं॥ एकस्मिन्नेवदिने उपरार्वव्याप्तिस्तत्रैव तद
नुष्ठानमेवं चापिंडपितृयज्ञकालस्य याजमानोधिकारबाध्यानुपदेशा
घागकालस्यानुपदेशात् पिंडपितृयज्ञादिनां परदिने यागः कार्यः॥
पूर्वेद्युः पितृभ्यो निकाय प्रातर्देवेभ्यः प्रतनुत इति कर्कोदाहृत श्रा
स्वांतरीयश्रुतेः॥ पूर्वो यांगस्त्वापिंडपितृयज्ञइति सूत्राच्च॥ यद्यपि चंद्रद
र्शने यागनिषेधः स्मर्यते द्वितीयाविमुहूर्तोचेत् प्रतिपद्याग सा कृ वी॥
अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादित्यादिना तथा प्युत्कन्याये
नवाजसनेयिनां पिंडपितृयज्ञ परदिन एव चंद्रदर्शनवत्यपि यागा
नुष्ठानस्योचितत्वात् छंदोगसनेयि वातिरिक्त विषयतेन पूर्वाह्ण संधि
विषयखंविषेधो नेतव्यः॥ न चास्य दर्शाभिवादनाहिताग्नेरेष न भवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६४

त्रिधा व्यं॥ अनाहिताग्नेरप्येषद्भ्रसुक्तत्वात्॥ अयं च मृतपितृकस्यैव भवतीति॥
अत्र मातृपूर्वकमाभ्युदयिकं कार्यमित्युक्तं गंगाधरेण॥ अत्र सर्वं कर्मापि
सव्येन दक्षिणामुखेन कार्यम्॥ अत्रैवं पदार्थक्रमः॥ प्राचीनावीतिकरणं॥
निबंधनं॥ तत्र कुशातिलसंयुक्तानां वस्त्रदशानां संग्रथनं परिहि-
तवस्त्रेण संवेष्टनं वा ग्रहणमिति दैवयाज्ञिकाः॥ नीवीं परिहितमध्ये वे-
ष्टनं वस्त्रप्रांतवस्त्रं विस्रंसयेति विं नीविस्रंसनेति सूत्रव्याख्याने शा-
अनंतयाज्ञिकाः॥ न नीवीं कुरुते तत्र व्याख्याने नीविः परिधानधार्य-
अंचलप्रदेशांतरालग्रहणमित्युक्तं ग्रंथे अनंतैः॥ नीवीं कुरुते साम सप्तनीवि
दिसत्र च भिन्नविषयेवर्तिं अपि कर्कोदयः॥ सर्वसूत्र व्याख्यानादौ लौकिकने
प्रदेशांतरे प्रदेशांतराग्रहणमेवायोती॥ नीविवासो दशांते न स्वरक्षार्थं
प्रबंधये दिसाश्चैलोयनैः॥ वेदिश्रोणी समूहनाव च्छादनावा क्षय्यो षो
दक्षिणतरस्वहीयं निवीरिति॥ दक्षिणे अग्निदेशे तु तिलैः सह कुशावय

१६४

मित्तिप्रोक्षेदत्र रक्षः॥ नीवीकार्या दक्षिणांगुष्ठे वामे कुक्षौ कुक्षौ सलेति यत्र कासा
मनवचनं तत्र छिन्नश्राद्धे॥ पिहणां दक्षिणे पार्श्वे विपरीता तु दैविक मतिस्मर
र्यंतरात्॥ वामे दक्षिणे वेसा योषा वस्थितिमदनपारिजाते॥ तत्तो ग्नेर्द-
क्षिणसंस्थमपसव्यं परिस्तरणं॥ अग्नेः पश्चादुत्तरतो वा दक्षिणसंस्थ
दाक्षिणाग्राणां पात्राणामेकैकेनासादनं॥ नाछिद्राः स्रुवः॥ उलूखलं॥ मुसलं॥
शूर्पं॥ चरुस्थाली॥ उदकं॥ आज्यं॥ मेक्षणं॥ वज्रं॥ उदकपात्रं॥ संस्कृद
च्छिन्नानि॥ व्रीहयः॥ सूत्राणि॥ ऊर्णा वा॥ वस्त्रदशा वा॥ स्थाल्यां प्रहणाप
क्षेपूर्वं तस्याः आसादनं॥ नरन्त्रयः॥ अपयनाग्निं च रक्षः अपूर्णं स्रुवं वा गृ-
ह्णाति॥ ततोऽग्निरुत्तरतः उलूखले व्रीहितो घातिघ्नतो वहननं॥ शूर्पेण सूप
निष्पवनं॥ संस्करणीकरणं॥ अपूर्णस्य चरोः सारतंडुल स्रपणं॥
अभिघारणं॥ दक्षिणेनो द्वासनं॥ अपसव्येनाहरणं॥ ततो दक्षिणामुख
एवाहुतिद्वयं जुहोति॥ अग्नये कव्यवाहनाय स्वाहा॥ इदमग्नये कव्यवा-
हनाय न मम॥ सोमाय पितृमते स्वाहा॥ इदं सोमाय पितृमते॥ अग्नौ मेक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६५

णपासनं॥ आग्निमपरेण वा दक्षिणेन वा अपहता इति सकृत् दक्षिणसंस्थं
लेखां कुर्यात्॥ ये रूपाणीति परस्तादुल्मुकहरणं॥ लेखायां पित्रे प्रत्यति
स्थोदनेजनं॥ पितः अमुक अवनेनिक्ष्व इति रेखामूले॥ पितामह अ
वनेनीक्ष्वेति रेखामध्ये॥ अमुक प्रपितामह अवनेनीक्ष्वेति रेखांते॥ स
दर्भाछिन्नानि लेखायां हस्तमात्रावनिते पिंडदानं॥ पितः अमुक एतत्ते
अन्नमिति मंत्रेण रेखामूले पिंडदानं॥ पितामह अमुक एतत्ते अन्नमिति
रेखामध्ये॥ प्रपितामह अमुक एतत्ते अन्नमिति मंत्रेण लेखांते॥ अत्र
पितर इति जपः॥ अपसव्येनोदङ्मुखवर्तनं॥ आतमनात्सिष्ठेतासु न
स्तौ नैवामीमदंतेति जपः॥ पूर्ववदवनेजनं पिंडानामुपरि॥ नीविविस्रंस
नं॥ नमो वः इत्यंजलीकरणं षड्भिः प्रतिमंत्रं॥ गृहान्न इति जपः॥ सूत्रा
दानामम्ल मस्यप्रदानमेतद्व इति प्रतिपिंडं॥ ऊर्जं मिति पिंडानामुपरि
उदकनिषेकः॥ लेखायां पिंडावधानं॥ अवघ्राणं॥ सदर्भाछिन्नावधान
मग्नौ॥ उल्मुकस्य च तत्रैव क्षेपः॥ आधत्तमित्याः पत्न्याः मध्यमपिंडस्य प्राशनं॥ १६५

तस्मिन्मासे अन्नवर्गाणां यजमानस्य॥ उदकोपस्पर्शनं॥ ततः पार्वणश्राद्धं॥ इति
क्रमः॥ ततः श्वः प्रतिपदि वृद्ध्युपस्थानादि आज्यभागांतं स्थालीपाके
नाग्नये स्वाहा॥ विष्णवे स्वाहा॥ इंद्राग्निभ्यां स्वाहेति दर्शे देवताभ्यो हुत्वा जुहोति॥
ब्रह्मणे स्वाहेत्यादि ब्राह्मणतर्पणांतं पूर्ववत् कुर्यात्॥ सर्वत्र पूर्वं स्थालीपाक॥
पश्चाद्वैश्वदेवः॥ तदुक्तं कारिकायां॥ अहन्ते वैश्वदेवे तु स्थालीपाकाः प्रकी
र्तिताः॥ अन्यत्र पिंडयज्ञात्तु सोपराले विधीयते॥ प्रथमायां प्रतिपदि तु आभ्युद
यिकश्राद्धं पूर्वं कार्यं इति तत्रैवोक्तं॥ गर्भिमते तु पिंडपितृयज्ञे चरोर्हासनांते स्रुवांस
मिधामग्नौ प्रक्षेपः॥ यज्ञोपवीती भूत्वा अग्नौ होमः॥ एतत्ते अन्नमिति ना ध्याहारः॥
इति विशेषः॥ अथ गर्भिमते स्थालीपाके विशेषः॥ प्रथमप्रयोगे पौर्णमासं
मासं पूजा श्राद्धपूर्विका-- ब्राह्मणाय॥ ब्रह्मासनाद्याज्यभागांतं पूर्ववत्॥
चरु हणे अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णामीति ग्रहणं॥ प्रोक्षणे
७५२ त्यादिकः॥ आज्यभागांतं चरुहोमः॥ अग्नाविष्णुभ्यां स्वाहा॥ सरस्वत्यै
स्वाहा॥ सरस्वते स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ महाव्याहृत्यादि ब्राह्मण
भोजनांतं॥ ततो वैश्वदेवः॥ ततः श्रोणे तैष्ट्या पवेशनाद्याज्यभागांते विशेषः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६८

चरुस्थालीद्वयं॥ ग्रहणे त्वग्नये त्वग्नीषोमाभ्यां ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो
द्यावापृथिवीभ्यां त्वा जुष्टं॥ अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो जुष्टमिति
द्वितीयचरुग्रहणं॥ प्रोक्षणे ताधिकः॥ आज्यभागांते पूर्वचरुणाग्न्यादि
भ्यो हुत्वा तेनैव बलिहरणं॥ ततो वैश्वदेवस्याग्नौ जुहोत्यादि वैश्वदेवचरुणा
उभयोः स्विष्टकृद्धोमः॥ ततो बाह्यतस्थिवबलिहरणं पंचयज्ञैः॥ द्वितीयच
रुशेषेण बलिहरणं॥ शेषमद्भिः प्लाव्य ममत्याग्न्याहुत्यादि प्राजापत्यांतं॥ सं
स्रवप्राशनं ब्राह्मणभोजनांतं॥ तदनंतरं चरुशेषेण वैश्वदेवः॥
अमावास्यापक्षादिकर्मविशेषः॥ तत्र ग्रहणे प्रोक्षणे होमे चाग्नेरनंतरं वि
कुः इंद्राग्नी च शेषं पौर्णमासवत्॥ एतत् सोमस्य यजमानस्याग्नेरनंतरं
अग्नीषोमीयं द्रष्टव्यं भवति॥ श्रुतिमार्गमते विशेषः॥ स्वकाले स्थालीपाके
पिंडपितृयज्ञयोः करणे विशेष उच्यते॥ पक्षादिः पिंडपितृयज्ञादि प्रमादा
द्व्यतीतं यदि॥ प्रायश्चित्तं ततो हुत्वा कर्तव्यं तदिनांतरं॥ पिंडपितृयज्ञस्तु अ
मादिन एव भवति दिनांते॥ अमायामनुष्ठाने प्रायश्चित्तं तेन वैश्वदेवश्च १६८

रुशेषेण॥ न पिंडपितृयज्ञः॥ तथा च कात्यायनः॥ परे नाग्नौ हुते स्वार्थे परस्याग्नौ
हुते स्वयं॥ पितृयज्ञात्ययश्चैव वैश्वदेवद्वयं चरेत्॥ अनिष्ट्वा नवयज्ञेन नवान्नप्रा
शनं तथा॥ भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्॥ अनाहिताग्नेश्चरुः॥
अनाहिताग्नेस्तु इष्टय एव॥ कारिकायां॥ मुख्यकाले कदाचनस्याः पौर्णमासः क
थंचन॥ अशौचाद्विप्रमादाद्वातिक्रांते योपत्रकुर्वीत यान चेद्यावद्दर्शी— स
स्याद्दर्शे न सह तत्क्रिया॥ यदि दर्शोऽप्यतिक्रांतस्तदा पथिकृतेष्टिर्भवेत्॥ अ
२३ त्रापि च दर्शेनाहिताग्नेः॥ पुरोडाशस्याप्यनाहिताग्नेश्चरुरेव इष्टस्तु केवला
